प्रतिज्ञा विरोधात् ।१।१।९।

छान्दोग्ये हि "येनाश्रुतं श्रुतं भवति" इत्यादि वाक्येनैकविज्ञानेन

जातस्य जगतो भोग्यात्मकस्यकारणप्रधानज्ञानेन भोग्यमेव कार्यजातं विज्ञातं स्यान्न तु भोक्तृजीववर्गज्ञानं स्यात् । यतश्चेतनजीवस्य प्रधान कारणकत्वाभावात् कारणेन हि कार्यविज्ञातं भवति, तत्त्वकारणेन विज्ञातेन विज्ञातं भवति, न वा कारणसंबद्धवस्तुविज्ञानेन कार्यं विज्ञातं भवति. नहि घट कारण मृत्पिण्डसम्बद्धजलज्ञानेनघटादिकं विदितं भवति इति । एतादृशी एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा या शास्त्रे प्रतिपादिता, सा प्रतिज्ञा, यदि सर्वजगत्कारणचेतनस्य सत्पदेन ग्रहणं क्रियते तदैव समर्थितास्यान्नत्वचेतनप्रधानस्य सत्पदवाच्यत्वे संभवति । तस्मात् प्रधानस्य हेयत्वप्रतिपादनाभावात् न प्राधानंसत्पदवाच्यमिति निष्कर्षः । परिशिष्ट वृत्ति ग्रन्थस्याक्षरार्थस्तु अतिरोहित एवेति तद्व्याख्यानाय न प्रयत्यते १,१,८

गोमयादि अचेतन भाग से जीवका जो अचेतन अंश वृश्चिक का है. वही उत्पन्न होता है नतु वृश्चिक का चेतनांश उत्पन्नहोता है। एवं जीव का जो उपकरण शरीरादिक अचेतन विभाग है, उसी को प्रधानका कार्य होने से प्रधानज्ञान होने से अचेतनांशमात्र ज्ञात होगा, न तु चेतनजीव किसी भी प्रकार से ज्ञात हो सकता है। अतः प्रतिज्ञा हानिरूप दोष का निराकरण नहीं होता है। इसलिये "यतोवा" इत्यादि कारणवाक्य-घटक-सत्पद वाच्य प्रधान नहीं है। किन्तु सम्पूर्ण जगत् के उत्पत्ति स्थिति और प्रलय का निदान अभिन्नोपादान कारण परमात्मा ही सत्पदवाच्य है। इस विषय में "न विलक्षणत्वात्तथा,, दृश्यते तु" इस सूत्र के आनन्दभाष्य तथा "प्रतिज्ञा हानिरव्यतिरेकाच् शब्देभ्यः" इन सबसूत्रों के भाष्यमें विशेष विवेचना है अतः विशेपार्थी जन वहींसे अपना अधिकजिज्ञासा को शान्त करें ।८।।

सर्वविज्ञानप्रतिज्ञोपदिष्टा, सा च प्रधानकारणवादे विरुध्यते। चेतनं प्रति जड़ात्मकस्य प्रधानस्य कारणत्वाभावात्। अतो न सच्छब्द-वाच्यं प्रधानम् ।१।१।९।

विवरणम् —आनुमानिकस्य प्रधानस्य सदेवेत्यादि वाक्यघटक सत्पदवाच्यत्वे ईक्षणाद्यनुपपत्तिप्रभृतयोऽनेके दोषा उद्भाविताः तथैवायम परः प्रतिज्ञाविरोधदोषोऽपि वक्ष्यमाण आपततीति प्रदर्शनाय तथा परम-पुरुषस्य सकलजड़ाजड़वर्गकारणस्यैव कारणवाक्यस्थपदेन ग्रहणं भवतीति दर्शयितुं प्रतिज्ञाविरोधसूत्रमवतारयन्नाह—छान्दोग्ये हीत्यादि। छान्दोग्य श्रुतेः षष्ठप्रपाठके कथितं यत् "येनाश्रुतं श्रुतं भवत्यमतं मतं भवती" त्यादि। येन जगत्कारणपरमात्मना श्रुतेन अर्थात् कारण स्वरूप परमात्मश्रवणे जाते, अश्रुतमपि तत्कार्यं जड़ चेतनात्मकं सर्वं श्रुतमेव भवति तदर्थं पुनः प्रयत्नान्तरस्यावश्यकता नावशिष्टा भवति, एवं तत्वतो निखिल

सारबोधिनी :—आनुमानिक जो प्रधान, उसको यदि सदेवेत्यादि वाक्य घटक सत्पदवाच्य मानते हैं, तो ईक्षणाद्यनुपपत्ति रूप अनेक दोष आपतित होता है, ऐसा कहा। इसी प्रकार से एक विज्ञान से सर्व विज्ञान की जो शास्त्र में प्रतिज्ञा की गई है, तादृश प्रतिज्ञा का भी विरोध होता है प्रधान को सत्पदवाच्य मानने से इत्यादि दोष के निराकरण करने की इच्छा से सूत्र का उत्थान के लिए वृत्तिकार कहते हैं कि "छान्दोग्ये हीत्यादि, छान्दोग्य श्रुति के षष्ठ प्रपाठक में आत्मादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतं भवत्यविज्ञातं विज्ञातं भवतीत्यादि। हे श्वेतकेतु क्या अपने आचार्य से तुमने उस आदेश को जाना, जिससे कि एक को सुनने पर तत्कार्य-स्वरूप सकल पदार्थ जाना जाता है तथा जिसके मत होने पर सब मत होता है और जिस एक का वास्तविक विज्ञान होने से तत्कार्य सकल जड़चेतन विज्ञात हो जाते हैं। इत्यादि वाक्य द्वारा एक विज्ञान से सर्वविज्ञान उपदेश सुनने में आता है। यह प्रतिज्ञा स्वातंत्र्येण प्रधान

जगदुपादानस्य परमात्मनो ज्ञानेजाते अविज्ञातमपि सकलवस्तुज्ञातमेव भवति,न भवति च तदर्थविज्ञानाय प्रयत्नान्तरस्यावश्यकता, एतादृशी सकल विज्ञानप्रतिज्ञा कृता, तां चोपपादयितुं सर्वजगत्कारणस्य विज्ञानमेव कार्यविज्ञानायालमिति मत्वा परमात्मविज्ञानस्योपदेशः कृतः स चायमुपदेशस्तदैव सफलो भविष्यति यदि सर्वविकारजातस्य परमात्मैव कारणं भवेत्, सर्वकारणे परमात्मनि विज्ञाते सर्वमिदं विज्ञातं स्यात् यतः सर्वकार्यजातस्य कारणीभूत परमात्मनि विज्ञाते तत्कार्यमनायासे नैव विदितं स्यात् । यदि कदाचित् प्रधानकारणवादोऽभ्युपगम्येत तदा सर्वविज्ञानप्रतिज्ञा कथमप्युपपादिता न स्यात्, यतः प्रधानस्य जड़कार्य जनकत्वेन प्रधान विज्ञाने जाते तत्कार्ये जड़वस्तुनि कथं कथमपि विज्ञातेऽपि चेतनलक्षणकार्यं प्रति प्रधानस्याकारणत्वेन प्रधानविज्ञाने जातेऽपि चेतनलक्षणकार्यं नैव विज्ञातं भवेदिति न प्रधानं जगत्कारणसत्पदवाच्यमपितु परमात्मैव सत्पदवाच्य इति वृत्ति ग्रन्थस्याक्षरार्थः । भावार्थस्तु प्रकरणस्येत्थं श्रोपुरुषोत्तमाचार्यकृता

कारण पक्ष में विरुद्ध हो जाता है क्यों कि कारणविज्ञान से ही तो कार्य का विज्ञान होगा चेतन जोवसमूह का कारण अचेतन प्रधान नहीं हो सकता है अतः चेतन वर्ग लक्षण जो कार्य है तादृश चेतन कार्य के प्रति जड़ात्मक प्रधान को कारणता नहीं है इसलिए सत्पद का वाच्य प्रधान नहीं है, किन्तु सूक्ष्मचिदचिद्विशिष्ट परमात्मा है वही "यतो वा" इत्यादि श्रुति बोधित सकल जगत् का जो कि चेतनाचेतन लक्षण है कारण है और तादृश परमात्मा ही सत्पद का वाच्य है ऐसा मानने से स्थूल जड चेतन परिदृश्यमान सकल कार्य का विज्ञान परमविज्ञान होने से हो जाता है। इस प्रकार से एक विज्ञान से सर्व विज्ञान की प्रतिज्ञा चेतन कारण वादमें समर्थिता होती है। अचेतन कारणवाद में पूर्व प्रतिज्ञा का बाध हो जाता है अतः सत्पदवाच्य प्रधान नहीं है । १।१।९।

स्वाप्ययात् ॥१।१।१०॥

"स्वप्नान्तं मे सोम्य विजानीहीति यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति" (छा. ६।८।१) अत्र सुषुप्तस्य जीवस्य सता संपत्तिर्लयो बोध्यते स च लयः स्वकारण एव भवति। यद्युक्तकारणवाक्ये सच्छब्देन प्रधानं गृह्येत तर्हि तत्रैव जीव

श्री बोधायनवृत्तितत्सारप्रमीताक्षरादिवृत्तिसंग्राहकजगद्गुरु श्रीरामानन्दाचार्यानन्दभाष्यकारादयः प्राचीनाचार्याः विवेचयन्ति। तथा हि छान्दोग्य श्रुतौ 'उततमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतं भवतीत्यत्र सर्वकारणविज्ञानेन तदीय कार्यस्य विज्ञानं भवतीत्याकारिका सर्वविज्ञानविषयिणी या प्रतिज्ञा विद्यते, सा प्रतिज्ञा स्वातन्त्र्येण प्रधानस्य कारणत्वे स्वीक्रियमाणे समुपरुद्धा स्यात्, यतः प्रधानस्याचेतनतया चेतनाचेतनात्मककार्यजातस्य तादृशप्रधानविज्ञानेन विज्ञानं न स्यात्, कारणविज्ञानस्यैव कार्यविज्ञानजनकत्वात्, प्रधानं तु न जगतः स्थावरजङ्गमस्य कारणं तत्तु जड़वर्गस्यैव कारणं न तु चेतनस्येति, चेतनसंमिलितकार्यस्य प्रधानविज्ञानेन विज्ञानाभावात्। सर्ववस्तु विषयिण्याः प्रतिज्ञाया विरोधः स्पष्ट एव भवेदिति। यदा तु सूक्ष्म चिदचिद्विशिष्टस्य परमात्मनः "यतो वा इमानि भूतानि जायन्ते" इत्यादि श्रुतिसमधिगतस्य जगत्कारणताऽभ्युपगम्यते तदा सत्पदवाच्यतया तस्यैव परिग्रहात् तादृश परमात्मविज्ञाने जाते स्थूल रूपेण परिदृश्यमानं सर्वमिदं जड़चेतनात्मकं कार्यरूपं सर्वं जगत् विज्ञातमेव भवतीति सा प्रतिज्ञा सम्यगुपपादिता भवतीति सर्वं समञ्जसं भवतीति संक्षेपः।१।१।९।

सारबोधिनी :—स्वप्नान्तामित्यादि वृत्तिः। हे सौम्य श्वेत केतु, मैं कहता हूँ स्वप्नान्त अर्थात मैं सुषुप्त्यवस्था का कथन करता हूँ तुम इस विषय को सावधान होकर के समझो जिस अवस्था में यह जीव पुरुष सुषुप्त

स्यलयोऽपि स्वीकार्यः । न चैवं संभवति, न ह्यचेतने प्रधाने चेतनस्य-लयः कैरप्यङ्गीक्रियते । तस्मान्नात्र प्रधानस्य ग्रहणम् ॥१०॥

विवरणम्–किञ्च जगत्कारणं प्रक्रम्य स्वपितीत्यस्य निर्वचनं कुर्वती श्रुतिश्चेतनमेव जगत्कारणं प्रदर्शयति न त्वचेतनं जगतः कारणं समर्पयति । यदि कदाचित् स्वशब्दः आत्मपरकस्तदापि चेतनस्य पुरुषस्याचेतनप्रधानस्य स्वरूपत्वस्यानुपपत्तिः । यदि कदाचिदात्मीय वचनः स्व शब्दस्तथापि अचेतने भोगापवर्गतयात्मीयेपि चेतन जोवस्य प्रलयोऽनुपपन्न एव, नहि मृत्तिका स्वरूपोऽपि घट आत्मीयेऽपि जलादौ प्रलीयमानो भवति किन्तु स्वतादात्म्यमृत्तिकायामेव लीयमानो भवन् दृश्यते इत्याद्याशयं मनसि निधाय स्वाप्ययादिति सूत्रमवतारयितुमाह वृत्तिकारः "स्वप्नान्तं मे सोम्य विजानी ही" त्यादि । (हे सोम्य श्वेतकेतो मे मम सकाशात् स्वप्नान्तं सुषुप्तिम्, अर्थात् सुषुप्तेः स्वरूपं ज्ञातुं सावधानो भव । अहं सुषुप्तिस्वरुपान्ते कथयामि, बदतो मे तत्स्व रूपं विजानीहि–अवगच्छ यत्र यस्यामवस्थायामयं पुरुषो जीवः स्वपिति इत्येवं रूपेण ख्यातो भवति । तदा तस्मिन् काले सता परमात्मना सह संपन्नो भवति । अर्थात् विहायनामरूपात्मकमुपाधिं स्वकारणरूपे परमा-

होता है, तब हे सोम्य, यह जीवात्मा सत्पदवाच्य सकल जगत् कारण जो परमात्मा, उसके साथ संपन्न हो जाता है अर्थात् जीव के निमित्त तथा उपादान कारण परमात्मा जो सर्व शक्तिमान है उसमें जीव विलीन हो जाता है जैसे आकाश से वृष्टि द्वारा समुद्र में गिरा हुआ जल समुद्रात्मक जलराशि में विलीन हो जाता है । तब यह मेघ का जल है, यह समुद्र का जल है एतादृश विभाग को छोड़कर के जलमात्र हो जाता है, इसी प्रकार जोव जाग्रदादिकालिक समस्त उपाधि को छोड़करके चेतन रूपसे भगवदाकारस्वरूप से परमात्मा में ओत प्रोत हो जाता है । स्वमपीतो भवति, स्वकीय स्वरूप को संप्राप्त हो जाता है अर्थात् परमात्मा से भिन्न

त्मनि चिदचिद्वपुषि विलीयमानो भवति। स्वमपीतो भवति अर्थात् जाग्रदाद्यवस्थासंपादितं खेदं विहाय स्वकारणीभूते सर्वात्मके परमात्मनि विलीयमानो भवति यथा नद्यादीनां जलानि नद्याद्युपाधि विहाय समुद्रे सर्वजलकारणात्मके विलीयमानानि भवन्तीति अत्र श्रुतौ सुषुप्तस्य सुषुप्त्यवस्थां प्राप्तस्य जीवस्य धर्माधर्मपूर्ववासनादि युक्तस्य जीवराशेः सत्तां समस्तचिदचित्स्वरूपवता ब्रह्मणा अर्थात् सकल कारणे परमात्मनि प्रलयः संपत्ति लक्षणो बोध्यते प्रज्ञाप्यते श्रुत्याः स च लयः, स्वकारणे एव भवति, यथा विनाशसमये घटः स्वसमवायि कारणकपाले एव विलीयमानो भवति। न तु स्वनिमित्ते दण्डादौ तदन्यत्र वा काष्ठ कुड्यादौ, अर्थात् घटप्रध्वंसो घटसमवायिकारणे एव भवति। न तु अकारणे कारणे वा तदन्यत्र प्रध्वंसो विलीयमानो भवन्दृष्टो युक्तिसिद्धो वा। तथैव जीवोपि सुषुप्तावस्था-

जीवों की कोई स्वतन्त्र अन्य सत्ता नहीं हैं। जाग्रदादिक में जो प्रतिभास होता है उन सब को छोड़कर के वास्तविक जो अपना अणु चेतन स्वरूप है उसको प्राप्त कर जाता है। अत्र सुषुप्तस्येत्यादि इस उदाहृत श्रुति से सुषुप्ति दशापन्न जीव को परमात्मा में संपत्ति अर्थात् लय बोधित होता है। इन कार्यों का लय स्वकीय कारण में ही होता है, जैसे मृत्प्रकृतिक जो घट है वह मृत्तिका में ही लीयमान होता है न कि मृदतिरिक्त जलादिक में (नैयायिक लोग भी घटादि कार्य के विनाश को घटका जो समवायी देश कपाल है उसीमें घटके ध्वंस को मानते हैं)। अब यदि कदाचिद् उपर्युक्त कारण वाक्य में प्रधानकारणवादी के श्रद्धा का अनुरोध करके सत्पद से प्रधान का ग्रहण करें तब तो उपादान भूत प्रधान में ही जीवका विलय सुषुप्ति अवस्था में होता है, ऐसा मानना पड़ेगा। परन्तु यह तो संभवित नहीं है क्योंकि अचेतन प्रधान में चेतनजीव का लय होता है ऐसा तो कोई भी नहीं मानते हैं। यद्यपि सांख्यवादी प्रलय में प्रधान में लय को मानते

यां सर्वकारणकारणे चिदचिच्छरीरके परमात्मनि प्रलीयमानो भवति ॥
"यद्युक्त कारण वाक्ये" इत्यादि, यदि कादाचित् पूर्वोदीरित कारणवाक्ये सत्पदेनाचेतनस्य प्रधानस्य ग्रहणं कुर्यात् तर्हि तदा तस्मिन् जड़ात्मके प्रधाने एव चेतन जीवस्य लयोपि स्वीक्रियेत , परन्तु एवं तु न संभवति यतः उत्पत्तिस्थितिप्रलयास्वसमवायि कारण एव भवन्तीति नियमात् प्रधाने चेतनजीवस्य प्रलयः प्रधानकारणवादिभिरपि न स्वीकृत स्तदा तदन्यदार्शनिकानां तु कथैव का । स्वोपादान कारणे एव कार्य प्रलयस्य सर्वैरेव स्वीकारात् । तदेवोपादानस्योपादानत्वं यत् कार्यस्योत्पत्तिस्थितिप्रलयसंपादकत्वम् । न ह्यन्यस्मादन्यस्योत्पत्तिस्थिति प्रलयाः संभवन्ति तथात्वे उपादानोपादेयव्यवस्थैव न कथमपि साधयितुं कोऽपि शक्तः स्यादिति कार्यकारणभावान्यथानुपपत्तिलक्षणान्यथानुपपत्तिरेव शरणं भवन्तो साधयति स्वोपादाने एव स्वकीय कार्यस्य प्रलयम् । इदानीं प्रकरणार्थमुपसंहरन्नाह "तस्मान्नात्र प्रधानस्य ग्रहणमिति" पूर्वोक्तनुपपत्तिभिरेतत् सिद्धं यत् कारणवाक्ये सत्पदेन प्रधानस्य ग्रहणं न भवति किन्तु चिदचिच्छरीरकस्य सर्वजगदुपादानस्य परमात्मन एव ग्रहणं कर्तव्यं न तु तदन्यस्य कस्यचिदिति संक्षेपः ॥१।१।१०॥

हैं तथापि वे लोग भी जड़भूत प्रपंच को ही प्रधान में प्रलय मानते हैं न कि जीव के प्रलय को। और युक्ति से तथा अन्य प्रमाणों से भी चेतन का प्रलय होता है सो बाधित है। जैसे कार्य स्वोत्पत्तिरूपस्थिति में स्वकीय सजातीय कारण का ही मुखापेक्षी होता है, उसी प्रकार प्रत्येक कार्य पदार्थ प्रलय के लिये उपादान का ही मुखापेक्षी बनता है। जैसे घट का जब प्रध्वंस होता है तब कपाल में ही होता है। उसी प्रकार चेतन जीव समूह जब लीयमान होगा तब परमात्मा में ही सायुज्यता को प्राप्त होगा, क्यों कि परमात्मा ही चेतन जीवसमूह का उपादान कारण है यह श्रुतिस्मृति-युक्ति

गतिसामान्यात् ॥१।१।११।

उपनिषदन्तरान्तर्गतानां कारणप्रतिपादकवाक्यानाम् "यतो वा इमानि भूतानि जायन्ते" (तै. ३।१) "तस्माद्वा एतस्मादात्मन आकाशः

विवरणम्—ननु यथाऽन्य दार्शनिकानां मते मूलकारणविषये परस्परं भेदो दृश्यते यथा नैयायिकमते जगतो मूलकारणं चतुर्विधाः पृथिव्यादि परमाणवो जगतः समवायिकारणम्। सांख्यमते आनुमानिकमव्यक्तापरपर्यायं प्रधानं प्रकृतिरेव जगत उपादानं कारणम्। सौत्रान्तिकवैभाषिकमते खरस्निग्धोष्णेरणस्वभावाश्चतुर्विधा परमाणव एव मूलम्। योगाचारमते आन्तरं विज्ञानधातुरेव परमकारणम्। माध्यमिकमते तुच्छानुपाख्या अभाव एव कारणम्। एकमतं व्युदस्यापरे स्वमतं व्यवस्थापयन्ति, नैवं वेदान्तमते कारणविषये परस्परं विवादं विद्यते। यद्यप्यस्मिन् मतेऽपि परस्परं विवदन्ति, यथा निर्विशेषपरं ब्रह्म जगत् कारणमिति मायावादिनः, सविशेषमनन्तकल्याणगुणगणकं ब्रह्मैव सर्वोपादानमिति "तस्मादत्र सत्पद्वाच्यस्य परमात्मन एव जगत् कारणत्वम्" (आनन्दभाष्य १।१।१२) इत्युक्तदिशा आनन्दभाष्यकार-जगद्गुरु श्री रामानन्दाचार्यमतानुयायिनः। तदेव सविशेषं ब्रह्मेति केचित् अविकृत परिणामकं तत्वमेवेत्यन्ये। एवं क्रमेण वेदान्तमतेऽपि सगोत्र कलहः श्रूयते एव। तथापि वेदान्त मतेषु चेतनस्यात्मनो जगत् कारणतायां नास्ति विवादो यतस्ते सर्वेऽपिचेतनतत्वमेव जगतोऽभिन्न

और अनुभवसे सिद्ध है। सूत्रार्थ का उपसंहार करते हुवे कहते हैं तस्मान्नात्र प्रधानस्य ग्रहणमिति। सुषुप्तावस्था में जीवका प्रविलय परमात्मामें ही होता है जडादिक अन्य वस्तु में नहीं इसलिये सदेवे त्यादि अनेक कारण वाक्यों में सत्पदवाच्य परमात्मा का ही ग्रहण होता है न कि प्रधान का क्योंकि प्रधान यदि सत्पदवाच्य हो तब तो जीव का प्रविलय भी प्रधान में ही कहना पडेगा, परन्तु प्रधान अचेतन में चेतन जीव का प्रविलय तो वादि प्रसिद्धि श्रुति-स्मृत्यादि से बाधित है ॥१०॥

संभूतः" (तै. २।१) "सकारणं करणाधिपाधिपः" (श्वे. ६।९) आत्मा वा इदमेक एवाग्र आसीत्स इमान् लोकानसृजत" (ऐ. १।१) इत्यादीनां जगत्कारणतया ब्रह्मण एव प्रतिपादने गतिरस्ति तत्सामान्यादत्रापि सत्पदवाच्यं ब्रह्मैवास्ति न प्रधानम् ॥११॥

निमित्तोपादानमिति संगि॰न्ति । यथा सर्वेषां चक्षुः रूपप्रकाशात्मकमेव कार्यं करोति, न तु कस्यचिद्रूपं र॰ं वा । एवमत्र सर्वे वेदान्ताश्चेतनकारणतामेव दर्शयन्ति न तु कश्चिद्वेदान्तः आत्मानं कारणं व॰ति कश्चित् तदितरं कारणं कथयतीति कारणविषये सर्ववेदान्तानां मतैक्यं दर्शयितुं सूत्रमुपस्थापयन्नाह "उपनिषदन्तर्गताना" मित्यादि । छान्दोग्य श्रुति प्रतिपादितकारणप्रतिपादकवाक्यातिरिक्तवेदान्तवाक्यानाम् 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति" (इमानि स्थूल चिदचिदात्मकपरिदृश्यमानानि वस्तूनि, यतो यस्मात् कारणविशे

सारबोधिनी- जिस प्रकार चक्षु प्रमाण रूपदर्शनलक्षणकार्य का संपादन करता है समान रूपसे परस्पर विभागरूपसे नहीं। इसी प्रकार सब वेदान्त वाक्य चेतन परमात्मा को ही जगत्कारणता का प्रकाशन करता है न कि कोई वेदान्त वाक्य ब्रह्म को जगत् का कारण कहता है तो कोई वेदान्त वाक्य चेतनेतर प्रधानादि को जगत् कारण रूपसे प्रतिपादन करता है। इस चेतन कारणता वाद में किसी को भी परस्पर वैमत्य नहीं है। जिस तरह तार्किकों के मतों में कोई तो भाव का जगत् का कारण कहते है, तो कोई अभाव को कारण कहते हैं। भाव कारणता वादियों के मध्यमें भी कोई चेतन को कारण कहते हैं, तो कोई अचेतन को कारण कहते हैं। अचेतन कारण वाद में भी कोई प्रधान को परमेश्वराधिष्ठित रूप से कारण कहते हैं तो कोई चेतन निरपेक्ष स्वतंत्र प्रधान को कारण कहते हैं। कोई तो पृथिव्यादि स्पर्शरसगन्धोष्णइरण स्वाभाविक परस्पर विभिन्न परमाणुओं को पृथिव्यादि जगत् का कारण कहते हैं। कोई तो जीव को उत्पत्ति मान लेते

षाच्चेतनाज्जायमानानि भवन्ति, उत्पद्य च यस्मिन् चेतनरूपे सर्वे कारणे स्थितानि भवन्ति, पुनश्च प्रतिसर्गकाले स्वकारणोन्मुखानि सर्व-समर्थचेतनात्मककारणे प्रलीयमानानि भवन्ति नामरूपविभागानर्हतां प्राप्नुवन्तीत्यर्थः तादृशं कारणं चेतनमेवेति)। "तस्माद्वा एत-स्मात्मन आकाशः संभूतः" "(सर्वकारणतया प्रसिद्धादात्मनः सका-शात् प्रथमत आकाशः संभूतः समुत्पन्नो ज्ञातस्तदनु च पवनादिकानि वनस्पतिपर्यन्तानि समभवन् इत्यर्थः)। "स कारणं करणा धिपधिपः "(स षडैश्वर्यसंपुक्त सर्वेश्वरः सर्वसमर्थश्च ब्रह्मपदवाच्यः श्रीरामः सर्वचे-तनाचेतनजगतः कारणम् तथा करणमिन्द्रियादीनां योऽधिपो ऽधि-ष्ठातृदेवतास्तेषां सर्वेषामप्यधिपः सर्वनियन्ता यः स एव सर्वजगतः कारणमिति वाक्य शेषः) "आत्मा वा इदमेक एवाग्र आसीत् स इमा-ल्लोकान सृजत" (इदं परिदृश्यमानं स्थावरजंगमात्मकं जगत् अग्रे उत्पत्तेः पूर्वकाले आत्मा परमात्मा कारणतादात्म्यापन्नं सूक्ष्मरूपेण चेतने एव वीजे लीयमान अविभक्तनामरूपावस्थ वृक्षवदेवाभूत्, तदनन्तरं स परमात्मा इमान् भूरादिकान लोकान् असृजत यथा वीजे विद्यमानो-ऽनभिव्यक्तनामरूपको वृक्षः कालेन वीजात् अभिव्यक्त विभक्त

हैं तो कोई जीव को नित्यानुत्पन्न मानते हैं। इत्यादि परस्पर विवाद ग्रस्त मार्ग का निराकरण करने के अभिप्राय से तथा एक मार्ग का प्रकाशन करने के अभिप्राय से वृतिकार सूत्र का उत्थान करते हैं गतिसामान्यादिति।

छान्दोग्य उपनिषद् से भिन्न जो उपनिषत् तादृशोपनिषत् के अन्तर्गत जो ब्रह्म में जगत् कारणता का प्रतिपादक वाक्य है, जैसे "यतो वा इमानि भूतानि जायन्ते" (जिस सर्वेश्वर सर्वशक्तिमान् परमात्मा से ये परिदृश्यमान आकाशादि पृथिव्यन्त भूतों की उत्पत्ति स्थिति प्रलय होता है)। "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" उस सर्वशक्तिमान् सर्वज्ञ अनेक कल्याण गुणक परमात्मा से सर्व प्रथम भूतपदवाच्य आकाश उत्पन्न हुआ। आकाश

नाम रूपकः सन् समुत्पन्न इति व्यवह्रियते तथैव परमात्मन्यव्यक्तनामरूपकं जगत् विभक्त नामरूपकं भवन्नानाव्यवहारापन्नमांलक्ष्यते, अर्थात् सूक्ष्मचिदचिद् रूपेण परमात्मनि विद्यमानस्य लोकस्य स्थूल रूपेणव्यञ्जयदिति । इत्यादि वेदान्त वाक्यानां चेतनाचेतन जगत् कारणत्वेन ब्रह्मणः सर्वोत्पादकस्य परमकारणस्य सर्वेश्वर प्रतिपादने एवाभिप्रायो विद्यते । एवञ्च यथा प्रदर्शितानि नाना वेदान्तवाक्यानि जगत् कारणतया आत्मानमेव बोधयन्ति । तथैव "सदेवे" त्यादि छान्दोग्य वाक्यमपि परमात्मान एव जगत् कारणता बोधयतीति कारणप्रतिपादकवाक्ये सत्पदेन परमात्मन एव ग्रहणं भवति नत्वचेतनप्रधानादीनां परपरिकल्पितानां ग्रहणं भवतीति वृत्तेरक्षरार्थः ।

अयंभावः सांख्यपरिकल्पितप्रधानस्य जगत् कारणता नास्ति न वा कारणवाक्यघटकसत्पदबोध्यता विद्यते, एतद्रूपेण प्रवर्तमाने विचारे यादृश वाक्येषु स्पष्टरूपेणात्मनः कारणता बोधिता भवति तादृश वाक्य तुल्यत्वमेव सदादि वाक्यानामपीत्यस्मिन्नर्थेऽन्येषामपि वेदान्तवाक्यानां संमतिं दर्शयितुं प्रोक्तवान् सूत्रकारः गतिसामान्या-

से वायु, वायु से तेज, तेज से जल, जल से पृथिवी जो कि गन्ध का आधार है। तादृश पृथिवी से औषधि, वनस्पति, समुत्पन्न हुये। स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता नचाधिपः। वह सर्वशक्तिमान् परमात्मा उत्पद्यमान स्थूलसूक्ष्म स्थावर जंगम सब पदार्थों का कारण अर्थात् अभिन्नोत्पादन रूपसे उत्पादक है, तथा करण जो बाह्य चक्षुरादिक एवं आन्तर कारण जो मन, तादृश करणों का अधिप नियंता जो जीववर्ग उन वर्गों का अधिप नियन्ता है पर जिसका उत्पादक व नियन्ता कोई नहीं है "य आत्मनि तिष्ठन् आत्मानमन्तरो यस्यात्मा शरीरं य आत्मानमन्तरो यमयति इत्यादि श्रुतियों से सिद्ध होता है कि वह परमात्मा जीव का भी नियन्ता है उस परमात्मा का जनयिता उत्पादक कोई नहीं उस परमात्मा का कोई

दितिसूत्रम् । यानि यानि वेदान्त वाक्यानि सन्ति तेषु सर्वेष्वपि चेतनस्य परमात्मनः सविशेषस्यैव कारणत्वं समुच्यमानं भवति । न तु कुत्रचिदपि वाक्ये प्रधानस्य तदतिरिक्तस्य वान्यस्य कारणत्वमुच्यमानं भवति यदि कदाचिदत्र सद्विद्याप्रकरणे सत्पदवाच्यं प्रधानमेव जगत्कारणतयाऽभिमतमुच्यमानं भवेत्तदा प्रधानादिभिन्नात्मपद बोध्य ब्रह्मणो जगत्कारणता प्रतिपादकागमानामनेकेषां स्पष्टैव वैयर्थ्यम् । तथैकार्थप्रतिपादकतालक्षणमेकवाक्यत्वमपि तेषां न स्यात् । ते चात्मनः कारणता प्रतिपादका इमे वेदनिचयाः । "आत्मा वा इदमेकः" "आत्मान एवेदं सर्वम्" "तस्माद्वा एतस्मादात्मनः" आत्मन एष प्राणः" इत्यादयः । एतेषां वाक्यानां गतिश्चेतनकारणता समर्पणः प्रकारः, तादृशी एव गतिश्चेतन कारणता समर्पण प्रकारः सदेव सोम्येदमित्यादि छान्दोग्यवाक्यघटकपदानामपि । न तु सांख्यादिकल्पिताचेतन प्रधान

अधियन्ता नहीं है वह परमात्मा सबको जानता है उस परमात्मा को कोई नहीं जानता है, जो आत्मा में रहता हुआ भी उससे भिन्न तथा आत्मशरीर होते हुये भी तद्भिन्न रूप से उसको नियंत्रित करता है। आत्मा वा इदमेक अग्रे आसीत्स इमांल्लोकान् सृजत ॥" यह परिदृश्यमान संपूर्ण जगत् उत्पत्ति के पूर्वकाल में परमात्मा स्वरूप से ही अवस्थित था। उस परमात्मा ने इन भूर्भुवः स्व महः जनः इत्यादि लोकों का उत्पादन किया)। इत्यादि अनेक प्रकार के अन्यश्रुतियों का जगत् कारण रूप से परमब्रह्म परमात्मा के प्रतिपादन करने में गति हैं। उन श्रुत्यन्तरों की समानता होने से यह जो छान्दोग्य श्रुति में सदेव सोम्येदमग्र आसीत् वाक्य है तटद्घक सत्पद से वाच्य ब्रह्म परमात्मा ही है। किन्तु सांख्य परिकल्पित आनुमानिक प्रधान नहीं है क्योंकि यदि प्रधान में जगत् कारणता है, यह बात यदि श्रुति को अभिमत होता तो उत्पत्ति प्रकरण में उत्पादक रूप से अवश्यमेव चर्चा की

कारणता समर्पकत्वमन्यमतमिवेति । इदमेव वैशिष्ट्यं दर्शनान्तरेभ्यो वेदान्तस्य यत्, सर्वत्र परमात्मकारणता बोधकत्वं समानमेव, न तु बौद्धादिवत् पृथक् पृथक् रूपेण क्वचिच् चेतनस्य, क्वचिद चेतनस्य तत्रापि क्वचित्प्रधानस्य क्वचित्परमाण्वादेः क्वचिद् भावस्येत्यादि क्रमेण परस्पराहतार्थकत्वं वेदान्ते । अत्र तु कारणता बोधकत्वं समान रूपेण चेतनस्यैव तत्समर्थनं समर्थ्यमानश्च भवतीति । यद्यपीहापि क्वचित् केचित् निर्विशेषमात्मानं कारणं कथयन्ति क्वचित्केचिच्च सविशेषमेवात्मानं प्रतिपादयन्ति, तथापि

जाती, परन्तु श्रुति में तो इस बात की कहीं भी चर्चा नहीं की गई है इसलिए प्रधान को सदेवेत्यादि, वाक्य घटक सत्पद के कारण रूप से ग्रहण करना समुचित नहीं है । यद्यपि, अस्मान्मायी सृजते विश्वमेतत् , इत्यादि स्थल में मायी के विशेषण रूप से प्रधान का अपर पर्याय माया की चर्चा है, तथापि उससे यह नहीं सिद्ध होता है कि स्वतंत्र रूप से प्रधान में जगत् कारणता आती है । विशेष्य में रहने वाला पदार्थ कथंचित् गौणरूप से ही कारण पद से व्यवह्रियमाण होता है । तथा मायी को उद्देश्य करके जगत्कारणता का विधान किया गया है ऐसा मानने से एक देशान्वय है किन्तु पदार्थ का अन्वय पदार्थ में ही होता है । पदार्थ के एक देश में नहीं, यथा कथंचित् विशिष्ट में कारणता होने से विशेषण में भी कारणता होगी, यह कथन जघन्यवृत्ति को लेता है मुख्य वृत्ति को नहीं अर्थात् स्वातंत्र्य रूप से कारणता नहीं है किन्तु यथा कथंचित् गौण रूप से ही सिद्ध होता है और यह प्रकरण मुख्य वृत्ति से कारणता का प्रतिपादक है । परमात्मा में तो मुख्य रूप से ही जगत कारणता अनेक कारण वाक्य प्रतिपादन करता है । यदि कोई कहे कि आत्मा शब्द तो अनात्म पदार्थ में भी प्रयुज्यमान होता है "यथा ममात्मायं पुत्रः," "आत्मानं सततं रक्षेत्," "मृतात्मा इन्द्रियात्मा," यहां पुत्र शरीरभूत

श्रुतीनां सर्वासामेकवाक्यता समर्थनं तु

"अद्वैत बोधिका काश्चित्काश्चिद्द्वैतस्य बोधिकाः।
घटकश्रुतयः काश्चिदन्तर्यामि प्रबोधिकाः॥
अप्रामाण्यं भवेत्तासां विरोधेऽभिमते मिथः।
विशिष्टाद्वैतिभिस्तासां क्रियतेऽतः समन्वयः॥
अद्वैतश्रुतयो वोध्याविशिष्टब्रह्म बोधिकाः।
नान्य श्रुतिमतानां हि तत्त्वानां प्रतिषेधिकाः॥
परं ब्रह्म च तद्वाच्यं त्वद्वाच्यं त्वच्छरीरकम्।
तत्त्वमसीति वाक्येन तूक्तोऽभेदस्तयोर्द्वयोः॥
द्वैतश्रुतिसमूहस्तु त्रिद्वद्भिः सम्मतः खलु।
चिदचिदीशतत्त्वानां पार्थक्येनावबोधकः॥
आत्मत्वमीश्वरस्याथ चिदचितोश्च देहता।

इन्द्रिय में जो कि ये सब पुत्रादिक अनात्मा हैं, तो इन अनात्म पदार्थ में आत्मा शब्द का प्रयोग होता है। तद्वत् प्रकृत में भी अनात्म प्रधान में आत्म शब्द का प्रयोग श्रुत्यनुमोदित है, अतः प्रधानता होगी ऐसा कहना ठीक नहीं है, क्योंकि उदाहृत पुत्रादिक में जो आत्म शब्द का प्रयोग है मुख्यतः ही है। अन्यथा आत्मापद को अनेकार्थकत्व लक्षण दोष हो जायगा। यदि एकार्थ का तात्पर्य निश्चयात्मक हो, तब अनेकार्थता की कल्पना जघन्य है। एवं "स आत्मा तत्त्वमसि श्वेतकेतो" यहाँ चेतना जो श्वेत केतु शिष्य है उसका चिदचित् शरीरक आत्मपद वाच्य कोई अचेतन पदार्थ आत्मा कथंचिदपि नहीं हो सकता है। इसलिये अनेक श्रुति युक्ति प्रमाणों से सिद्ध होता है कि आत्मपद का वाच्य चेतन ही है न कि अचेतन कोई पदार्थ। अतः सदेवेत्यादि वाक्य घटक सत्पद वाच्य परमात्मा सर्वेश्वर श्रीराम जी ही समस्त जगत् का परम मूल कारण हैं न कि प्रधान परमाणु-अभ वादिक अन्य॥११॥

"श्रुतत्वाच्च" १।१।१२॥

अत्र सद्विद्यायायां सत्पदवाच्यस्यैवोत्तरत्रात्मत्वेन श्रवणमस्ति "स आत्मा तत्वमसि श्वेतकेतो" (छा.६।९।३) "आत्मात एवेदं

सर्वाभिर्विनिवेद्यते घटकश्रुतिभिः किल ॥
वेदान्त तत्त्वविद्भिश्च कार्यकारणभेदतः ।
चिदचिद्भ्यां विशिष्टं हि ब्रह्म च द्विविधं मतम् ॥
स्थूलाचिच्चिद्विशिष्टं हि ब्रह्म कार्यं प्रकीर्तितम् ।
सूक्ष्माचिच्चिद्विशिष्टं तु ब्रह्म कारणमुच्यते ॥
अद्वैतञ्च मतं श्रौतं ब्रह्मणोश्च विशिष्टयोः ।
विशिष्टाद्वैतसिद्धान्त स्तस्माच्छ्रुत्यनुमोदितः ॥
अत एवास्मदाचार्यबोधायनादिसम्मतः ।
विशिष्टाद्वैतसिद्धान्तो लोके विजयेततराम् ॥"

इत्यादिक रूपेण जगद्गुरुश्रीश्रुतानन्दाचार्य प्रसादित सर्वश्रुतिसमन्वयतः स्पष्टं व्यज्यते इति सविशेष ब्रह्मकारणता प्रतिपादकत्वमेवेतिनिराबाध आनन्दभाष्यकारजगद्गुरु श्रीरामानन्दाचार्यप्र शितः पन्थाः ॥१।१।११।

विवरणम्—ननु "तदैक्षत" इति श्रुतौ यज्जगतः कारणमीक्षण श्रुतम्, परन्तु तदीक्षणं सर्वविषयकं यत्किंचिद्विषयकं वेति स्पष्टरूपेण न निर्धारितम्; किन्तु जगत्कारणसंबन्धितया तदीक्षणं सर्वविषयकमित्यर्थवशात्सं-पन्नं भवतीत्यतो न केवलं सर्वविषयकमीक्षणं जगत्कारणमर्थापत्यैवसिद्धं

सारबोधिनी—"तदैक्षत बहुस्यां प्रजायेय" इत्यादि श्रुति में जो जगत् का कारण है तदश जगत् कारण में ईक्षण श्रवण है, परन्तु वह ईक्षण सर्व विषयक है अथवा 'यत्किंचित् विषयक ईक्षण है, इस प्रकार से स्पष्ट रूप से नहीं कुछ कहा गया, किन्तु जगत्कारण

सर्वम्" (छा-७।२६।१) इत्यतोऽत्र सत्पदवाच्यः परमात्मैव जगत्कारणं न प्रधानमिति सिद्धम् ॥१२॥

॥इति श्री रघुवरीयवृत्तावीक्षत्यधिकरणम् ॥५॥

भवत्यपि तु शब्दतोपितत्सिद्धमित्येतद्दर्शयितुं वृत्तिकारः सूत्रोत्थानं करोति "अत्र सद्विद्यायाम्" इत्यादि। अत्र छान्दोग्ये सदेव सोम्येदमग्र आसीदित्यारभ्य या सद्विद्या प्रवृत्ता, तादृश सद्विद्यायां यः सत्पद वाच्यः परमात्मा प्रक्रान्तः, तस्यैव सत्पद वाच्यप्रक्रान्त परमेश्वरस्योपसंहारस्थ वाक्येषु आत्मरूपेण श्रवणमस्ति, "स आत्मा तत्वमसि श्वेतकेतो" हे श्वेतकेतो ! स एव सत्पद वाच्यः परमात्मा तवात्मा, अर्थात् त्वमपि तत्वस्वरूप तदात्मस्वरूप एवेति श्रुत्यर्थः। "आत्मत एवेदं सर्वम् "इदं परिदृश्यमानं स्थूलजंगमस्थावरसाधारणं सर्वं जगत् तादृश परमात्मनः सकाशादेव जातम्। परमात्मनः सर्वमिदं वस्तु शरीररूपत्वात्तदात्मकमेवेति श्रुत्यर्थः। यतोऽग्रे एतद्रूपेण प्रतिपादितम्। अतः सत्पद वाच्यः सर्वजगत्कारणः परमात्मैव। न तु जगतः कारणं सम्बन्धिता रूप से तादृश कारण निष्ठ ईक्षण सर्व विषयक है, इस बात को अर्थापत्त के बल से ही होता है सो नहीं अपितु तादृश सर्व विषयक ईक्षण शब्द द्वारा भी सिद्ध होता है इस बात को बतलाने के लिए वृत्तिकार कहते हैं "अत्र सद्विद्यायामित्यादि' इस सद्विद्या के प्रकरण में जो सत्पद से वाच्य है उस सत्पद वाच्य का अग्रिम प्रकरण में आत्मा रूप से श्रवण है, "स एषोऽणिमा, ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" "आत्मन आकाश, आत्मनस्तेज, आत्मन आपः, आत्मन एवेदं सर्वम्"(आत्मा से आकाश होता है, आत्मा से तेज उत्पन्न होता है और आत्मा से ही यह परिदृश्यमान सब पदार्थ उत्पन्न होते हैं)। इत्यादि स्थल में सत्पद वाच्य जो परमात्मा है वही "सदेव सोम्येदम्" इस वाक्य में प्रतिपादित है तथा तादृश परमात्मा ही सत्पदवाच्य है।

कथमपि प्रधानादिकं भवतीति। यद्यप्यन्यत्र प्राय आक्षेपादेव जगत्कारणता परमात्मनि समर्थिता भवति, तथापि श्वेताश्वेतराणामुपनिषदि "सकारणं करणाधिपाधिप" इत्यत्र तथा "स आत्मा तत्त्वमसि श्वेतकेतो" इत्याद्यनेकस्थले मुखत एव परमेश्वरस्य जगत्कारणत्वं श्राव्यते, न तु तथा मुखतः क्वचिदपि स्थले परकल्पितानुमानिक प्रधानस्य कारणता श्राव्यते। अतः सत्पद वाच्यः परमात्मैव जगतः कारणं न तु प्राधानादिकमिति वृत्तेरक्षरार्थः।

भावार्थस्तु परमात्माशब्देनैव परमात्मा सर्वज्ञः कारणमिति "स कारणं करणाधिपाधिप" इत्यादि श्रुतौ श्रूयते। एवं छान्दोग्यीयसद्विद्या प्रकरणेऽपि सर्वज्ञस्य परमात्मनः साक्षादेव सर्वजगतः कारणता श्रूयते तथाहि "सदेव सोम्येदमग्र आसीदि" ति प्रक्रम्य "तत्तेजोऽसृजत सत्मूलाःसोम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठाः" इति परामृश्य "स एषोऽणिमैतदात्म्यमिदं सर्वं स आत्मा तत्वमसि श्वेतकेतो" इत्यन्तप्रकरणै सांख्य परिकल्पित आनुमानिक जड़ प्रधान सत्पद वाच्य नहीं है, यह सिद्ध होता है। एवं स्व शब्द से ही सर्वज्ञ सर्वशक्तिमान् सर्व नियन्ता परमेश्वर ही स्थावर जंगम सकल जगत् का कारण है, यह बात "य कारणं करणाधिपाधिपो न चास्य कश्चित् जनिता न चाधिपः" (वह परमात्मा इस स्थावर जंगम सकल जगत् का कारण है तथा परमात्मा, कारणक जो इन्द्रियग्राम और कार्यकलेवर उसका अधिप अधिष्ठाता जो जीवात्मा उसका भी अधिप नियन्ता है। ऐसे परमात्मा का उत्पादक कोई नहीं है न वा नियन्ता ही है)" एवं "न तस्यकार्यं करणं च विद्यते नतत्सम श्चाभ्यधिकश्च दृश्यते, परस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञान बल क्रिया च" (उस परमेश्वर का करण कलेवर नहीं है, उस परमेश्वर का सदृश कोई नहीं है, उससे बड़ा कोई देखने में नहीं आता है, इस परमात्मा की शक्ति अति उत्कृष्ट है और स्वाभाविक ज्ञान, क्रिया, तप बल है)" इत्यादि

अथानन्दमयाधिकरणम् ॥६॥

आनन्दमयोऽभ्यासात्॥१।१।१३॥

तैत्तिरीये "तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मानन्दमय एतेनैषः पूर्णः" (तै, २।५।) इति श्रूयते । अत्रानन्दमयः परमात्मा जीवो वेति

रूपसहृत्य समुपदर्श्य च सत्पदवाच्यस्यात्मत्वं सद्रूपस्यात्मनो जगत्स्रष्टृत्वादिका सर्वज्ञत्वसर्वशक्तिमत्वादिका अनेके हेयप्रत्यनीकाः कल्याणगुणाः स्पष्ट रूपेण प्रतिपादिताः। एवमेतस्यामेवोपनिषदि 'आत्मैवेदं सर्वम्' इति प्रक्रम्य "सत्यकामः सत्य संकल्पः सोऽन्वेष्टव्यः सविजिज्ञासितव्यः" इत्यन्त प्रकरणेन स्पष्टमेव सत्पदवाच्यस्यात्मनः सत्यकामत्वसत्यसङ्कल्पादिका अनेके कल्याणगुणात्मकाधर्माः समुपस्थापिताः एतस्मात्कारणात्सत्पदवाच्यसर्वज्ञपरमात्मन एव सर्वजगत्कारणता सिद्ध्यति न तु प्रदर्शित गुण, विरहितस्य प्रधानादेर्जगत्कारणता विभूषयति प्रधानादीनां मस्तकमिति संक्षेपः ।१२।

इति जगद्गुरु श्री रामानन्दाचार्य—रामप्रपन्नाचार्य योगिन्द्रकृतस्य श्रीरघुवरीयवृत्तिविवरणस्येक्षत्यधिकरणम् ।५।

प्रकरण में स्व शब्द से परमेश्वर का कथन किया गया हैं । इसलिये "सदेव सोम्येदमग्रे" इस प्रकरण में सत्पद वाच्य परमात्मा ही है, परन्तु आनुमानिक प्रधान सत्पदवाच्य जगत् का कारण नहीं है, क्यों कि पूर्वापर सकल श्रुतियों का एक वाक्यता करने पर यह भी होता है कि सर्व शक्तिमान् सर्वज्ञ परमात्मा जो कि सब की आत्मा है वही सत्पद से वाच्य चेतन रूप से जगत् का कारण है, किन्तु अचेतन प्रधान अथवा परमाणु प्रभृति जगत् का कारण नहीं है। न वा चेतन भी जीवात्मा अज्ञ होने के कारण सकल जगत् का कारण हैं, अपितु परमात्मा ही सबका कारण है । इतिसारबोधिनी में ईक्षत्यधिकरण १२॥५॥

संशयः। एतद् प्रकरण पठितानामन्नमयादीनां पदार्थानां सङ्गतिर्जीव एव भवति। अतोऽत्रानन्दमय पदेन जीव एवाभिहित इति पूर्व पक्षः। अत्राभिधीयते, इहानन्दमयः परमात्मैव। "रसं ह्येवाय लब्ध्वानन्दी

विवरणम्—सर्वज्ञस्य ब्रह्मणो जिज्ञासा कर्तव्या, तादृशं ब्रह्मजिज्ञासितव्यमिति, "अथातो ब्रह्मजिज्ञासा" इति सूत्रेण प्रतिज्ञातम्। तादृशं ब्रह्मशास्त्र प्रमाणेनैव समधिगतं भवति, शास्त्रञ्च सर्वज्ञसर्वशक्तिविशिष्टे जगदुत्पत्तिस्थितिलयकारणे ब्रह्मण्येव प्रमाणं नत्वचेतने प्रधानादाविति शास्त्रयुक्तिपूर्वकं प्रतिपादितम्। न चास्ति कश्चिद्वेदान्तभागो यो हि, एतद्विपरीतं बोधयेदित्यपि गतिसामान्येन प्रथमसूत्रादारभ्य श्रुतत्वाच्चेत्येतदन्तप्रकरणेन व्युत्पादितमेव। अतः परं वेदान्ते किमपरमवशिष्यते यदर्थमेतदुक्तसूत्राणामवतार इति, शंकां कृत्वा शास्त्रे द्विप्रकारकं ब्रह्म श्रूयते-एक निर्विशेषमपरं सविशेषम् तदत्र कस्य ग्रहणं कर्तव्यं कस्य ग्रहणं न कर्तव्यम्। एवं गुण धर्म भेदेन तदुपासनमपिविधीयते तत्र कस्य ग्रहणं कस्य वा कीदृशमुपासनं विधेयं तादृशोपासनस्य

सारबोधिनी "अथातो ब्रह्मजिज्ञासा" इस सूत्र से लेकरके "श्रुतत्वाच्च" एतत्सूत्र पर्यन्त प्रकरण से सर्वज्ञत्व सर्वशक्तिमत्वादि गुणविशिष्ट सर्वात्मक चेतन ब्रह्म को वेदान्त प्रतिपाद्यत्व बतलाया गया, तथा अचेतन सांख्य परिकल्पित प्रधान को जगत्कारणता का भी प्रतिपादन किया गया, परन्तु एतवता निस्प्रतिपक्ष रूप से ही ब्रह्म में जगत्कारणता का निश्चय नहीं हो सकता है क्योंकि भगवान् की उपासना करने से संप्राप्त सर्वज्ञत्वादि गुण विशिष्ट चेतन जीव भी तो एतादृश गुण विशिष्ट से परिगृहीत हो सकता है, एतादृश किसी की आशंका को लेकरके उस शंका का निराकरण करने के लिए वृत्तिकार प्रक्रम करते हैं "तैत्तिरीये" इत्यादि। तैत्तिरीय उपनिषद् में "तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मानन्दमयस्तेनैष पूर्णः" यह जो विज्ञान मय आत्मा है उससे भिन्न तथा विज्ञानमय की

भवति" (तै२।७।८) "एषह्येवानन्द याति" (तै २।७) "एतमानन्दमय-मात्मानमुपसंक्रामति" (तै।२।८) "आनन्दं ब्रह्मणो विद्वान्" (तै २।९) इत्याद्याग्रिमवाक्येषु आनन्दमयपदस्य परमात्मन्येवाभ्यास दर्शनात्॥१३॥

कीदृशं फलमित्यादि विविधविषयविचारणार्थमुत्तरसूत्राणामवतारः क्रियते इत्याशयं हृदि निधाय तेषु विचारणीयविषयेषु प्रथमत आनन्दमयाधिकरणमुत्थाय वृत्तिकारः प्राह "तैत्तरीय" इत्यादि। तैन्तिरीयाणामुपनिषदि अन्नमय प्राणमय मनोमय विज्ञानमय पर्यन्तमनुक्रम्य तदनु "तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तरः आत्मा, आनन्दमयस्तेनैषः पूर्णः" तस्मात् पूर्वोक्तादन्नमयादित आरभ्य एतस्मात् विज्ञानमय पदवाच्यादपि अन्योभिन्नस्तथा एतेभ्यो अन्तरः सूक्ष्म आनन्दमयः कश्चनात्मा तेनैषो विज्ञानमयः पूर्ण इति श्रुत्यर्थः। एवं खलु श्रूयते तैत्तरीयकप्रकरणे। तत्र मयट् प्रत्ययस्य विकारोऽर्थः प्राचुर्य्योपि, तदिह किं विकार प्रायो जीवो वा आनन्दमयपदवाच्यः, आनन्द प्रचुरः परमात्मा वा आन-अपेक्षा से आन्तर एक आनन्दमय है, उस आनन्द से यह विज्ञानमय पूर्ण है" ऐसा सुनने में आता है। अब सन्देह होता है, कि आनन्दमय शब्द का वाच्य संसार प्राप्त कोई जीव है अथवा सकल जगदाधार भगवान् परमानन्द मय वाच्य है। "एतत्प्रकरण पठितानां"मित्यादि, इस आनन्दमय प्रकरण में परिपठित जो अन्नमय, प्राणमय, मनोमय तथा विज्ञानमय है उन सबका संबन्ध जीव के साथ में है, तब उसी प्रवाह में श्रुत जो आनन्दमय है उसका भी सम्बन्ध संसारी जीव के साथ ही होना चाहिये। यदि कदाचित् अन्नमयादिक का संबन्ध जीव में किया जाय और आनन्दमय का संबन्ध परमात्मा में किया जायतो यह "अर्धजरतीय" न्याय के समान हो जायगा। इसलिये अन्नमयत्वादिक के समान आनन्दमय का भी संबन्ध जीव के साथ ही है परमेश्वर के साथ नहीं है, अर्थात् आनन्दमय शब्द वाच्य परमात्मा नहीं है किन्तु जीव ही है। नहीं कहो कि सर्वापेक्षया आन्तर होने से परमात्मा ही

न्दमयशब्देन प्रतिपाद्यते ? एतादृश रूपेण संशयो जायते। तत-श्चैतत्प्रकरणपठितानन्दमयादिपदार्थानां संगतिर्जीवे एवस्यान्न तु परमात्मनि, तस्मादानन्दमयशब्देन जीव एवोपस्थापितो भवतीति पूर्वपक्षः अर्थादत्रानन्दमय शब्देन जीव एव परिगृहीतो भवति न तु परमा-त्मनो ग्रहणम्। आनन्दमय इति विकारे प्राचुर्ये च मयटस्तुल्यमेव मुख्यार्थत्वमिति विकारार्थकान्नमयादिपदप्राय पाठादानन्दमय पदमपि विकारार्थकमेव युक्तम्। न च प्राणमयादिषु विकारार्थत्वस्यायोगात्स्वा र्थिक एव मयट् प्रत्ययः स्यादिति वाच्यम्! प्राणाद्युपाधि परिच्छिन्नो जीवात्मा भवति प्राणविकार इत्यर्थात्। न च सत्यर्थे स्वार्थिकत्वं मयट् प्रत्ययार्थो युक्तः। चतुर्णामपि कोशानामान्तर इत्यस्मात्कारणादानन्द-मयस्य सर्वान्तरतानोचिता; यतः शारीरो जीव एव प्रियादि योगित्वा त्सर्वान्तरो न तु परमात्मा, तस्य प्रियादिस्पर्शाभावात्। न च सर्वा-

आनन्दमय है जीव नहीं है, ऐसा कहना ठीक नहीं है, क्योंकि यह श्रुति सर्वा-पेक्षया आनन्दमय का प्रतिपादन नहीं करती है किन्तु अन्नमयादि चतुष्टया-पेक्षया आन्तरता का प्रतिपादन करती है। नहीं कहा कि आगे कोई दूसरा नहीं सुना गया है इसलिये यही आनन्दमय सर्वान्तर है, यह कहना भी ठीक नहीं है क्योंकि जिसकी अपेक्षा से जिसमें आन्तरत्व सुना जाता है तदपेक्षया ही वह आन्तर होता है न कि सर्वापेक्षया। "विद्वान् देवदत्तः" विद्वान् देवदत्त है यह कहने से स्वपरिजन अथवा इतर मनुष्यापेक्षयैव विद्वत्ता होती है न कि देवाद्यपेक्षया भी अधिक पाण्डित्य का बोध होता है, तद्वत् प्रकृत में भी समझना चाहिये। एवं प्रियादि अवयव का भी संबन्ध श्रुत है यह अवयव से सम्बन्ध-शरीर जीव को ही हो सकता है न कि शरीर रहित परमात्मा को संभवित है। न वा शरीरवत्व भी परमात्मा में हो सकता है, क्यों कि "अपाणिपादो जवनो ग्रहीता" "तदपाणि पादम्" इत्यादि श्रुति से निष्कल निरंजन में श्रुति शरीर करण के अभाव का प्रतिपादन करती है।

पेक्षया आन्तरत्वेन ब्रह्मैवानन्दमयं स्यान्न जीव इत्यपि न युक्तम् नेयं श्रुतिरानन्दमयस्य सर्वान्तरतां प्रतिपादयति। किन्तु अन्नमयादिकोश चतुष्टयस्यान्तरतामेवानन्दमयस्यान्तरतामानन्दमयकोश प्रतिपादयति। न चानन्दमयादन्यस्यान्तरस्य श्रवणाभावादानन्दमयकोश एवार्थात्सर्वान्तरो भवतीति कथनमपि मनोरमम्; यदपेक्षं यस्यान्तरत्वं श्रुतं भवति, तत्तस्मादेवान्तरं भवति न तु सर्वापेक्षया, नहि देवदत्तो बलवानिति कथिते सर्वसिंहादि जीवापेक्षयापि बलवानिति ज्ञायते, किन्तु समानजातीयमनुष्यान्तरानपेक्ष्य देवदत्तो बलवानित्येव ज्ञायते। एवमानन्दमयकोशोपि, अन्नमयादि कोशचतुष्टयानपेक्ष्यैवान्तरो न तु सर्वापेक्षया आन्तर इति प्रतिभाति। न च परिणामादिरहितस्य निष्कलस्यनिरंजनस्य परब्रह्मणः प्रियाद्यवयवसंबन्धः कदाचिदपि संभवति, न वा तादृशस्य निष्कलादिलक्षणलक्षितस्य परमात्मनः शरीरवैशिष्ट्यमपि संभवति, "अपाणिपादोजवनो ग्रहीता" "न तस्य

इस लिए आनन्दमय शब्दसे जीव का ही ग्रहण होता है न कि परमात्मा का। यह पूर्व पक्षियों का आशय है। इस प्रश्न के उत्तर में वृत्तिकार कहते हैं कि "अत्राभिधीयते,, इत्यादि।

इस प्रकरण में समस्त जड़चेतन- साधारण जगत् का अभिन्न निमित्तोपादान परमात्मा का ही ग्रहण होता है, क्योंकि जगत्कारण परमात्मा में आनन्द शब्द का अभ्यास अनेकशःदेखने में आता है। आनन्दमय का प्रक्रम करके "रसो वै सः" इससे उस परमात्मा को रसरूपता का प्रतिपादन करके कहा है कि, "रसं ह्येवायं लब्ध्वाऽऽनन्दो भवति" (रस स्वरूप परमात्मा को उपासनादी द्वारा प्राप्त करके यह उपासक आनन्दित हो जाता है) "को ह्येवान्यात् कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्" कौन व्यक्ति प्राणादि प्रक्रियाओंमें प्रवृत्त हो सकता है यदि आकाशपदवाच्य परमात्मा आनन्दस्वरूप नहीं हो "एतमानन्दमयमात्मानमुपसंक्रामति" (इस परमानन्द मय परमात्मा को

कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते" इत्याद्यनेक श्रुत्या परमात्मनः शरीरसंबन्धाभावस्य शास्त्रे प्रतिपादनात्। तस्मात् शारीरत्वादि श्रवणात् प्रियादि संबन्धश्रवणाच्च संसारी एव कश्चिदानन्दमयो न तु परमात्मा। अतः संसारधर्मविशिष्ट एव कश्चिदुपास्यत्वेन श्रुतो न तु ज्ञेय ब्रह्मेति। अपि च यदि प्राचुर्यार्थकोपि मयडिति स्वीक्रियेत तथापि कश्चित्संसारी जीव एवानन्दमयो न तु परमात्मा आनन्दमयः, तथा हि आनन्द प्रचुरतापि, आनन्दविरोधी यत्किञ्चिद्दुःखल्वसंभवे एव संभवति, न तु दुःखस्यात्यन्तासंभवे, यथा "अन्नमयो यज्ञः" इत्युक्ते तस्मिन् यज्ञे अन्नस्याधिकता ज्ञायते, अन्नापेक्षयान्नभिन्नमपि वस्तु गौणरुपेण वर्तते एव, न तु अन्न व्यतिरिक्तदुग्धघृतादेरत्यन्ताभावो भवति, तद्वदिहापि आनन्दप्राचुर्ये गम्यमाने आनन्द विरोधिनो दुःखस्याल्पता तु ज्ञायते एव न तु दुःखस्यात्यंता भावः। न च परमात्मनि दुःखलवलेशोपि संभवति तस्यानन्दैकरसवत्वात्,

प्राप्त करता है) "आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन" परमात्मा के आनन्द स्वरूप को अनुभव करने वाला उपासक किसी से भी भीति का अनुभव नहीं करता है)। इत्यादि अनेक अग्रिम वाक्यों में आनन्दमय पद का परमात्मा में ही प्रयोग देखने में आता है। इससे यह सिद्ध होता है कि आनन्दमय वाच्य परमात्मा ही है, किन्तु जोवात्मा अथवा प्रधानादिक पदार्थ आनन्दमय पदवाच्य नहीं हैं। एवम्, "सत्यं विज्ञानमानन्दं ब्रह्म" वह परं ब्रह्म सत्यस्वरूप विज्ञानस्वरूप आनन्दमयस्वरूप है, इत्यादि श्रुत्यन्तर में आनन्दमय शब्द का प्रयोग देखने में अता है, इसलिये आनन्दमय पदवाच्य परमात्मा ही है संसारो जीव नहीं।

यदि कहें कि अन्नमय, प्राणमयादिक जो गौण आत्मा के प्रवाह में आगत यह आनन्दमय भी गौण ही आत्मा है मुख्यात्मा नहीं। ऐसा कहना ठीक नही है क्योंकि यह जो आनन्दमय है वह सर्वापेक्षया आन्तर है, जैसे कि अन्न

तस्मादत्रानन्दमय शब्देन जीव एव परिगृह्यते न तु कथंचिदपि परमात्मनः आनन्दमयवाच्यत्वमिति पूर्व पक्षिणामभिप्राय इति ॥

स्वमते आनन्दमय शब्देन हेयप्रत्यनीकानन्तानेकनिरतिशय कल्याणगुणगणाकरस्य श्री साकेताधिपति श्री रामाख्यस्य परब्रह्मण एव ग्रहणं भवति, तमिमं स्व सिद्धान्ताभिमतं वस्तुविशेषमेवानन्दमय शब्देन प्रतिपादयितुं तदितरमतं प्रतिक्षेप्तुश्च वृत्तिकारः प्रक्रमते "अत्राभिधीयते" इत्यादिना। इह प्रकृत प्रस्तावे आनन्दमय शब्देन परमात्मन एव ग्रहणं कृतः, अभ्यासात् प्रायो बहुषु स्थलेषु परमात्मन एवानन्दमय शब्देन ग्रहणात्। तथाहि "रसं ह्येवायं लब्ध्वानन्दी भवति" अयं जीवोदुःखानेकप्रकारकनदी स्रोतसा प्रत्यहमुह्यमानः संसार सागरे सर्वथैव निर्विण्णो जराजन्मवृद्धाद्यनेकविधोपप्लव संसारासारतां वैराग्यादिना विज्ञाय तं परित्यक्तुं शरणमन्वेषयत् परमदयालुगुरुभिरुपदिश्यमानः श्रीरामात्मकपरमात्मन आनन्दैकरसस्य पादसेवनमेव संसारोच्छेदकं नान्यदन्यत् किंचित्संसारोच्छेदकमिति ज्ञात्वा "करोमि सीतापतिपाददासतां नमामि सीतापतिपादपङ्कजम्। पठामि सीतापति-

मयसे लेकरके विज्ञानमयान्त में एक के बाद दूसरे का कथन किया गया है, उस प्रकार से आनन्दमय के बाद पुनः किसी का कथन नहीं होने से उस में सर्वापेक्षया आन्तर होने से आनन्दमय सर्वान्तर है और सर्वान्तर होने से मुख्य आत्मा ही है किन्तु गौणात्मा नहीं। परमात्मा का शरीर नहीं है तब प्रियशिरस्त्ववादि का कथन किस प्रकार संगत होता है इसलिये जीव ही आनन्द मय है परमात्मा नहीं है, यह कथन भी ठीक नहीं है क्यों कि परमात्मा स्वभावतः यद्यपि शरीर रहित है तथापि भक्त के ऊपर अनुग्रह करने के लिये लीलाविग्रह को धारण करते है इस प्रकार से

काव्यसंहतिं जपामि सीतापतिमन्त्रभूपतिम्" इत्यादि रूपेण परमाचार्य निर्देश प्रकारेण श्रीरामस्य पादपंकजसेवार्थम्, भगवत्सामीप्यं संप्राप्यानन्दैकस्थानम्, इतः पूर्वमानन्दोपिघर्मराशिसंतप्तजीवो यथा शीतलब्धि संप्राप्यानन्दी भवति तथैवायं जीवः सांसारिक दुःख संतप्त आनन्दात्म स्वरूपं परं ब्रह्म श्रीरामस्यान्तिकं समुपेत्यानन्दप्राप्त्याकृतार्थतामिवात्मानं करोतीति। "एष एवह्यानन्दयति" एष उपर्युक्तः परमात्मादुःखसन्तप्तजीवं प्रपत्याप्रतिपन्नं स्वकीयकृपालेशेनैव आनन्दयाति, आनन्दं ददाति। यथा यदा मधुरस्वभाववान् गुडः स्वकीय संबन्धाद् गोधूमादिकचूर्णमपि मधुरयति, परमात्मापि स्व संबन्धिनं प्रपन्नं जीवमप्यानन्दयतीति तदा का कथा तस्य परमात्मन आनन्दमयत्वे। यथा वा यो हि स्वधनैकदेशेनान्यानपि धनवन्तं करोति तस्य स्वकीय धनवत्वे किमपि कथनीयं नावशिष्यते, अर्थात सर्वथा धनस्वभावक एवेति। एवमेवात्र परमात्मा स्वप्रपन्नंजीवमपि यदानन्दयति तदा का कथा परमात्मन आनन्दमयत्वे इति "एतमानन्दमयमात्मानमुपसंक्रामति एतं पूर्व प्रक्रान्तमानन्दमयं सर्वथा आनन्दस्वभावकमात्मानं परमात्मानं स्वीकृतशरणागतिर्जीवविशेष, निदिध्यासनकरणानन्तरमुपसंक्रामति तादृशमानन्दस्वभावकं भगवन्तं श्री रामं प्राप्नोति, अर्थात् पुनरावर्तविवर्जितं साकेताख्यदिव्यस्थानं प्राप्नोति, प्राप्य च कृतार्थो भवतीति वृत्यन्तर्गतचतुर्थश्रुत्यवयवस्यार्थः। "आनन्दं ब्रह्मणो विद्वान्" परमात्मा संबन्धिविशेषानन्दविषयकज्ञानवान् जीवः, अर्थादुपासनाकृततीक्ष्णचेतसा

शास्त्र में वर्णन किया गया है। अतः प्रिय शिरस्त्वादि कल्पना करने में भी कोई आपत्ति नहीं है। अतः यह सिद्ध हुआ कि परमात्माही आनन्दमयपदवाच्य है, संसारी जीवात्मा तो कथमपि आनन्दमय पदवाच्य नहीं हो सकता है।

परमात्माविषयकानन्दविषयक परिज्ञानवान् जीवः कुतश्चिदपि कस्मादपि दुःखाद्दुःखकारणाद्वा नविभेति.न प्राप्नोति कदाचिदपि दुःखं दुःखकारणं वा संसारम्, परमानन्दात्मकपरमात्मसान्निध्यं प्राप्य भयं तस्य संसारस्य संबन्धं परित्यज्य यथासुख भगवन्तं परिचर्यया परिचरन् सुखीभवति सर्वबन्धविनिर्मुक्तिरस्य भवतीत्यर्थः। इत्यादि विविध प्रकार कोत्तरवाक्य समुदायेषु, आनंदमयशब्दस्य नित्यनिरतिशयकल्याणगुणाकरपरमात्मन्येवाभ्यासदर्शनात् स्थितमेतद् यदानन्दमयपदवाच्यः परमात्मैव न तु अन्नमयादिवत् आनन्दमयः कश्चित् संसारी जीव इति।

यश्चायं परमात्मा स एवानन्दमयो भवितुं योग्यो यतः"अभ्यासात्" परमात्मन्येवानन्दशब्दोऽनेकवारमभ्यस्यते। अर्थात् "तस्यैष एव शारीर आत्मा यः पूर्वस्ये" ति वाक्यस्य प्राणमयपर्यायमारभ्य कथितस्य प्राणमये तत्पूर्वस्यान्नमयस्य "एष एव शारीर आत्मा य एषः प्राणमयः" इत्येवं रूपेणार्थवर्णनवत् तदनन्तरसर्वपर्यायेष्वपि तस्य पूर्वस्य प्राणमयस्य "एष एव शारीर आत्मा य विज्ञानमयः तस्य पूर्वस्य विज्ञानमयस्य एष एव शारीर आत्मा य एष विज्ञानमयः, तस्य पूर्वस्य विज्ञानमयस्य "एष एव एष आनन्दमय" इत्यस्यार्थस्य वर्णनेन तस्य एष एव इत्यानन्दमयपर्यायगतवाक्यप्रतिपाद्यस्य "सोऽकामयत" इति जगत्कारणत्वकथनेन जगत्कारणविशिष्टानन्दमयत्वेन भाष्यमाण आनन्दमयः परमात्मैव नत्वन्यः कश्चित्। एवं प्रकारेणानन्दमयं प्रस्तुत्य "रसो वै सः" "इति तस्यैव परमात्मनोरसस्वरूपतां प्रतिपाद्य पुनः कथ्यते

आगे का जो भृगुवल्लीप्रकरण है उससे भी यही अर्थसिद्ध होता है, आनन्दमय वाच्य परमात्मा ही है जीव नहीं। इस तत्त्व को समझाने के लिए भृगु वल्ली प्रकरण में जगत् के सृष्टि-स्थिति-लय-कारण परमात्मा ही है इसको स्पष्ट करते हुये वरुण ने पुत्र को क्रमशः अन्नमय, प्राणमय, मनोमय

"रसं ह्येवायं लब्ध्वा आनन्दी भवती" ति तस्मादानन्दमयपदवाच्यः परमात्मैव भवतीति वृत्तेरक्षरार्थः ।

आकरग्रन्थपरिशीलनप्रवणा पूर्वाचार्यास्तु प्रकृतविषये इत्थमादिशन्ति तथाहि अथातो ब्रह्मजिज्ञासेत्यारभ्य श्रुतत्वाच्चेत्यन्त सूत्रनिकरैः सर्वज्ञसर्वशक्तिमच्चेतनात्मकं ब्रह्मैव जगतः कारणमित्युपपाद्य प्रधानस्य च स्वतंत्रस्य जगत्करणतां निरस्य ब्रह्मलक्षणञ्चाव्याप्त्यादिदोषपरिवर्जितमिति व्यवस्थापि, तथापि विशिष्ट माहात्म्यप्राप्तस्य चेतनजीवविशेषस्य निराकरणं तु न जातमिति भक्षितेऽपि लशुने न शान्तो व्याधिरिति न्यायाद् ब्रह्मलक्षणं न निर्दुष्टमिति शङ्कां व्यवच्छेत्तुमग्रिमप्रकरणमारभते, आनन्दमयोऽभ्यासादी'ति। अयं भावः तैत्तिरीयके–अन्नमय–प्राणमय-मनोमय-विज्ञानमय–कोशं प्रतिपाद्यानन्तरं कथयति"तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मा आनन्दमय स्तेनैष पूर्णः स वा एष पुरुष विध एव, तस्य पुरुष विधतामन्वयं पुरुष विधः । तस्य प्रियमेव शिरः । मो दो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः, आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा" एवं रूपेण तैत्तिरीयक श्रुतौ श्रूयते । तत्र भवति संशयः किं "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यत्र यद् ब्रह्म प्रक्रान्तं तदेव ब्रह्म इहापि प्रतिपादितं भवति अथवा सुखदुःखादि फलानामुपभोक्ताजीवः प्रतिपादितो भवतीति। तत्र यदर्थेपरिगृह्यमाणे प्रकरण प्रतिपादितार्थानां सामञ्जस्यं भवेत्स एव गृहीतव्यः । सामञ्जस्यन्तु निखिलप्राकरणिकार्थानां जोवे भवति, तस्मादत्र जीव एवानन्दमय

विज्ञानमय, आनन्दमयान्त का उपदेश दिया तब अन्त में कहा कि "आनन्दाद्ध्येव हि इमानि भूतानि जायन्ते आनन्देन जातानि जीवन्ति, आनन्दमेव प्रतियान्ति" आनन्दात्मक परमात्मा से आकाशादिकभूत उत्पन्न होते हैं, एवं स्थिति काल में उसी आनन्द में अवस्थित रहते हैं और प्रलयके समय में उसी

पदेन परिगृहीतव्यो, यतः, अन्नमयादि विकारसाहचर्यात् । ,तस्यैष: शारीर आत्मा''इत्यनेन तस्य पूर्वस्य पुच्छवत्तदाधारत्वप्रतिपादनेन, तदपेक्षया पार्थक्यप्रतिपादनात्, तस्य चेतनत्वेन संकल्पपूर्वकजगतः स्रष्टृत्वमपि संभवत्येव । एवं "सत्यं ज्ञानमनन्तं ब्रह्म"इत्यारभ्य "आनन्दादेव खल्विमानि भूतानि जायन्ते, आनन्देन जातानि जीवन्ति, आनन्दं प्रयन्त्यभिसंविशन्ति,, एतत्पर्यन्ता श्रुतिः सुखदुःखाधारस्यैव जीवस्य ब्रह्मरूपतामानन्दस्वरूपतां निखिलस्थावरजंगमजगत्कर्तृत्वमपि च प्रतिपादयति । तस्मादत्रानन्दमयशब्देन जीव एव प्रतिपादितो भवति न तु सकलमलरहितोऽपरिणामी परमात्मानन्दमयपदग्राह्य इत्येवं पूर्वपक्षे सति आनन्दमयोऽभ्यासादिति सूत्रमुत्थापितवान्। प्रकृतप्रकरणे आनंदमय शब्देन आनन्दमयः परमात्मैव परिगृहीतव्यो न त्वल्पज्ञो जीवःकुतः एवं तत्राह अभ्यासात्। अर्थात् आनन्दमय शब्दस्य परब्रह्मणि प्रयोगोऽनेक स्थलेषु श्रूयमाणो भवति न तु जीवे कुत्रचिदपि । तथा हि" अन्योऽन्तर आत्मा आनन्दमयः" अनया श्रुत्या आनन्दमयं प्रक्रम्य तदनन्तरमग्रिमप्रकरणे "रसो वै सः" इत्यनेन वाक्येन पूर्वप्रकृतस्यैव रसस्वरूपत्वं सारतत्वमानन्दरूपताञ्च प्रतिपाद्य; ततः पुनर्निवेदयति 'रसं ह्येवायं लब्ध्वानन्दी भवति, कोह्येवान्यात् कःप्राण्यात् यद्येष आनन्दो नस्यात् एष एवानन्दयति । यदाह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽ निरुक्तेऽनिलयनेऽयं प्रतिष्ठां विन्दतेऽथ सोऽभयं गतो भवति'सैषानन्दस्यमीमांसा भवति युवास्यात्साधु युवाध्यायकः। आशिष्ठो

आनन्दमय में विलीयमान हो जाते हैं। इस प्रकार से श्रुति आनन्दमय को ही ब्रह्मस्वरूपतया निश्चय कराती है। उसके बाद पुनः प्रश्न प्रतिवचन के अभाव होने से भृगु को जगत्कारण विषयक जो जिज्ञासा थी वह आनन्दमय में आकरके समाप्त हो गयी। उससे यह सिद्ध होता

द्रढ़िष्ठो बलिष्ठः। तस्येयं पृथिवी सर्वा वित्तस्य पूर्णास्यात् स एको मानुष आनन्दः' ते ये शतं मानुषा आनन्दाः स एको मनुष्य गन्धर्वाणा मानन्दः"। एवं प्रकारेण पूर्व पूर्वानन्दानां शत शत गुणाधिकेनानन्देन समानमुत्तरोत्तरेषाञ्चैक आनन्दः प्रदर्शितः। एवं प्रकारेण गन्धर्व देवगन्धर्वपित्राजानदेवकर्मदेवेन्द्रबृहस्पति–प्रजापत्यन्तानन्दान् प्रदर्श्य पुनः प्रतिपादयति "ते ये शतं प्रजापतेरानन्दाः, स एको ब्रह्मण आनन्दः। यतो वाचो निवर्तन्तेऽप्राप्य मनसा सह आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन" इत्येवं रूपेण तैत्तिरीयकस्यानन्दवल्लीप्रकरणे बहुशोऽभ्यस्यमानमानन्दपदं स्वकीयशुभकर्मसमुदायैः समुपार्जितानन्तदुःखाश्रये जीवे तादृशानन्दः कथमिव समवेयात्। ततश्च तादृशानन्दविशेषो हेय प्रत्यनीकानन्तकल्याणगुणाकरं परमात्मानं भगवन्तं श्री साकेताधिपतिं श्री राममेवानुसेवते तदाहुरानन्दभाष्यकाराः "अतः परमात्मैवानन्द मयः सेध्दुमर्हति न ततोऽन्यो जीव इति" (आनन्दभाष्य१।१।१३)तस्मात् सिद्धं यत् आनन्दमयः परमात्मैव न तु परमात्मव्यतिरिक्तश्चेतनोपि कश्चित् प्रकृतानन्दमयपदप्रतिपादितो भवतीति।

यमेव सेवते रामं कल्याणादिक सद्गुणाः।
आनन्दमयशब्दोऽपि तमेवाश्रयते सदा ॥१॥ इति ॥१३॥

है कि वारुणी विद्या का आनन्दमय में ही ब्रह्मत्व सर्वजगत्कारणत्व का निश्चय होता है। इसलिये आनन्दमय का वाच्यार्थ परमात्मा सर्व जगत्कारण सर्वेश्वर भगवान् श्रीराम ही हैं। किन्तु दुःख संस्पृष्ट जीवात्मा आनन्दमय पदवाच्य नहीं है ॥१३॥

विकारशब्दान्नेति चेन्न प्राचुर्यात् ।१।१।१४॥

ननु तथाप्यानन्दपदवाच्यत्वं ब्रह्मणः सिध्येन्नत्वानन्दमयपद वाच्यत्वम् ।"दारुमयो हस्ती""पर्णमयी जुहूः" इत्यादौ यथा विकारार्थ

विवरणम् - स्यादेतत् भवतु नाम परमात्मनः कथञ्चित् परमानन्द पदबोध्यत्वं परन्तु आनन्दमयवाच्यत्वन्तु न संभवति यथा मृन्मयो हस्ती मृन्मयो मृगः मार्दवो घटः इत्यादिस्थलेषु मृद्विकारार्थकत्वं मयट् प्रत्ययस्य विकारार्थकत्वमेव तथैव प्रकृतेऽपि आनन्दमयपद घटितमयट् प्रत्ययोऽपि विकारार्थक एव। अन्नमय इत्यत्र यथा विकारार्थको मयट् तथा चानन्दविकारत्वन्तु नित्यस्वरूपस्य परमात्मनो न सम्भवति किन्तु तदितरस्यैवेति शङ्कां व्युच्छेदाय प्रवृत्तो वृत्तिकारोऽग्रिमसूत्रमुत्थापयितुं प्रक्रमन्नाह ननु तथाप्यानन्दपदे त्यादि, पूर्वविचारितपद्धत्या यथाकथञ्चित्परमात्मन आनन्दशब्देन ग्रहणं भवतु नाम तथापि आनन्दमयपदवाच्यत्वन्तु न संभवति, यतो यथा दारुविकारकहस्तिनि दारुमयो हस्तीतिव्यवहारः, यथा वा पर्णविकारा-

सारबोधिनी-यद्यपि "सत्यं ज्ञानमानन्दं ब्रह्म" इत्यादि श्रुतियों केबलसे परमानन्द वाच्यता ब्रह्म में घटित हैं, तथापि परमानन्दमय पद से वाच्य नहीं हो सकता है परमात्मा, क्योंकि अन्नमयादिक में जिसतरह मयट् प्रत्यय विकारार्थक है उसीतरह आनन्दमय पद में भी मयट् शब्द विकारार्थक है क्योंकि विकार प्रवाह के अन्तर्गत है। इसलिए स्वभावतःनिर्विकार :परमात्मा विकारार्थक मयट् प्रत्यय घटित आनन्दमय शब्द का वाच्य नहीं हो सकता है, किन्तु स्वभावतः सविकार जीव ही आनन्दमय शब्दका वाच्य है। इसप्रकार की शंका का निराकरण करने के लिए प्रथमतः सूत्रद्वारा समुपस्थापित पूर्वपक्षका "प्राचुर्यात्" इस सूत्रावयव से निराकरण करने के लिये वृत्तिकार प्रक्रम करते हुए कहते हैं "ननु तथाप्यानन्दपदेत्यादि वृत्तिः। "सत्यं ज्ञानमानन्दं ब्रह्म" इत्यादि श्रुतियों से यद्यपि परमात्मा आनन्दपदवाच्य तो हो सकता

को मयडस्ति तथानन्दमयपदेऽपि स्यात् । किञ्चात्रैवान्नमय शब्दे विकारे मयड्विद्यते तत्साहचर्यादानन्दमयशब्देऽपि मयटो विकारार्थकत्वमेवेति चेन्न आनन्दमयशब्दे मयटः प्राचुर्यार्थकत्वात् ।

त्मके जुहू पदार्थे "यस्य पर्णमयी जुहू भवती" त्यादि स्थले यथा विकारार्थको मयट् प्रत्ययस्तथैव प्रकृते आनन्दमयपदेपि विकारार्थक एव मयट् अर्थादस्मिन् प्रकरणे प्रथमोपात्त अन्नमयः इति पदे यो हि मयट् प्रत्ययः स विकारार्थक एव यतोऽन्नविकारत्वस्य शरीरे प्रत्यक्षसिद्धत्वात् । ततश्च 'अन्नमयः' इत्यत्र मयट् प्रत्ययो यथा विकारार्थक एव समधिगत स्तथा तत्प्रवाहपतितत्वात् आनन्दमयः शब्देऽपि विकारार्थक एव स्यात् साहचर्यात् । न च सहचरितेष्वेकत्र विकारार्थकतायाग्रहणं तदन्यत्रान्यार्थकताया ग्रहणं युक्तम्, तथा सति पंक्तिभेददोषः संपतेत् । तस्मादानन्दमयपदेऽपि विकारार्थक एव मयट् प्रत्ययो नत्वन्यार्थकः । एवं च सर्वथा विकाररहितस्य परमात्मनः कदाचिदपि ग्रहणं न संभवति कथंचिद्विकृतजड़संबंधात् विकारिणो जीवस्यैव ग्रहणमिति पुनः

है, तथापि आनन्दमय शब्द का वाच्य तो नहीं होसकता है। परमात्मा आनन्दमयपद का वाच्य क्यों नहीं हो सकते हैं ? इस जिज्ञासा के तात्कालिक उत्तर रूपमें वृत्तिकार कहते हैं दारुमयो हस्तीत्यादि । जिस तरह दारुमय हाथी है अर्थात् लकड़ी का बनाया हुआ हाथी लकड़ी का विकार है इस लौकिक प्रयोग में यथा वा पर्ण-पत्ता का बनाया हुआ जुहू यज्ञका साधन पदार्थविशेष पलाशपत्तों का विकार होता है इन प्रयोगोंमें मयट् प्रत्यय विकारार्थक है उसी तरह अन्नमयघटक विकारार्थक मयट् प्रत्यय के प्रवाह में पड़ा हुआ आनन्दमयघटक मयट् प्रत्यय भी विकारार्थक है क्योंकि विकारार्थक मयट् के साहचर्य से तब निर्विकार परमात्मा आनन्दमय पद का वाच्य नहीं हो सकता है। क्योंकि निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् । इत्यादि अनेक श्रुतियों से सिद्ध होता

"स एको मानुष आनन्दः" इत्यारभ्योक्तेभ्य आनन्देभ्यो ब्रह्मण आनन्दस्य शतगुणाधिक्याभिधानात् । अन्नमयो यज्ञः इत्यादिषु प्राचुर्य्येऽपि मयटः प्रसिद्धिरस्ति । विकारार्थकस्य मयटस्तु प्राणमय इत्यत्रैव परित्याग इति ॥१४॥

"शांति कर्मणि वेतालोदय" इति न्याय आपततीति शङ्कां समुच्छेदाय प्राह वृत्तिकार "इतिचेन्नेत्यादि । प्राचुर्यादिति सूत्रावयवः । आनन्दमय शब्दे योऽयं परिदृश्यमानो मयट् प्रत्ययः स नान्नमयादिवद्विकारार्थकः किन्तु यत्राद्यन्नप्रचुरक "अन्नमयो यज्ञ" इति स्थले यथा तस्यान्नप्राचुर्यात् मयट्र प्रत्ययप्राचुयार्थकस्तथैव प्रकृतआनन्दमयपदेऽपि मयट्र प्रत्ययप्राचुर्यार्थक एव न तु विकारार्थक यतो विकारार्थकताया प्रकृतेऽसंभवात् । तथाहि "स एको मानुष आनन्द" इत्यारभ्य प्रजापतेरानन्द पर्यन्तमेकस्यापेक्षया अग्रिमाग्रिमस्य शतगुणाधिक्यं प्रदर्श्य पुनः प्रजापतेरानन्दापेक्षयापि परमात्मन आनन्दस्य शतगुणाधिक्यं प्रदर्शितवान् । ततश्चैतादृशग्रन्थपर्यालोचनया समधि—

है कि परमात्मा सर्वप्रकारक विकार से रहित है तो वह परमात्मा किसी भी प्रकार से आनन्दमयपद का प्रतिपाद्य नहीं है किन्तु स्वभावतः सविकारक जो कोई उपासनाबलप्राप्त संसारी जीव है उसी जीव का बोधक प्रकृत में आनन्दमय पद है क्योंकि अविक्रिय परमात्मा में तो विकार का गन्धमात्र भी नहीं है अतः वह परमात्मा आनन्दमय पद बोध्य नहीं हैं अपितु जीव हैं । इस पूर्व पक्षका मूल हैं विकारार्थकत्व मयट्र प्रत्यय उसमें ही कुठाराघात करने के लिए वृत्तिकार उत्तर रूपमें कहते है इति चेन्न इत्यादि । आनन्दमय शब्द में जो मयट् प्रत्यय हैं वह 'तत्प्रकृत वचने मयट्' इस सूत्र से प्राचुर्य अर्थ में हैं न तु विकारार्थकमें तथाहि 'स एको मानुष आनन्दः' अर्थात् सैषानन्दस्य मीमांसा भवति । युवास्यात् साधु युवाध्यापक । आशिष्ठो दृढ़िष्ठो बलिष्ठ । तस्येयं पृथिवी सर्वा वित्तस्य

गतो भवति यद् ब्रह्मानन्दः सर्वापेक्षयाप्यधिको निरतिशय एवेति ततश्च तादृशो ब्रह्मानन्दविशेषः कथं वा कस्य विकार स्यात्, श्रुत्यन्तरेण तादृशानन्दस्यानित्यत्वश्रवणात्, नहि नित्यश्च स्याद्विकारी अपि स्यादिति संभवदुक्तिकम् । तस्मात्परमात्मन आनन्दोऽतिशयेनसर्वोत्कर्ष एव । नायं नियमो यत् यो हि मयट्प्रत्ययः स सर्वत्र विकारार्थक एवेति । लोकेऽपि अन्नमयो यज्ञः' इत्यत्र प्राचुर्यार्थके मयट्प्रत्ययस्य प्रयोग दर्शनात्, अतः प्राचुर्यार्थक एव मयट् प्रत्यय न विकारार्थकः । विकारार्थकमयट् प्रत्यय स्य 'प्राणमय' इत्यत्रैव परित्यागःकृतोऽसंभवादिदोषं पश्यत् । तस्मात्प्रकृत आनन्दमयशब्दे न विकारार्थको मयट् येन जीवस्यानन्दमयपदेन ग्रहणं स्यादितिशङ्का भवेत् । किन्तु नित्यानन्दादिप्रचुरकपरमात्मन एव ग्रहणमिति वृत्तेरक्षरार्थः ॥

पूर्णास्यात् । स एको मानुष आनन्दः । यहाँ इस प्रकार से विचार किया जाता हैं कि कोई व्यक्ति युवावस्था में हो वह भी केवल युवा ही हो यों नहीं किन्तु साधु सच्चरित्र युवान हो तथा सच्चरित्र अध्यापक हो स्वतः अध्ययनशील हो सर्वदा अनलशतयाशीघ्रकारी हो अत्यन्त दृढ़ शरीर वाला तथा अतिबलवान् हो उसको संपूर्णपृथिवी सर्वप्रकार से धनधान्यरत्नादि से परिपूर्णप्राप्त हो तो इस आनन्द को मनुष्यानन्द कहते हैं। यहाँ से लेकर के प्रजापति के आनन्द पर्यन्त शतगुणित आनन्द की अधिकता का प्रतिपादन करके पुनः प्रजापति के आनन्द की अपेक्षा से ब्रह्मानन्द को सौगुणा अधिकता का प्रतिपादन किया गया है । इससे यह सिद्ध होता है कि ब्रह्मानन्द निरतिशयानन्द है, तो एतादृश आनन्दवान् आनन्दमय परमात्म ही हो सकता है । प्राचुर्यार्थक मयट् का प्रयोग "अन्नमयो" यह यज्ञ अन्न प्रचुरक है, इत्यादि स्थलोंमें प्रचुरता अर्थ में मयट् प्रत्यय अतिप्रसिद्ध है ।

भावार्थस्त्वयं तथाहि यथान्नमय इत्यत्र विकारार्थको मयट् प्रत्ययस्ताद्दशमयट् साहचर्यादानन्दमय इत्यत्रापि आनन्दप्रकृतिको मयट् प्रत्ययो विकारार्थक एव भवेत्, ततश्च निर्विकारे परमात्मनि विकारस्यासंभवान्नानन्दपदवाच्यत्वं परमात्मनः। "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" । इत्याद्यनेक श्रुतिभिः परमात्मनः सर्वविकाररा हित्यस्यश्रवणात्। एवं च सर्वविकारविरहितस्य परमात्मनः कथमिवानन्दमयपदेन ग्रहणं स्यात्' किन्तु सर्वथा परमेश्वरगुणविरहितस्य दुःखार्णवे सन्निमज्य समुह्यमानस्य जीवस्यैव ग्रहणमिति चेन्न, प्राचुर्यादिति। योऽयमानन्दमयशब्दस्तद्घटकीभूतस्य मयट्प्रत्ययस्य न विकारार्थकत्वमपितु प्राचुर्यार्थवाचकत्वमेवेति यतः 'स एको मानुष आनन्दः' इत्यारभ्य 'स एको ब्रह्मण आनन्दः' एतदन्त प्रकरणेन मानुषानन्दमारभ्य प्रजापति कमलासनीयानन्दानां शतगुणाधिक्प्रतिपादनात् प्रजापतेरानन्दा पेक्षयापि परमात्मन आनन्दस्य शतगुणाधिक्यस्य श्रवणेन परमात्मानन्दस्यात्यन्त एव प्राचुर्योपपत्तेस्तस्मादेताद्दशानन्दप्रचुरो सर्वेश्वरसाकेताधिपति

भावार्थ यह है कि "स एको मानव आनन्दः" यहां से आरंभ करके "स एको ब्रह्मण आनन्दः प्रकरण से मनुष्यानन्द से लेकर प्रजापति आनन्द तक शतगुणअधीकताका प्रतिपादन करके उस प्रजापति के आनन्द से भी शतगुण अधिक ब्रह्मानन्द को कहा गया है तो इससे सिद्ध होता है कि ब्रह्म का आनन्द प्रचुर आनन्द है। तब एताद्दश प्रचुर आनन्द वाला षडैश्वर्यशाली परमात्मा हो सकते हैं परन्तु अल्पतर आनन्दवाला जीवात्मा नहीं, और ब्रह्म विषयक प्रचुरानन्द के ज्ञान से जीव को अभय अर्थात् मोक्ष की प्राप्ति होती है इस बात का भी "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन" (वाणी मन के साथ ब्रह्म के तात्विक स्वरूपानभिज्ञ होकर निवृत्त हो जाती है ब्रह्म के वास्तविक स्वरूप को जानने वाला पुरुष किसी से भी भय को प्राप्त नहीं होता है अर्थात् मुक्त होता है) इत्यादि प्रकरण में प्रतिपादन किया गया है। तो ब्रह्म के प्रचुरानन्द ज्ञान

श्रीराम एव, नतु भाग्योपनीतः कदाचिदानन्दलेशमङ्गीकुर्वाणो जीव एतादृशानन्दवानिति। यत उपजीव्यस्य परमात्मन आनन्दस्य स्वस्वरूपस्य ज्ञानादेव जीवोऽभयं गतः कृतार्थो भवतीत्यपि श्रुतिसमुद्घोषयति 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह आनन्दं ब्रह्मणो विद्वान् न विभेति कुतश्चन' इत्यादिका। परमात्मन एतादृशप्रचुरानन्दज्ञानात्सांसारिको जीवोऽभयतां मोक्षमाप्नोति । यदि कदाचिदेतादृशानन्दवान् जीवः स्यात्तदा स्वकीयानन्दज्ञानान्मुक्तो भवेत् तथात्वे स्वानन्दज्ञानस्य सर्वदैव विद्यमानत्वेन कारणस्यविद्यमानत्वात् सर्वदैव जीवस्य मोक्षो भवेत् ततश्च मोक्षार्थं न कोऽपि प्रयतेत, इति गुरुशास्त्रोपदेशादिकं सर्वमेवासमंजसमापद्येत । न च जीवस्य स्वज्ञानान्मोक्षोऽपितु परमात्म ज्ञानादेव मोक्ष इति "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय। (तमनन्तकल्याणगुणकं परमात्मानं विदित्वा उपासनादि परिचर्यया ज्ञात्वैवातिमृत्युं मोक्षं प्राप्तो भवति जीवः, एतदतिरिक्तो मार्ग उपायोऽयनाय साकेताख्यदिव्यधामगमनाय) नेति ततश्चब्रह्मज्ञानस्यैव मोक्षजनत्वं न तदन्यस्य कस्यचिन्मोक्षजनकतेति कथं तस्मिन् जीवे तादृशानन्दप्रचुरतायाः संभव इति, तादृश प्रचुरानन्दमयः परमात्मेव न तु जीवादि संसारी कश्चिदिति।

से जब जीव अभयंगत होता है– अर्थात् मोक्ष प्राप्त कर जाता है तब किस प्रकार से प्रचुरानन्दवान् जीव हो सकता है ? किन्तु परमात्मा ही तादृश प्रचुरानन्दवान् है यही सत्संप्रदायीय राजमार्ग है और जो पूर्वपक्षी ने कहा था कि अन्नमय में विकारार्थक मयट् प्रत्यय है तो अन्नमयादि के साहचर्य से आनन्दमय में भी विकारार्थक ही मयट् प्रत्यय है, वह ठीक नहीं है क्योंकि प्राणमयपद में विकारार्थक मयट् के असंभव होने से अन्यार्थकता स्वीकार करना पड़ता है अन्न प्राणमय में विकारार्थक मयट् नहीं है। यह "प्राणमय एव तावत्तस्य विकारार्थकस्य मयटोऽसम्भवात्तत्रैवान्यार्थस्य स्वीकर्तव्य-

अत्र प्राचुर्यस्यार्थो नाधिक्यं किन्तु निरतिशयत्वम्, अतिशयराहित्यमेव, ततश्च निरतिशयानन्दवाच्यात् परमात्मैवानन्दमयवाच्यो न तु जीवो यतो जीवानन्दानां प्रजापत्यन्तानामानन्दानां सातिशयात्। अन्यथा यदि प्राचुर्यस्याधिक्यार्थे एवाग्रहः क्रियेत तदा अन्नमयो यज्ञः इत्यत्रान्नाधिके यज्ञे, अन्नापेक्षया अन्नान्यस्य जलफलादेर्न्यूनता भवति, इति गम्यते तथा तादृशानन्दाधिक्ये परमात्मानन्दाविरोधिनो दुःखस्यापि संभवो भवेत्, ततश्च नहि वरघातायकन्योद्वाहिता भवतीति न्यायविषयताया अतिक्रमणं न करिष्यति कोऽपि वेदान्ती इति। यदप्युक्तं पूर्वपक्षिभिर्यदन्नमयपदप्रवाहान्तर्गतत्वादानन्दमयशब्दोऽपि विकारार्थक एव ततश्च सर्वथानिर्विकारस्य परमात्मैव आनन्दमयशब्देन ग्रहणस्याशक्यतया परिशेषात्सविकारकस्यैव कस्यचिज्जीवस्यैव ग्रहणं भवतीति, तदप्यसंगतमेव प्रतिभाति, यतो यद्यन्नमयादारभ्य विज्ञानमयपर्यन्तं विकारात्मकोऽर्थोऽनुवृत्तो भवेत्तदैवेयमाशङ्का प्रादुर्भूयात् नत्वेवं, प्राणमये एव तस्य निवृत्तत्वात्। तन्निवृत्तिश्चासम्भवादेव तस्मादत्र निरतिशयानन्दविशिष्टः सर्वशक्तिमान् सर्वज्ञोऽनन्तगुणसागरत्वात्" (आनन्दभाष्य १।१।१४) इस श्रीसम्प्रदायाचार्य की दिव्यवाणी से स्पष्ट है। और भी देखिये—विज्ञानमयपद और आनन्दमयपद में विकारार्थकमयट् प्रत्यय नहीं हो सकता है क्योंकि व्याकरण में विकारार्थकमयट् का विधान तो लोक में ही किया गया है यहाँ तो विज्ञानमय, आनन्दमय तो लौकिकप्रयोग नहीं है अपितु वैदिकप्रयोग हैं। यदि कदाचित् कोई कहे कि "मृण्मयं गृहम्" इत्यादि प्रयोग तो वैदिक हैं और उसमें विकारार्थकमयट् को देखते हैं तो इसका उत्तर यह है कि "मृण्मयं गृहम्" यहाँ भी प्राचुर्य अर्थ में ही मयट् प्रत्यय है इसी तरह प्रकृत आनन्दमयपदमें प्राचुर्यार्थक हि मयट् है न तु विकारार्थक तब एतादृश आनन्दप्रचुर परमात्मा

तद्धेतुव्यपदेशाच्च ।१।१।।१५।।

जगदुत्पत्ति स्थितिलयकर्तृत्वस्य परमात्मसाधारणस्य हेतो र्व्यपदेशात "आनन्दाध्द्येव खल्विमानि भूतानि जायन्ते" (तै० ३।६।) इत्यादि प्राकरणिकश्रुतिभिरुपदिष्टत्वादानन्दमयोऽत्र परमात्मैव ।।१५।।

श्रीसाकेताधिपतिरेवानन्दमयशब्देन परिगृहीतो भवति न तु स्वभाव कृपणस्य जीवस्य कथमप्येतत् प्रकरणे परिग्रहो भवतीति ।।१४ ।।

विवरणम् – मानुषानन्दारभ्य प्रजापतिपर्यन्तानन्दस्य शतगुणाधिकतां दर्शयित्वा परमात्मन आनन्दस्य ततोपि शतगुणाधिक्यं प्रदर्शयन् परमात्मानन्दस्य प्राचुर्यं वदन् तादृशप्रचुरानन्दविशिष्टपरमात्मैव प्रकरणग्राह्यो नतु जीवः प्रकरणप्रतिपाद्य इति व्यवस्थापितम् । तत्र च प्राचुर्य्यता मयटः प्रतिज्ञा मात्रेण प्रतिपादितम् । न च प्रतिज्ञामात्रं नियामकं हेतुरपि प्रदर्शनीयः । तदुक्तं " संभावितः प्रतिज्ञायां पक्षः साध्येन हेतुना" इति हेतुप्रदर्शनाय प्रक्रमन्नाह वृत्तिकारः–"जगदुत्पत्ति-स्थिति" इत्यादि । "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीति" (इमान्याकाशप्रमुखानि भूतानि यतः सर्वज्ञसर्वशक्तिविशिष्टपरमेश्वरात्समुत्पद्यन्ते, समुत्पत्य च तस्मिनेव परमेश्वरे स्थितानि भवन्ति, पुनश्च प्रतिसर्गकालेऽस्मिन्परमेश्वरे

ही आनन्दमय पद का वाच्य होता है, किन्तु अत्यल्प आनन्दाभासवान् जीव आनन्दमयपद का वाच्य नहीं है यह सिद्ध हुआ ।।१४।।

सारबोधिनी– परमात्मा आनन्द प्रचुर है इसका कथन पूर्व सूत्र में प्रतिज्ञामात्र से किया गया वहां हेतुका कथन न होने से हेतु प्रदर्शनार्थ वृत्तिकार उपक्रम करते हैं–"जगदुत्पत्ति" इत्यादि । विविध धर्मात्मक अनन्त-जगतका नियन्तृत्वरूप धर्म केवल परमात्मा में ही है तद्भिन्न में जगत्कर्तृत्वादिक-धर्म अघटित है, एवं "आनन्दाद्ध्येव खल्विमानि भूतानिजायन्ते, आनन्देन जातानि जीवन्ति, आनन्दं प्रयन्त्यभिसंविशन्ति" (आनन्दात्मक परब्रह्मसे परि-

लीयमानानि भवन्तीत्यर्थः) अनया श्रुत्या जगदुत्पत्तिस्थितिप्रलयकर्तृत्व धर्माः परमात्मनि प्रदर्शिताः। एतादृश हेतोः प्रदर्शनेन आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते आनन्देन जातानि जीवन्ति आनन्दं प्रयन्त्यभिसंविसन्ति"। आनन्दात्मकपरमात्मनः सकाशादाकाशप्रमुखानि सर्वाण्येवभूतव्रातानि समुत्पद्यन्ते समुत्पद्य च स्थितिं प्राप्नुवन्ति पुनरन्ते च समुपहृता भवन्ति—एतादृक् परब्रह्म मोक्षकामैं र्विजिज्ञासितव्यः। समुपासनीयश्चेति) इत्यादि प्राकरणिकानेकश्रुतिवाक्यैः समुपदिष्टत्वाच्च प्रकृतप्रकरणे परमात्मैव प्रति पाद्यो न जीव इति स्थितम् ।

सूत्रार्थस्तु— तस्य परमात्मनो बोधको यो हेतु र्जगदुत्पादकत्वादि रूपः तादृशस्य परमात्मनिष्ठस्य हेतोरिह प्रकरणे आनन्दादिश्रुतिभिः समुपदिश्यमानत्वात्परमात्मैवानन्दप्रचुरस्तथा तादृशानन्दप्राचुर्यात्परमात्मैवास्मिन् प्रकरणे परिगृहीतव्यो नतु जीवनिवहग्रह इतिसूत्रवद्वृत्ते रक्षरार्थः। अयं भावः "आनन्दप्रचुरः परमात्मेति पूर्वं व्यवस्थापितं परन्तु तत्र हेतोः प्रदर्शनं न कृतवानिति हेतुप्रदर्शनार्थं हेतुमुपदिशति सूत्रम् आनन्दप्रचुरः परमात्मेत्यत्र कारणमिदं-तथाहि "एष एवानन्दयति" (एषः परमात्मा सर्वानपि जीवान् स्वकीयानन्देन सर्वानेवानन्दयति) तत्र जीवानामानन्दप्राप्तौ परमात्मैव हेतुरूपेण प्रतिपादितो भवति । लोके एवं दृश्यते यत् यः स्वव्यतिरिक्तं कमपि स्वकीयधनेन धनवन्तं करोति स परस्मै धनदाता अवश्यमेवातिधनाढ्यो भवन्नेवान्यानपि धनवन्तं करोति, एवमेव यदा परमात्मा जीवानानन्दयति, ततश्चतस्मिन् दृष्यमान संपूर्ण आकाशादिक भूतवर्ग सृष्टिकालमें उत्पन्न होते हैं, तथैव स्थिर रहकर अन्तकालमें उसी पर ब्रह्ममें समुपहृत होते हैं) इत्यादि प्रकृतप्रकरणपठित श्रुतियोंसे उपदिष्ट होने से सिद्ध होता है कि आनन्दमय पद सर्वजगन्नियन्ता सर्वेश्वर श्रीसीताधिनाथ श्रीरामचन्द्र जी का वाचक है अन्य का नहीं। तथा "तस्माद्वा एतस्मादाकाशः" इत्यादि श्रुतिके साथ "आनन्दाद्ध्येव

मान्त्रवर्णिकमेव च गीयते ।१।१।१६॥

इतः पूर्वप्रकरणेऽस्मिन् "सत्यं ज्ञानमनन्तं ब्रह्म" इति मन्त्रेण परमात्मा प्रतिपादितः । स एव चात्र "तस्माद्वा एतस्माद्विज्ञानमयादन्योन्तर आत्मानन्दमयः 'तै २।५' इत्यादिभिर्गीयते ।१६॥

प्रचुरानन्दत्वं सुतरामेव सिद्धं भवति । एवमानन्दमयस्य परमात्मत्वे हेतुव्यपदेशोपि भवति । जगत उत्पत्तिस्थितिप्रलयकर्तृत्वरूपो व्याप्तिपक्षधर्मताविशिष्टोऽत एव अव्यभिचरितो यो हेतुस्तादृशहेतोः "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते येन जातानि जीवन्ति" इत्यादि श्रुत्या व्यपदेशात् परमात्मैवानन्दमयोभवतीति दिक् ॥१५॥

विवरणम्– इदमीयपूर्वप्रकरणे "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिरूपेण यः परमात्मा प्रतिपादितोऽभूत्, स एवेहापि "तस्माद्वा एतस्मादि" त्यादिवाक्ये आनन्दमयशब्देन प्रतिपादितो भवति नतु मन्त्रोक्तचेतनादतिरिक्तो जीवादिः । अर्थात् मन्त्रे यस्य वर्णनं कृतं तस्यैव वर्णनमानन्दमयवाक्येऽपि क्रियते न तु तदन्यस्य जीवादतिरिक्तो जीवस्य प्राप्य-

खल्विमानि" इत्यादि श्रुति की एक वाक्यता करने से यह सिद्ध होता है कि जगत्कर्तृत्व परब्रह्म में है तो उस कर्तामें ही आनन्दमयत्व भी निर्विवाद हैं ॥१५॥

सारबोधिनी–ब्रह्मज्ञानी परब्रह्म को प्राप्त कर जाता हैं, यह उपक्रम करके "सत्यं ज्ञानमानन्दं ब्रह्म" इस मंत्र में जो ब्रह्म सत्यज्ञानादि शब्द से निर्धारित हुवा है, तथा जिस परमात्मा से आकाशादि क्रम से स्थावर जंगम सकलभूत समुदाय समुत्पन्न होते हैं । जो परमात्मा सकल भूतों को उत्पन्न करके उसमें अनुप्रविष्ट होकर गुहा में अवस्थित हैं और सर्वापेक्षया आन्तर है जिस परमात्मा के ज्ञान के लिये "अन्योन्तर आत्मा अन्यो अन्तर आत्मा" यह प्रक्रान्त हुआ है वह परमात्मा मंत्र वर्ण प्रतिपादित है तदन्य जीव नहीं हैं । इस बात को बतलाने के लिए सूत्र के उत्थान पूर्वक वृत्तिकार

तया ज्ञेयतया च यः समुपदिष्टो मन्त्रवर्णैः स एवेहापि आनन्दमयशब्देन ज्ञायते नान्य इति भावः। "ब्रह्मविदाप्नोति परम्" इत्यारभ्य "सत्यं ज्ञानमानन्दं ब्रह्म""यो वेद निहितं गुहायाम्" "सो ऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" इत्यादि श्रुतिनिचये यस्य प्रतिपादनं जातं तन्मान्त्रवर्णिकम्। तदेव च ब्रह्म "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" इत्यादि वाक्येनापि आकाशादीनां कर्तृत्वेनानन्दमयरूपेण "स एको ब्रह्मण आनन्दः" इत्यानन्दाधिक्येन च गीयमानो भवतीति। यो हि परमात्मा ब्रह्मज्ञानवता जीवेन प्राप्य तथा स्थावरजङ्गमात्मकसकलप्रपञ्चोपादानतारूपेणानन्दप्रचुरतया च मन्त्रवर्णेषु श्रूयते स एव आनन्दमयपदबोध्यो भवति, न तु तदतिरिक्तः कश्चिदानन्दमयपदवाच्यो भवति, कुतः? स्वस्यैव स्व प्राप्यत्वस्यानुपपत्तेः। तस्मात् योहि जीवेन प्राप्यो मन्त्रवर्णेषु प्रतिपादितो जातः। स एवानन्दमय इत्यत्रापि प्रतिपादितो भवति।

कहते हैं कि "इतः पूर्व प्रकरणे" इस प्रकरण में हीं इससे पूर्व "सत्यं ज्ञानमनन्तं ब्रह्म" इस मंत्र में जो परमात्मा प्रतिपादित है। परमात्मा अर्थात् जिस परब्रह्म का प्रतिपादन किया गया है वही परमात्मा सकल जगत् का कर्ता तथा सकल जीव का प्राप्य है, तथा सर्व वेदान्त प्रतिपाद्य है। वही परमात्मा "तस्माद्वा एतस्माद्विज्ञानमयादयोऽन्तर आत्मानन्दमयः" इस प्रकरण से भी प्रतिपादित होता है न कि परमात्मा से भिन्न कोई जीवात्माका प्रतिपादन प्रकृत में है। क्योंकि प्राप्य तथा प्रापक में भेद सर्वानुभवसिद्ध है, तो जीव ही जीव से प्राप्त होगा तथा जीव ही उसको प्राप्त करने वाला होगा, प्राप्ति क्रिया का कर्ता तथा कर्म एक व्यक्ति किस तरह हो सकता है। अतः प्राप्ति क्रिया का कर्ता है जीव तथा उस प्राप्ति क्रिया का कर्म होता है परमात्मा, ऐसा करने से सर्व समंजस होता है। जन्माद्यस्य यतः" इस सूत्र से लेकर प्रकृत सूत्रपर्यन्तप्रकरण से सूत्रकार ने द्विभुज साकेताधिपति परब्रह्म सर्वावतारी श्रीरामचन्द्र जीको ही ज्ञेय तथा ब्रह्मज्ञानी से प्राप्यरूप से प्रतिपादन किया है।

नेतरोऽनुपपत्तेः १।१।१७॥

अथानन्दमयोऽत्र जीव एव कुतो न स्यात् स एव च मुक्तिदशा-मापन्नः समुदीरितमंत्रवर्णेनापि गीयते इति चेन्नात्रानन्दमयपदेन (ब्रह्म-ण इतरो) जीवो न प्रतिपाद्यते कुतः ? इति चेत्तस्मिन् "सोऽश्नुते सर्वा-न् कामान् सह ब्रह्मणा विपश्चिता (तैः २।१) इति तत्प्रकरणपठित-श्रुत्युक्तनिरुपाधिकविपश्चित्वादि धर्मानुपपत्तेः ।।१७॥

योऽपि जीवो मुक्तो नित्यमुक्तो वा न तस्यापि जगत्सर्जकत्वं,तत्तु ब्रह्मण एवेति जगद्व्यापारवर्जमिति सूत्रे सूत्रकारः स्वयमेव प्रतिपादयिष्यति। अतो मुक्तजीवस्यापि जगत्सृष्ट्यादिनिरासाज्जगत्कर्तापरमात्मैवानन्दमय पदवाच्यो नतु जीवः कदाचिदप्यानन्दमयवाच्य इति स्थितम् ॥१६॥

विवरणम्-- ननु न भवतु संसारो जीवस्य "सत्यं ज्ञानमनन्तं ब्रह्मे-त्याति मंत्रेण गीयमानता, योऽयं मुको जीवस्तस्यनिरस्ताखिलप्रपंच वही परमात्मा सत्यज्ञानादिस्वरूप से प्रतिपादित है तथा वही परमात्मा आनन्द-मय पद वाच्य है। इससे भिन्न कोई आनन्दमय पदवाच्य नहीं है ॥१६

सारबोधिनी-- यद्यपि सांसारिक जन्म-मरण रोग दुःखादि के सम्बन्ध से सम्बद्ध जो जीवात्मा वह, "सत्यं ज्ञानमनन्तं ब्रह्म" इस मन्त्र से प्रति-पादित नहीं हो सकता है। तथा आनन्द प्रचुर आनन्दमय पदवाच्यता को पूर्व प्रतिपादित युक्ति एवं श्रुत्यादि से प्राप्त नहीं कर सकता है। तथापि भगवत् श्री साकेतलाधिपति की उपासना से निर्गत हो गया निखिल बन्धन जिसका एतादृश मुक्त जो जीव है उसको मन्त्रवर्णगीयमानता तथा परमानन्दमयवा-च्यता होने में क्या क्षति है ! अर्थात् सांसारिक तापरहित निर्विशेष ज्ञानैक-मात्र शुद्धस्वरूप परिवृत्त मुक्तिदशा कालीक जीव तो आनन्दमय पदवाच्य हो सकता है। तब तादृश जीव का निराकरण करना उचित नहीं है। क्योंकि तादृश मुक्तिदशापन्न जीव हीं आनन्दमय प्रतिपाद्य है। एतादृश शंका का निराकरण करने के लिए तथा अग्रिम सुत्र का उत्थान करने के

त्वात् तादृशजीवस्यानन्दमयपदवाच्यता भवतु इत्याकारकशङ्कायाः उच्छेदाय प्रक्रमते "अथानन्दमयोऽत्रेत्यादि। अत्राथशब्दः प्रश्नोत्थापकः। प्रकृतेऽस्मिन् प्रकरणे जीव एव आनन्दमयवाच्यः कुतो न भवति। यद्यपि बद्धजीवे मन्त्रप्रतिपादिताधर्मविशेषा न सन्ति, परञ्च मुक्तिदशामापन्नस्य, अर्थात् यस्य जीवविशेषस्य भगवदुपासनया सकलोऽपि संसारसंबन्धोऽपगतःश्रीसाकेताधिपतेः सान्निध्यञ्चार्चिरादिमार्गे-

लिए वृत्तिकार कहते हैं— "अथानन्दमय" इत्यादि। अत्र= इस आनन्दमय का प्रतिपादक प्रकरण में आनन्दमयपदवाच्य जीव को ही कहना चाहिए। यद्यपि जीव तो, "एतस्यानन्दस्यमात्रामुपजीवन्त्यन्यानि भूतानि" [इस परमानन्द स्वरूप परमात्मा के आनन्द का एकलव का हीं अनुभव जीव करता है।] परमानन्द के एक अंश को हीं प्राप्त करता है। इस श्रुति से तथा अनुभव से भी सिद्ध होता है कि जीव में निरतिशयानन्द नहीं है। इसलिए जीव आनन्दमय नहीं हो सकता है। तथापि सांसारिक अशेष बन्धन रहित मोक्ष प्राप्त जो जीव विशेष है वह तो निरतिशय सुखादिमान् सर्वसमर्थ हो सकता है। तो एतादृश मुक्तिदशापन्न जीव "सत्यं ज्ञानमनन्तं ब्रह्म" इस मन्त्र से प्रतिपाद्य हो सकता है। तब जीव विशेष को आनन्दमय वाच्यता हो सकती है। इसके उत्तर में कहते हैं। "इति चेन्नात्र" इत्यादि। इस प्रकरण में-आनन्दमय प्रकरण में इतर ब्रह्म से भिन्न जीव चाहे वह जीव सांसारिक हो अथवा भगवान की उपासना से मुक्त हो गया हो अथवा नित्य मुक्त हो, फिर भी तादृश जीव, यहाँ आनन्दमयपद से प्रतिपादित नहीं हो सकता है। क्या यह राजाज्ञा है कि जीव आनन्दमयपदवाच्य नही हो सकता है। जब युक्ति से सिद्ध होता है। तब उसका वाणी मात्र से आप निराकरण किस तरह से कर रहे हैं। इस अभिप्राय से प्राश्निक कहता है कि "कुत इति चेदिति" जब युक्ति से सिद्ध होता है कि उक्त जीव भी आनन्दमय पदवाच्य हो सकता है। तब आप इसका निराकरण क्यों करते हैं।

ण संप्राप्तवान्, तादृशजीवविशेषे मंत्रोक्तधर्माणां समावेशसंभवादानन्दमयपदवाच्यता कुतो न स्यादित्याशयः पूर्वपक्षिणाम् तामिमां शङ्कां व्यावर्तयितुमाह "इति चेन्न" इत्यादि। अत्र आनन्दमयपदेन परमात्मभिन्नो जीवः प्रतिपादयितुं न शक्यः कुतः? यत एतत्प्रकरणे "सोऽश्नुते सर्वान् कामा"नित्यादि प्रकरणे परिपठिता ये निरुपाधिका विपश्चित्वादिका अनेकगुणास्ते तु परस्मिन् ब्रह्मण्येव वर्तन्ते न तु

इस प्रश्न के उत्तर में कहते हैं कि, "तस्मिन्नित्यादि" तस्मिन् = उस जीव में, "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" इत्यादि प्रकरण में जो निरुपाधिक सर्व विषयक असंकुचित ज्ञानवत्व लक्षण जो विपश्चित्वादिक धर्म का जगत्कारण ब्रह्म में प्रतिपादन किया है। तथा सत्यकाम सत्य संकल्पादिक कल्याण गुणादिक का प्रतिपादन किया गया है। ये सब धर्म सांसारिक दुःखादिक धर्माविष्टि अथवा तदुपलक्षित जीव में असंभवित हैं। इसलिए जीव आनन्दमयपदवाच्य नहीं हो सकते हैं। यद्यपि जीव भी भगवान् का अंश है। तथा ज्ञानादि गुणगण से अलंकृत है। तथापि यादृश धर्म को संसार को उत्पत्ति में प्रयोजकता अभिमत है शास्त्रानुमोदित है। तादृश निरतिशय सर्वविषयक ज्ञानवत्व सत्य संकल्पादिक धर्मवत्त्वादिक धर्म जीव में नहीं है। यद्यपि ज्ञान सुखादिक का तारतम्य मनुष्य से लेकर प्रजापति पर्यन्त में है। तथापि निरतिशय ज्ञानादिमत्त्व जगत्कर्तृत्व तो परमात्मा में ही है। इस विषय का विशेष विवरण "जगद्व्यापारवर्जम्" इत्यादि सूत्र लिखकर सूत्रकार ने स्वयमेव प्रदर्शित किया है। तथा श्रीमदानन्दभाष्यकार ने भी तत् तत् सूत्र व्याख्यान में विशेष रूप से विचार किया है। इसलिए ब्रह्म से भिन्न जो जीव वह आनन्दमय पदवाच्य नहीं है। किन्तु सर्वशक्तिमान् सर्वज्ञ परमात्मा श्री जानकीनाथ गरीब परवस ही हैं। इति वृत्तेरक्षरार्थः॥

भावार्थ तो इस प्रकार है। प्रकृत में सर्वशक्तिमान् परमात्मा ब्रह्म से भिन्न या ब्रह्म के अधीन जो जीव राशि हैं अथवा मोक्षदशापन्न जो जीव

सांसारिके जीवेऽतस्तादृशधर्मसंबन्धस्यासंभवान्न जीवआ नन्दमयपदप्रतिपादितो भवति, किन्तु सर्वथोपाधिधर्मविरहितः स्वभावतो निरुपाधिकधर्माश्रयानन्तकल्याणगुणगणनिलयपरब्रह्मैव तादृशानन्दमयशब्द वाच्यो भवतीति।

सूत्रार्थस्तु- एवं संपद्यते, अत्रानन्दमयपदेन परमात्मानिरुपाधिक एव गृहीतो भवति नतु तादृशपरमात्मव्यतिरिक्तो जीवः संभवति।

हैं वे मांत्रवर्णिक नहीं हो सकते हैं क्यों? तो अनुपपत्ति है। तथाहि मुक्त जीव को भी "सह ब्रह्मणा विपश्चिता" यह जो श्रुति है उस श्रुति में कथित जो निरुपाधिक विपश्चित्व धर्म तादृश धर्म की जीव में अनुपपत्ति है। एवं "सो अकामयत-प्रजाये" "सत्यकामः, सत्यसंकल्पः" इत्यादि अनेक प्रकारक श्रुतिस्मृति के द्वारा यह सिद्ध होता है कि परमात्मा में विपश्चित्व सत्य संकल्पवत्वादिक धर्म हैं। नित्य अनुपहित निरतिशय इतरानपेक्ष असंकुचित जो सर्व विषयक-सामान्य विषयक ज्ञान एतादृश ज्ञानवत्व यहीं विपश्चित्व का अर्थ होता है। एतादृश सर्वातिशायी विलक्ष ज्ञानवत्ता परमात्मा में ही है। नतु जीव में, अथवा विमुक्त जीव में हो सकता है। क्योंकि मोक्ष के पूर्व संसारावस्था में सोपाधिक ज्ञानवान् होने से निरुपाधिक असंकुचित ज्ञानाधिकरणता नहीं हो सकती है॥ ऐसा हुआ तब "यतो वाचो निवर्तन्ते" इत्यादि जो श्रुति है वह ब्रह्म को वाणि तथा मन से अग्राह्यता का प्रतिपादन ही करती है। क्योंकि प्रकरण के अंतर्गत जो विलक्षण ज्ञानवत्व जगत्कारणत्व का प्रतिपादन करनेवाली श्रुतियां हैं वे सब निरर्थिका हो जायगी। इसलिए "त्यजेदेकं कुलस्यार्थे" इस न्याय से एक का अन्यपरक सामञ्जस्य ही उचित है। अथवा असंकृत्त जो मन उससे परमात्मा ग्राह्य नहीं है। एतदर्थपरक "यतो वाचो निवर्त्तन्ते" इत्यादि श्रुति है। अत एव "दृश्यते त्वग्रया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः" इत्यादि श्रुति संस्कृत मनोग्राह्यता का प्रतिपादन करती है। जब तक जीव के अन्तःकरण में पापकर्म अड्डा जमाकर बैठा रहता है। ता-

भेदव्यपदेशाच्च ।१।१।१८।

"तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मानन्दमयः" [तै० २।५।] इत्यत्र विज्ञानमयपदवाच्याज्जीवात्परमात्मनो भेदेन व्यपदेशान्नानन्दमयोत्र प्रत्यगात्मा ।।१८।।

कथमत्र जीवो न परिगृहीतं इत्याशंक्योच्यते, अनुपपत्तेः जीवस्य परिग्रहणे अनुपपत्तिर्विद्यते. यत आनन्दमयपरमात्मानं प्रकृत्य श्रूयते यत् "सोऽकामयत बहुस्यां प्रजायेय' 'इत्यादि. तदिदं कामनादिकं शरीरोत्पत्तेः प्राक् श्रूयमाणं जीवे कथमपि न संभवति किन्तु तत्पूर्वविद्यमाने-परमात्मन्येव संभवति । तस्मादानन्दमयः परमात्मैव ।।१७।।

विवरणम्= संसारसागरान्निर्विण्णो जीवः संसारदुःख प्रहाणाय परमात्मनं प्राप्तुमिच्छति । ततश्च गुरुपदेशादानन्दमयं परमात्मनं सम्यगुपास्य तादृशोपासनाबलेन संसार दुःखमतिक्रम्य परमानन्दमहोदधिं परमात्मानं लब्ध्वा कृतार्थो भवतीति । तत्र लब्धि क्रियायाः कर्ता भवति प्रत्यगात्मा जीवो भवति च लब्धिक्रियायाः कर्म परमात्मा । तत्र यदि दृश मन से जीव परमात्मा का साक्षात्कार नहीं कर सकता है । किन्तु जब उपासनादिक विविधक्रिया करने से मन विशुद्ध हो जाता है, तब विशुद्ध मन से आत्मा का साक्षात्कार होता है। 'ज्ञानमुत्पद्यते पुसां क्षयात्पापस्य कर्मणः" ऐसा प्रकृत अर्थ का पोषक वाक्यान्तर भी है । सर्व विषयक ज्ञानवत्व तथा सत्य संकल्पवत्व सत्यकामवत्वादिक परमात्ममात्र वृत्ति धर्मों का जीव में अभाव होने से आनन्दमयपद का वाच्य न मुक्त जीव हैं, न वा साधारण जीव है । किन्तु परिशेषात् परमात्मा ही तादृश पदवाच्य है ।।१७।।

सारबोधिनी—"रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति" इत्यादि श्रुति में—रस स्वरूप परमात्मा को लाभ करके यह जीवात्मा आनन्दित होता है । इन श्रुतियों से यह सिद्ध होता है कि जीव आनन्द प्राप्ति में कर्ता है । और रस स्वरूप परमात्मा लाभ क्रिया का कर्म है । तो इस कर्तृ कर्मभाव का प्रतिपादन

कदाचित् योऽयं विज्ञानमयो जीव एवानन्दमयपदवाच्यो भवेत्तदा स एव कथमेक क्रियायाम् कर्त्ता कर्म च स्यात्। कर्तृकर्मभावश्च भेदे सत्येव भवति, नत्वभेदे भवति, यथा 'देवदत्तो ग्रामं गच्छति, इति प्रयोगो भवति तथा देवदत्तो देवदत्तं गच्छति कुतो न भवति ? तत्र कर्तृ कर्मणोरभेदात्। एवं प्रकृते यदि जीव एवानन्दमयपदवाच्यो भवेत्तदा स एव कथं लब्धा भवेत्स एव च लब्धव्यो भवेदित्येतत्सर्वं मनसि निधाय सूत्रमवतारयितुमाह "तस्माद्वा एतस्मादित्यादि। अन्नमयादिभ्यः परो योऽयं विज्ञानमयपदवाच्यो जीवस्ततः परं तद्भिन्नस्तदनन्तर किं आनन्दमयः परमात्मा विद्यते" इत्यस्मिन् तैत्तरीयवाक्ये प्रत्यगात्मपेक्षया भेदेन परमात्माव्यपदिश्यमानो भवतीति ज्ञायते। तत्र यदि कदाचिदानन्दमयपदेन जीवं कश्चित्प्रतिपादयेत्तदा. कथमत्रभेदनिर्देशः सफलोभवेदिति-भेदनिर्देशस्यान्यथाऽनुपपत्त्या. परमात्मैवानन्दमयपदप्रतिपादितो भवति। किञ्च "ज्ञाज्ञौद्वावजावीशानीशौ" "समाने वृक्षे पुरुषोनिमग्नः" [एकस्मिन् सुकृतफलभोगाधिष्ठाने शरीररूपवृक्षेविनाशिनि. निमग्नोनीशया मुह्य-

होने से जीव आनन्दमय पदवाच्य नहीं है। किन्तु परमात्मा ही आनन्दमय है। यदि कदाचित् जीव को ही आनन्दमयवाच्य मान लें तब तो वही जीव किस प्रकार से परमात्मा प्राप्ति में कर्ता तथा कर्म होगा। क्योंकि कर्तृकर्मभाव सर्वत्र भेदाधीन ही होता है। यहाँ भेद हैं व्यापक और कर्तृकर्मभाव है व्याप्य. और व्यापक का अभाव होगा तो व्याप्य का अभाव अवश्यमेव हो जाता है। अतः जीव ब्रह्म में जो यह भेद है वह अन्यथा अनुपपन्न होने से सिद्ध करता है कि जीव आनन्दमय नहीं है। किन्तु परमात्मा ही आनन्दमयपदवाच्य है। इस अभिप्राय से सूत्र का उत्थान करते हैं– "तस्माद्वा एतस्मादित्यादि।" तस्माद्वाएतस्माद्विज्ञानमयादिति" श्रुति में अन्नमयादिप्रवाह पतित जो विज्ञान जीव है उस जीव से भिन्नरूपेण परमात्मा का कथन किया है। तथा उस विज्ञानमय से इस आनन्दमय को प्राप्य कहा है। इस प्रकार

मानो दुःखात्मकफलं भुञ्जन् शोकं करोति. परन्तु यदा स्वभिन्नमुपासनया परमात्मनं विज्ञानमयो विजानाति तदा अपगतशोको भवतीत्यर्थः। "अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य" इत्यादि बहुपस्थलेषु विज्ञानात्मपरमात्मानोर्भेदोऽतिस्पष्टरूपेण श्रूयते । तथा "जगद्व्यापारवर्जम्" इत्यादि सूत्रप्रकरणे. परमात्मनि जगतः कर्तृत्वं श्रावयति विज्ञानात्मनि मुक्ते तु. तादृश कर्तृत्वाभावं श्रावयति. इति कर्तृत्वाकर्तृत्वलक्षणभेद श्रवणादपि सिद्ध्यति यदस्ति जीवात्मपरमात्मनोर्भेदः। सोऽयं भेदःसर्वथैवानुपपन्नो भवेद्. यदि आनन्दमयपदेन जीवस्य ग्रहणं स्यात् । अतः आनन्दमयपदेन जीवस्य ग्रहणन्न भवति किन्तु परमात्मन एव ग्रहणं भवति । अन्यथा जीवपरमात्मभेदप्रतिपादकश्रुतिस्मृति-सूत्र-प्रत्यक्षानुमान प्रमाणानि निर्विषयतामापद्येरन्निति ॥ तस्मात् कथमपि प्रकृतप्रकरणे जीवो नानन्दमयपदवाच्यो भवतीति वृत्त्यक्षरार्थः ॥१८॥

से जीवात्मा तथा परमात्मा में परस्पर भेद का स्पष्ट रूप से उल्लेख होने से प्रापक जो विज्ञानमय है वह प्राप्य जो परमात्मा तादृश परमात्म बोधक जो आनन्दमय पद है, तादृश पद बोध्य किस तरह से हो सकता है। अतः इस प्रकरण में आनन्दमय वाच्य परमात्मा ही है। किन्तु जीवात्मा आनन्दमयपद वाच्य नहीं है। इसी तरह, "समान वृक्ष पुरुष" इत्यादि श्रुत्यन्तर में भी जीवात्मा परमात्मा का भेद स्पष्ट रूप से प्रतिपादन किया गया है। तथा "जगद्व्यापार वर्जम्" इत्यादि सूत्र में सूत्रकारने भी जीवात्मा परमात्मा के भेद का प्रतिपादन किया है। अर्थात् इस सूत्र में सूत्रकार कहते हैं कि जो जीव मुक्त हो गया है। उसमें यद्यपि परमेश्वर सम्बन्धी अनेकों गुणधर्म आ जाता है। तथापि जगत्कर्तृत्वादिक धर्म तो नहीं ही आता है जगत्कर्तृत्व तो परमात्मा में ही रहता है। इस प्रकार जगत्कर्तृत्व तथा जगदकर्तृत्व धर्म के भेद होने से परमात्मा जीव से भिन्न है। तादृश जीवभिन्न परमात्मा ही आनन्दमय शब्द का वाच्य है। पर जीव आनन्दमयपद का वाच्य नहीं है ॥१८॥

कामाच्च नानुमानापेक्षा ।१।१॥१९॥

अस्यानन्दमयस्य "सोऽकामयत । बहुस्यां प्रजायेयेति" "इदं सर्वमसृजत् [तै.२।१।] इति श्रुतेरपेक्षामन्तरेण स्वेच्छयैव जगदुत्पादकत्वाज्जीवस्य न तथेति नानन्दमयो जीवः ॥१९॥

विवरणम्—ननु शरीरेन्द्रियादिरहितस्य निर्विकारस्य तथेतरप्रधानादिकानुमानिकापेक्षारहितस्य परमेश्वरस्य यदि जगत्कारणत्वं मन्येत तदा वैषम्यनैर्घृण्यदोषावापतेतामित्यत आनुमानिकप्रधानादि सापेक्षस्य हस्तपादादिकापेक्षासहितस्य प्राजापत्यादि जीवविशेषस्य अथवा सविकारस्यानुमानिकप्रधानस्यैव स्वातन्त्र्येण जगत्सर्जकत्वं तथा तयोःसिध्ये तदन्यतरस्यैवानन्दमयपदवाच्यत्वमपि भवतु किमीश्वरस्य जगत्कर्तृत्व तद्द्वारेणानन्दमयपदवाच्यत्व स्वीकारेणेतीमां शङ्कां निराकर्तुं वृत्तिकारः सूत्रमुत्था-

सारबोधिनी—परमात्मा तो स्वभावतः सर्व विकार से रहित है। जैसे कि [निष्क्रियं निष्कलं शान्तं निरवद्यं निरञ्जनम्] "परमात्मा सर्व प्रकारक क्रिया शून्य है। निष्कल है, शान्त है, सर्वपाप रहित है। अतएव निरञ्जन सर्व प्रकारक आध्यात्मिकादिदुःख से रहित है"। एवम् "अपाणि पादो जवनो गृहीता" परमात्मा हस्तपादादि कर्मेन्द्रिय से तथा चक्षुरादिक ज्ञानकरण से भी रहित हैं इत्यादि श्रुतियों से सिद्ध होता है कि जगत् प्रक्रिया में अपेक्षित साधनों से रहीत होने के कारण से जगत् का सर्जक तथा आनन्द मय पदवाच्य नहीं होते हैं। किन्तु उपर्युक्त साधनों से युक्त प्रजापति जीव ही कर्त्ता है, अथवा आनुमानिक सांख्य मत सिद्ध प्रधान ही जगत्कारण है । तथा इस प्रकरण में आनन्दमयपदवाच्य है। इस प्रकार की जो शंका किसी की है। उस शंका का निराकरण करने के लिए सूत्र का अवतरण करते हुये वृत्तिकार कहते हैं कि "अस्यानन्दमयस्य" इत्यादि। "सोऽकामयत" उस सर्वशक्तिमान् परमात्मा ने कामना की अर्थात् संकल्प किया कि, "बहुस्याम प्रजायेय" मैं यद्यपि एक हूँ, तथापि अनेक रूप से जडचेतनात्मक हो जाऊँ। एतादृश संक-

पयितुमाह अस्यानन्दमयस्येत्यादि योऽयं वाऽनन्दमयपदवाच्य परमात्मा स एव केवलम् "सोऽकामयत बहुस्यां प्रजायेय" "इदं सर्वमसृजत" [सः परमात्मा सृष्टि पूर्वकाले अकामयतः कामनां सङ्कल्पमकरोत् । यदहमेकोपि सहायकान्तरनिरपेक्षोऽपि बहुस्याम् । अनेकाकारक सृष्टिरचनां करिष्ये' इत्याकारक संकल्पङ्कृत्वा तदनन्तरमिदं परिदृश्यमानं स्थूलञ्चराचरलक्षणं सर्वं जगदजोजनत् सर्वस्यापि स्थावरजङ्गमसाधारणस्य जगतो रचनां कृतवानिति] परमेश्वरः कस्यचिदपेक्षामन्तरेणैव केवलं स्वकीयेच्छयैव सकलं जगदुत्पादयतीति ताः श्रुतयः प्रतिपादयन्ति । जीवविशेषः प्रजापति नैतादृश शक्तिमान् येन जगद्रचनां

ल्प "इदं सर्वमसृजत" इन परिदृश्यमान स्थूलाकाशादि जड़–चेतन सब पदार्थों का सर्जन किया, इत्यादि श्रुतियों से यह सिद्ध होता है कि उस आनन्दमय परमात्मा ने बाह्य हस्तपादचक्षुरादि साधनों से निरपेक्ष होकर के स्वकीय अमोघ संकल्प मात्र से सकल जगत् को बनाया । इसलिए एतादृश परमात्मा ही इस प्रकरण में आनन्दमय पद का वाच्य है । नतु साधनान्तर सापेक्ष अल्प शक्तिमान् तथा सावधिक ज्ञानादिमान चेतन कोई जीव. इस आनन्दमय पद का वाच्य है । यद्यपि किसी किसी स्थल में जीव कर्तृक जगत् प्रक्रिया का प्रतिपादन किया है । तथापि स्वतंत्र रूप से वहाँ भी जीव को कारणता नहीं है किन्तु परमेश्वराधीन कर्तृत्व ही उन सब में है । जिस प्रकार राजा के गौरव से राजा का अमात्य भी गौरवान्वित होकर के शासन का कर्त्ता कहलाता है उसी प्रकार परमेश्वर प्रदत्त सामर्थ्यलव सम्बन्ध से प्रजापति भी सर्जक कहलाते हैं । जैसे कहा कि 'यथा अलांबूलतायां शतशः फलान्यनुस्यूतानि तद्वत्परमेश्वर-शक्तिलतायां सहस्रशोऽण्डान्यनुस्यूतानि' इति । इस लिए इतरानधीन होकर के परमात्मा सकल जगत् का सर्जन करते हैं । तथा वही परमेश्वर इस प्रकरण में आनन्दमय वाच्य हैं । परन्तु प्रजापत्यादिक

अस्मिन्नस्य च तद्योगं शास्ति ।१।१॥२०॥

यतोऽस्य प्रत्यगात्मनोऽस्मिन्नानन्दमये "रसो वै सः। रसं ह्येवायं लब्ध्वानन्दी भवति" इति श्रुतिरानन्दयोगं शास्ति। तस्मादानन्दमयोऽत्र परमपुरुषः श्रीराम एव न जीव इति सिद्धम् ॥२०॥

इति श्री रघुवरीयवृत्तावानन्दमयाधिकरणम् ।

करिष्यति न वा प्रधानमपि विचित्रजगत्सर्जने सामयिकवदस्ति येनेदृशीं जगद्रचनां संपादयन् आनन्दमयपदवाच्यतां लभेत। अतः परिशेषात्सर्वशक्तिमान् सर्वज्ञः परमात्मैव सर्वजगत् कुर्वन्नानन्दमयपदवाच्यो भवतीति-सूत्राशयमाविष्करोति वृत्तिकार इति।

यद्यपि स्वातंत्र्येणानुमानिकस्य प्रधानस्य जगत्कारणत्वं नास्ति तथापि गौणतया तु जगत्कारणत्वमस्त्येव। अन्यथा "अस्मात्मायी सृजते विश्वमेतदि"ति श्रुति—कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते, इत्यादिस्मृति प्रतिपादितकारणताया निरालंबनत्वमेवस्यादिति दिक् ॥१९॥

विवरणम्—अथ ज्ञानकर्मसहकृतभक्तिद्वारा यो हि जीवो भगवतः सान्निध्यं यदा प्राप्नोति तदा तस्य जीवस्यानन्दविशेषस्य सम्बन्धो जीव न तो जगत् के कर्ता हैं, न वा आनन्दमयपद वाच्य ही हैं। न वा आनुमानिक अचेतन प्रधान ही स्वतंत्र रूप से जगत् का कारण है, न वा आनन्दमय पदवाच्य है। क्योंकि एक तो प्रधान जड़ है। उसमें संकल्प शक्ति जो कि चेतन धर्म है, वह नहीं है। न वा स्वतंत्र रूप से उसकी कोई अलग सत्ता ही है। इसलिए एतादृश प्रधान को जगदुत्पत्त्यादिक के प्रति कारण मानना उपयुक्त नहीं है। एवं एतादृश प्रधान प्रकृत में आनन्दमय पद का वाच्य भी नहीं है। यद्यपि स्वतंत्र रूप से प्रधान में जगत् कारणता नहीं है। तथापि चेतन साधारण पदार्थमात्र परमात्मा का शरीर है। इस दृष्टि से तो कारणता कथंचित् है ही। अन्यथा "अस्मान्मायी सृजते विश्वमेतत्" इत्यादि श्रुति बोधित कारणता को निरालंबनत्व प्रसंग हो जायगा। अतः यहाँ आनन्दमय पद वाच्यपरमात्मा ही है। न जीव है, न वा आनुमानिक प्रधान ही है ॥१९॥

भवतीति रसंह्येवायं लब्ध्वानन्दी भवतीत्यादि शास्त्रादवगम्यते, तस्मादानन्दमयपदवाच्यः परमात्मैव नतु जीव आनन्दमयवाच्य इत्येनमर्थं प्रकाशयितुमाह "अस्मिन्नस्य च तद्योगं शास्तीति । अस्मिन् हेय प्रत्यनीकानन्तकल्याणगुणविशिष्टे परमात्मनि साकेताधिपतौ, अस्य प्रपन्नस्य जीवस्य तद्योगम् विलक्षणानन्दस्य योगं सन्धिमानन्दस्य प्राप्ति शास्त्रं शास्ति प्रतिपादयति । यतो यस्मात्कारणादस्य प्रत्यगात्मनो जीवस्यास्मिन्नानन्दमयात्मके आनन्दस्य सम्बन्धं कथयति । तथाहि "रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति" [रसं रसस्वरूपं निसर्गतोरक्षण भरणादि स्वरूपं परमात्मानं यदा प्राप्नोति तदा परमात्मप्राप्त्यनन्तरमयं जीव आनन्दी भवति । स्वभावतोऽनानन्दोऽपि जीवः संम्प्राप्यानन्दलक्षणं परमात्मानमानन्दी भवति आनन्दप्राप्तिमान् भवतीत्यर्थः] अनया श्रुत्या जीवस्यानन्दमयत्वं परमात्मा प्राप्तेरनन्तरं दर्शितं यदि जीवः स्वयमेव आनन्दमयो भवेत्तदा आनन्दमयपरमात्मनः सम्बन्धानन्तरमानन्दप्राप्तेः कथनं सर्वथैवाऽसङ्गतमिव भवेत् । तस्मात् कारणात् प्रकृतप्रकरणे आनन्द-

सारबोधिनी—भक्ति तथा प्रपत्ति के द्वारा जिस भक्त विशेष ने परमात्मा श्रीसाकेताधिपति को प्राप्त कर लिया है तादृश जीव को आनन्द-महार्णव की प्राप्ति होती है ऐसा शास्त्रों में वर्णन किया गया है । तो उस वस्तु का प्रतिपादन करने के लिए वृत्तिकार सूत्र का उत्थान करते हैं "अस्मिन्नस्य च तद्योगं शास्ति" उस परमानन्द सागर में इस भगवत्प्राप्त जीव को आनन्द का योग आनन्द के सम्बन्ध को शास्त्र कहता है । इस अर्थ को वृत्तिकार स्वयमेव स्पष्ट करने के लिए कहते हैं । यतोऽस्येत्यादि जिस लिए इस प्रत्यगात्मा जीव को इस आनन्दमय परमात्मा में "रसो वै सः रसं ह्येवाऽयं लब्ध्वानन्दी भवति" परमात्मा श्रीरामजी रस आनन्द स्वरूप हैं । तादृश रस स्वरूप परमात्मा को लाभ प्राप्त करके यह जीव आनन्दित होता है । यह श्रुति कहती है कि जीव को आन-

॥ अथान्तराधिकरणमारभते ॥

अन्तस्तद्धर्मोपदेशात् ।१।१।२१।

छान्दोग्ये—एषोऽन्तरादित्ये हिरणमयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेशः आप्रणखात्सर्व एव सुवर्णः । [छा० १।१।६।] अत्रायं पुरुषः कश्चिदुपचितपुण्यविशेषः प्रत्यगात्मोत परमात्मेति संशयः शरीर श्रवणाच्चायं प्रत्यगात्मैवेति पूर्वपक्षः । अत्राभिधीयते—अत्रादित्याद्यन्तर्वृत्तिः पुरुषोत्तमः श्रीराम एव न जीवः कुतः ? तस्यैव परमेश्वरस्यापहतपाप्मत्वादिकरूपाणामसाधारणधर्माणामत्रोपदेशात् । न चैवं शरीर सम्बन्धाद्विरोध इति वाच्यम् । कर्माधीनशरीरसम्बन्धस्यैव विरोधापादकत्वात् । परमात्मनस्तु कर्मानधीनः स्वेच्छयैव शरीरसम्बन्ध इति न कश्चिद्विरोधः । विस्तरस्त्वाकरे द्रष्टव्य इत्यत्र सङ्क्षेपः ॥२१॥

मयपदवाच्यो जीवो न भवति नवा आनन्दमयवाच्यतया यस्य कस्यचिद् ग्रहणं भवति । किन्तु सकल जगत्कारणस्यानन्दसमुद्रस्य विविधकल्याणगुणाकरस्य परमपुरुषस्य साकेताधिपतेः सर्वथा निग्रहानुग्रहसमर्थस्य ग्रहणं भवति । अत आनन्दपदवाच्यः परमात्मा द्विभुजो रमानाथ श्रीराम एवेति दिक् ॥२०॥

इति जगद्गुरुश्रीरामानन्दाचार्य–रामप्रपन्नाचार्य योगीन्द्रकृतस्य श्रीरघुवरीय–वृत्ति-विवरणस्य षष्ठमानन्दमयाधिकरणम् ॥६॥

विवरणम्—अथ यथोक्तक्रमेण गतप्रकरणैः कतिपयैरप्राकृतिक लोकोत्तरनिरतिशयनिरवधिककल्याणगुणगणसमलंकृतः सर्वज्ञः सर्वश-

न्द योग होता है । इसलिए यहाँ आनन्दमयपद का वाच्य भगवान् परमपुरुष श्रीरामचन्द्रजी ही हैं । जीव परमानन्द पद का वाच्य नहीं है । क्योंकि प्राप्य प्रापक में भेद सर्वानुभव सिद्ध है । १।१।।२०।।

॥ इत्यानन्दमयाधिकरणम् ॥

सारबोधिनी—"अथातो ब्रह्म जिज्ञासा" इस जिज्ञासाधिकरण से

क्तिमान् सविशेषः स्थावरजंगमात्मकनिखिलजगतोऽभिन्ननिमित्तोपादानात्मककारणरूपश्चिदचिद्विशिष्टः परमपुरुषः सर्वेश्वरो भगवान् श्रीरामचन्द्र एवेति निर्धारितः। इतः परन्तस्यैव भगवत उपासनार्थं स्वरूपान्तरमपि विचारयितुमयमुपक्रमः क्रियते। तत्र ये जीवा अल्प पुण्यास्तेषां यद्यपि निखिलजगत्प्रतिसर्जकत्वमानन्दमयादियोगत्वञ्च श्रुति–स्मृति–प्रत्यक्षादिप्रमाणैर्बाधितस्तथापि विशिष्टपुण्यपुञ्ज समलङ्कृतानां लोकपालादीनां कदाचिज्जगत्कारणत्वादिकं संभवतीति शंकायां प्रकृतसूत्रमवतार्य निर्णेतुमुपक्रमन्नाह–"छान्दोग्ये" इत्यादि। "य एषोऽन्तरादित्ये" [आदित्यमण्डलस्यान्तरेविद्यमानो य एषः प्रत्यक्षेण परिदृश्यमानः पुरुषाकाशे हिरण्मयः सुवर्णसदृशोऽतिशयेन दीप्तिमान् हिरण्यसुवर्णसदृशश्मश्रुवान् हिरण्यसदृशसुवर्णकेशवान्. आप्रणखात्. नखान्तरमारभ्य केशपर्यन्तसर्वोऽपि सुवर्णः सुवर्णसदृशदीप्तिमानितिश्रुत्यर्थः] अत्र छान्दोग्यवाक्ये यः पुरुष श्रूयते स किं पूर्वानेकभवोपार्जितविलक्षणपुण्यपुञ्जवान् कश्चिज्जीव एवोपास्यतया

प्रारंभ करके आनन्दमयाधिकरण पर्यन्त प्रकरण से हेय प्रत्यनीक अखिल कल्याण गुणाकर सर्वशक्तिमान् सर्वज्ञ सकल जगत का अभिन्न निमित्तोपादान चिदचित् शरीरक परम पुरुष परमात्मा श्रीरामजी का निरूपण किया। अब इसके बाद उपासक व्यक्तियों का अभीष्ट सिद्धि के लिए उसी परम पुरुष परमात्मा का जो स्वरूप सविशेष है उसका ही विवेचन करने के लिए प्रक्रम करते हैं। यद्यपि अल्प पुण्यवान् सकल साधारण जो जीव वह अपनी इच्छा से सकल जगत् का कर्त्ता नहीं बन सकता है। नवा साधारण जीवों में आनन्दमय पदवाच्यता भी हो सकती है। तथापि विलक्षण पुण्यशाली जीवविशेष आदित्यादिक को तो जगत् कारणत्व तथा आनन्दमयत्व का योग भी बन सकता है। एतादृश शंका का निराकरण करने के लिए तथा अग्रिम सूत्र का उत्थान करने के लिए वृत्तिकार कहते है "छान्दोग्ये"

प्रतिपाद्यते. आहोस्वित् सर्वज्ञः सर्वशक्तिमान् परमपुरुषो यः प्रकरणसमधिगतः स एव वा समुपास्यतया प्रतिपादितो भवतीति। तत्र किं युक्तमिति जिज्ञासायां कश्चित्संपादितपुण्यप्रचयः प्रत्यमात्मैव यतो. रूपाधारादिश्रवणात्। परमात्मा तु न रूपवान् "अशब्दमस्पर्शमित्यादि श्रुतेः नवा परमात्मनः कश्चिदाधारः स्वे महिम्नि प्रतिष्ठितः इति श्रुतेः। जीवस्य आधाररूपत्वं तु संभवति तस्मात् "मर्यादाधाररूपाणि न परस्मिन् प्रकल्प्यते। तस्मादुपास्यो जीवैव विशिष्टसुकृताश्रयः"। अतोऽत्रप्रकरणे परमात्मोपास्य तया नगृहीतव्यः किन्तु संसारी एवोपास्यतया परिगृहीतव्य इति पूर्वपक्षीयः। एतादृश पूर्वपक्षनिराकरणायाह–"अत्राभिधीयते" इत्यादि योयमादित्यमण्डलमध्ये दृश्यमानोपुरुषः सर्वशक्तिमान् सर्वजगदभिन्ननिमित्तोपादानो भगवान् श्रीराम एव नतु प्राप्तपुण्यवानपि संसारी कश्चित् विभुत्वपापराहित्यात् परमात्मैव गृह्यते। नत्वल्पज्ञो ह्यणुर्जीवो इत्यादि। छान्दोग्योपनिषद में "य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेशः आप्रणखात्सर्व एव सुवर्णः" [जो यह आदित्य मण्डल के मध्य में पुरुषाकार देखने में आता है। जो सुवर्ण सदृश दीप्यमान श्मश्रुवाला है। सुवर्ण सदृश केशवाला है। और नख से लेकर के शिखा पर्यन्त सुवर्ण सदृश है। इत्यादिक धर्मवाला है।] ऐसा अधिदैवत रूप का प्रतिपादन किया गया है। तथा "य एषोन्तरक्षिणी पुरुषो दृश्यते" और जो नेत्र के अन्तर्गतप्रतिबिंबरूप पुरुषाकार पुरुष देखने में आता है। इस श्रुति में चक्षुरादिक तथा अन्य अवयव का भी कथन किया गया है। और वह पुरुष सर्वपाप से रहित है। इत्यादिक स्वरूप का वर्णन किया गया है। इसमें जीव धर्म शरीर सम्बन्ध का भी दिग्दर्शन है। तथा सर्व पाप रहित है। इत्यादि अनेक प्रकारक धर्म का जो कि परमात्मा में ही रहनेवाला है, तादृश धर्म का

गृह्यतेऽत्र कथञ्चनेति प्रकरणग्राह्यत्वं परमात्मा एव नतु जीवः· तत्र किं राजाज्ञा कारणमित्याशंकाया निराकरणाय प्राह युक्तिं दर्शयितुम् "कुतः तस्यैव परमेश्वरस्ये"त्यादि । तस्य परमेश्वरस्य सर्वशक्तिमतो ये असाधारणाः धर्मा अपहतपाप्मत्वादिकाः श्रुतौ समुपदिष्टास्तेषामेव धर्माणामपहतपाप्मत्वादीनामेवात्रोपदेशः श्रूयते । ते च धर्मा अल्पज्ञेऽणुपरिमाणवति जीवे न संभवेयुरतो जीवस्य नात्रग्रहणं, किन्तु सर्वसमर्थस्य परमेश्वरस्यैव ग्रहणं न्याय्यमिति ।

ननु प्रकृतश्रुतौ शरीरसम्बन्धः श्रूयते शरीरसम्बन्धस्तु न परमेश्वरधर्मः ? "अपाणिपादो जवनो गृहीता" अशब्दमस्पर्शमरूपम्" इत्यादि श्रुत्या शरीरसम्बन्धस्य परमेश्वरे निराकरणात् । तस्मात् शरीर सम्बन्धस्य जीवधर्मत्वात् प्रकृते जीवस्यैव कथं न ग्रहणमिति चेन्न, कर्माधीनशरीरसम्बन्धस्यैव विरोधापादकत्वात्, अयमर्थः प्राकृतिक शरीरग्रहणे कर्मण आवश्यकता भवति । यतो विनाकर्म तादृश शरीरोत्पत्तेरेवाभावात् । किन्तु परमेश्वरशरीरन्तु—भक्ततन्त्र स्वतन्त्राय

भी कथन किया गया है । अब यहाँ सन्देह होता है कि अधिदैवत आदित्य में तथा अध्यात्म चक्षु में जो पुरुष है, वह कोई पूर्वभव से उपचितपुण्यशाली जीव है । अथवा सर्वगुणसम्पन्न परम पुरुष परमात्मा उपास्य रूप से प्रतिपादित होते हैं । इसमें शरीरादि सम्बन्ध तो जीव का धर्म है । तो तादृश जीव धर्म का सम्बन्ध होने से आदित्यादिजीव ही यहाँ उपास्य रूप से प्रतिपादित होते हैं । परमात्मा नहीं क्योंकि परमात्मा में तो स्वभाव से ही शरीर सम्बन्ध नहीं है । "अशब्दमस्पर्शमरूपमव्ययम्" "अपाणिपादो जवनो गृहीता" इत्यादि श्रुतियों से परमेश्वर में शरीरादि का अभाव कहा गया है । इसलिए जीव धर्म का प्रतिपादन श्रुतिमें होने से यहाँ आदित्य मण्डल तथा अक्षि में स्थित जीव की ही उपासना है । परमात्मा का यहाँ ग्रहण नहीं हो सकता है ।

भक्ताभिष्टार्थदायिने । भक्त्यामुक्तिप्रदात्रे च राघवेन्द्राय मङ्गलम्" (राघवेन्द्रमङ्गलमाला १०) इतिपरमाचार्योक्तप्रकारेण न कर्माधीनमपितु भक्तानुग्रहाय लीलाशरीरमात्रं परिगृह्णाति सर्वसमर्थो भगवान् प्रकृतिसम्बन्धरहितम् । अतः परमेश्वरस्य तादृशशरीरसम्बन्धो न दोषाय। "अशब्दमस्पर्शमरूपमव्ययम्, "अपाणिपादो जवनो गृहीता" इत्यादि श्रुतयस्तु प्राकृतिकशरीरसम्बन्धमेव पराकुर्वन्ति नतु लोकोत्तरं तत् प्रतिक्षिपन्ति । कथमन्यथा "सहस्रशीर्षे" त्यादि श्रुतीनाम्. तथा "असक्तं सर्वभृच्चैवे" त्यादि स्मृतीनां च साफल्यं संभविष्यति। तस्मात्कर्मानधीनत्वेन स्वेच्छयाधृतशरीरसम्बन्धत्वान्नास्ति कश्चिद्विरोधगन्धोपीति । विस्तारस्त्वाकरे द्रष्टव्य इति वृत्तेरक्षरार्थः ।

भावार्थस्त्वयम् । तथाहि छान्दोग्यप्रकरणे "य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश य आप्राणखात्सर्व एव सुवर्णः" इत्यधिदैवतरूपोपदेशः कृतः । तथा "य एषोऽन्तराक्षिणि पुरुषो दृश्यते" इत्यादि । एतादृशछान्दोगवाक्येन ज्ञायते यदादित्यमण्डलेवर्तमानस्तथा चक्षुषि वर्तमानः कश्चित्

यह पूर्वपक्ष का आशय है । एतादृश पूर्व पक्ष का उत्तर करते हैं वृत्तिकार "अत्राभिधीयते" इत्यादि "अन्तस्तद्धर्मोपदेशादिति" अत्र यहाँ आदित्यमण्डल के मध्य में तथा अध्यात्म चक्षु के अभ्यन्तर में जो ये पुरुष परिदृश्यमान हो रहे हैं, वे परम पुरुष भगवान् अखिल लोक का नायक—नियामक श्रीरामचन्द्र ही हैं । क्योंकि परमात्मा का जो असाधारणधर्म है, अपहतपाप्मत्वादिक उसका श्रुति में निर्देश किया गया है । यद्यपि पुरुषपद जीव परमेश्वर उभय साधारण है । इसलिए कतिपय अन्य धर्म नियामक नहीं हो सकते हैं । तथापि कतिपय अपहतपाप्मत्वादिक असाधारण धर्मों का जो उपदेश किया गया है, वे सब तो अन्यथानुपपत्ति प्रमाणों से परमात्मारूप धर्मी का ही प्रतिपादन करते हैं । ये

पुरुष उपास्यः, इति तत्र संशयो भवति। यत् योयमुपास्य तया प्रतिपादितः स किं पूर्वभवानेकसंचितकर्मबलात्सम्प्राप्तैश्वर्यादिलक्षणः कश्चिज्जीवः संसारी वा कश्चित्। अथवा निरस्त समस्त सांसारिककर्मा परमेश्वरः इति। कुतः संशयः ? उभयलिङ्गस्यात्रदर्शनात्। दृश्यते रूपवत्त्वादिकं सर्वपाप्मराहित्यादिकञ्च। एतादृश संशयान्तरं पूर्वपक्षो भवति। यदत्र संसारी एव कश्चिद्गृहीतव्यो यतो रूपस्य श्रवणात्. आदित्यपुरुषे, "हिरण्यश्मश्रुरि" ति कथितम्, तदेव च रूप चाक्षुषेप्यतिदेशेन प्रापितम्। परमात्मनस्तु-रूपाभावाद् ग्रहणन्न संभवति "अशब्दमस्पर्शमरूपमव्ययम्" इत्यादि शास्त्रेण परमेश्वरस्य तन्निषेधात्। एवं परमेश्वरस्य प्रतिकूलमाधारश्रवणमप्यस्ति "य एषोऽन्तरादित्ये" "य एषोऽन्तराक्षिणी" इत्यादि। नहि सर्वाधारस्य परमेश्वरस्य कश्चित्पदार्थोधिकरणं संभवति "स्वे-महिम्नि प्रतिष्ठित" इत्यादिना परमेश्वराधारस्य निराकरणात्। एव-मैश्वर्यस्याप्युभयत्रमर्यादा श्रूयते। न च मर्यादा रहितस्यैश्वर्यमर्यादावत्वं भवति निरतिशयैश्वर्यत्वात्। तस्मात् सूर्यमण्डले चक्षुषि च परिदृश्य-

यह जो अपहतपाप्मत्वादिक धर्म समुदाय हैं, वे किसी भी प्रकार से जीव में सम्बद्ध नहीं हो सकते हैं। इसलिए आदित्यमण्डलान्तर्वर्त्ती परमात्मा ही है। अल्पज्ञ जीव आदित्य मण्डलस्थ पुरुष पद से तथा चक्षुरवस्थित पुरुषपद से बोध्य नहीं होता है। यद्यपि अपहतपाप्मत्वादिक धर्म रहने के कारण से परमात्मा का ही यहाँ ग्रहण होता है, जीव का नहीं। तो शरीर सम्बन्ध के उपदेश होने से तो जीव का ही ग्रहण होना चाहिए ब्रह्म का नहीं क्योंकि शरीर सम्बन्ध तो जीव का ही असाधारण धर्म है। परमात्मा में तो शरीर सम्बन्ध असंभवित है। तथा शरीर सम्बन्ध तो परमात्मत्व का बाधक है। तथापि शरीर सम्बन्ध जो बाधक है वह पुण्यापुण्यकर्म प्राप्त जो शरीर है वह, ऐसा तो परमात्मा

मानः सम्प्राप्तपुण्यप्रचयः कश्चिज्जीवविशेष एवोपास्य तया परिगृहीतव्यो नतु परमेश्वरोऽसंभवादिति पूर्वपक्षे सति सूत्रमुपस्थापयति "अन्तस्तद्धर्मोपदेशा"दिति आदित्यस्यान्तर्मध्ये चक्षुर्मध्ये वा निविशमानः पुरुषः परमात्मैव नतु जीवः। यतस्तस्यः परमेश्वरस्य ये धर्माः शास्त्रे प्रतिपादितास्तेषामेव धर्माणामिहाप्युपदेशदर्शनादिति सूत्रार्थः। अर्थात् परमेश्वर एवात्र गृहीतव्यो यतः पारमेश्वरा ये धर्माः सर्वपाप रहितत्वादयस्ते इहोपदिश्यमाना वर्तन्ते। अतः परमेश्वरस्यैवात्रग्रहणं नतु धर्मप्रधानकस्यापि जीवनिवहस्य कथञ्चित्तेषां पाप कर्मणः संभवात्। न च शरीरसम्बन्धो बाधकः समस्तचिदचिच्छरीरकस्य ब्रह्मणः शरीरसम्बन्ध भक्तानुग्रहार्थ इति वेदान्ततन्त्रासिद्धत्वात्। तथाचाहुराचार्यप्रवराः श्रीराघवानन्दाचार्याः–"चिदचिद्भ्यांविशिष्टाय शिष्टपक्षसुरक्षिणे। सच्चिदानन्दरूपाय राघवेन्द्राय मङ्गलम्॥ ब्रह्मणे परिपूर्णाय कार्यकारणरूपिणे। शार्ङ्गिणे पूर्णकामाय राघवेन्द्राय मङ्गलम्॥

में नहीं है। तो तादृश शरीर का सम्बन्ध जीव ही में है, अप्राकृतिक लोकोत्तर भक्तानुग्रहार्थ स्वेच्छा संपादित जो शरीर है, जिस शरीर को धारण करके श्रीसाकेताधिपति कहलाते हैं, उस शरीर को परमात्मत्व की बाधकता नहीं है। कर्माधीन जो शरीर है, वही परमात्मत्व का विघातक होता है। इतर शरीर विघातक नहीं है। अपितु पोषक है। इसलिए आदित्यमण्डल में एवं चक्षु के अभ्यन्तर में जो पुरुष परिदृश्यमान होता है, जिसको "सूर्यमण्डलमध्यस्थं रामं सीता समन्वितम्,

नमामिपुण्डरीकाक्ष ममेयं गुरुतत्परम्॥ (सर्वेश्वरी श्रीसीताजी के साथ सूर्य मण्डलमध्यस्थ वात्सल्यमूर्ति अनादि अनन्त पुण्डरीकाक्ष श्रीरामचन्द्रजी को सर्वतो भाव से मैं नमन करता हूँ सनत्कुमारसंहितास्थ श्रीरामस्तवराज ४९) इत्यादिप्रकार से शास्त्र ने उपास्य रूप से प्रतिपादन किया है, वह पुरुष भगवान् श्रीरामात्मक परमात्मा ही है। नतु प्राप्तपुण्योत्कर्षवान् जीव है।

भेदव्यपदेशाच्चान्यः ॥१।१।२२॥

अत्र परमात्मनो जीवस्य च भेदो व्यपदिश्यते । "य आदित्ये तिष्ठन्नादित्याद्यन्तरः" [बृ० ३।१।९।] "यश्चक्षुषि तिष्ठन् चक्षुषोऽन्तर [बृ० ३।७।१८।] 'य आत्मनि तिष्ठन्नात्मनोऽन्तरः (बृ. ३।७।२२।) इत्यादि श्रौतवचनैस्तस्मादयमादित्याद्यन्तरवस्थितोऽन्यः परमात्मैव ॥२२॥

इतिश्रीरघुवरीयवृत्तावन्तरधिकरणम् ॥७॥

भक्ततन्त्रस्वतन्त्राय भक्ताभीष्टार्थदायिने । भक्त्यामुक्तिप्रदात्रे च" इत्यादिरूपेण। अथवा प्राकृतिकशरीरसम्बन्ध एव कथञ्चिद् बाधको नतु स्वेच्छामात्रगृहीतोऽप्राकृतिकदिव्यशरीरसम्बन्धस्तथेति कृतमधिकप्रपञ्चेनेति दिक् ॥ २१ ॥

विवरणम्—जीव परमात्मनोर्लक्षणभेदात्तयोः परस्परं भेदो भवति। यथा गन्धवत्त्वोष्णस्पर्शवत्वलक्षणयोर्भेदात् पृथिवी तेजसोर्भेदः । एवमेव नित्यज्ञानवत्वानित्यज्ञानाधिकरणत्वलक्षणयोर्भेदात् परमात्मजीवात्मनोरपि भेद एवेति। भेदादिसत्त्वात् परस्परौ तौ भिन्नावेवेत्याशयेन प्रकृत प्रकरणे नैव जीवग्रहणमपितु परमात्मनो ग्रहणं भवतीति तयोर्भेददर्श-

यद्यपि सूर्यादि देवों में भी अतिशयित पुण्य है । तथापि लेशतः उनका पुण्य पाप से आघ्रात ही रहता है । इसलिए इन लोगों का पतन भी होता है। विशेष तो भाष्य व्याख्यान से ही जानना चाहिए ॥२१॥

सारबोधिनी— आदित्य मण्डल के मध्य में परिदृश्यमान हस्तपादादि अवयव युक्त सुवर्णवत् देदीप्यमान पुरुष तथा चक्षु में अवस्थित जो पुरुष है वह जीव कोई है कि परमेश्वर है ? इस प्रकार के सन्देह के बाद पूर्वपक्ष में कहा गया कि अवयवादिक से शरीर का सम्बन्ध सूचित होता है। इसलिए पूर्व भवीय प्रकृष्ट पुण्य के बल से कोई जीव ही आदित्यमण्डल में तथा चक्षु में व्यवस्थित है । इसी जीव की उपासना करनी चाहिए । परमात्मा में तो, 'अपाणिपादो जवनो गृहीता' अशब्दमस्पर्शमरूपम-

नायोपक्रमन् सूत्रावतरणं कुर्वन्नाह "अत्र परमात्मनो जीवस्य च भेदो व्यपदिश्यते" इत्यादि। सकल जगतोऽभिन्ननिमित्तोपादान-स्वरूपब्रह्मणस्तथाऽनित्यज्ञानादिमतो जीवस्य च परस्परं भेदः प्रतिपादितो भवति, तस्मादादित्यमण्डले चक्षुषि च परिदृश्यमानः पुरुषः परमात्मैव भवितुमर्हति नतु जीवः। कुतः ? तयोः परस्परं भेदव्यपदेशात्। ननु भेदव्यपदेशलक्षणो हेतुः प्रदर्शितः स च हेतु स्वरूपासिद्धः, इति भेदमेव दर्शयितुं श्रुतिमुदाहरति "य आदित्येतिष्ठन्नादित्यादन्तरोयमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरोयमयत्येष ते आत्मा" "यश्चक्षुषि तिष्ठन् चक्षुषोऽन्तरो यं चक्षुर्नवेद यस्यः चक्षुः शरीरं यश्चक्षुरन्तरो-यमयति" "य आत्मनि तिष्ठन् आत्मनोन्तरो यमात्मानवेदयश्यात्माशरीरं य आत्मानमन्तरो यमयति। [यः परमात्मा आदित्य मण्डले तिष्ठति सर्वदैव तथा आदित्यात् सूर्यादन्तरः, यं च पुरुषं सूर्यः स्वयं न वेद विजानाति यदयंक इति। यं स्वाभ्यन्तरेवर्तमानं परमात्मानम्—आदित्यः कोयम दभ्यन्तरे तिष्ठतीत्येवं प्रकारेणनापि जानाति यस्य परमात्मन आदित्यः शरीरस्वरूपः स्वाश्रयरूपः। यश्च परमात्मा सूर्याभ्यन्तरे वसन् सूर्यं नियमयति, अर्थात् आदित्यस्यापि नियंत्रणं करोति। तेन परमात्मना

व्ययम्' इत्यादि श्रुति से शरीर सम्बन्ध का अभाव सुनने में आता है, अतः परमात्मा नहीं है। नवा परमेश्वर उपास्यता रूप से प्रतीत होते हैं। इत्यादि रूप से महा आडम्बर से जो पूर्वपक्ष किया था, उसका उत्तर करने के लिए सूत्र का उत्थान करते हुए कहते हैं, "अत्र परमात्मनो जीवस्य च" इत्यादि। इस प्रकरण में परमात्मा तथा जीवात्मा का भेद प्रतिपादन किया गया है। "य आदित्ये तिष्ठन्" इत्यादि जो आदित्य के मध्य में रहता हुआ आदित्य से भी अन्तर है। जिसको आदित्य नहीं समझ सकते हैं कि यह कौन है ! जिसका आदित्य शरीर है और अन्तर्यामित

नियंत्रित एव सूर्यादि यथाकालमुदेति तपति स्व स्व व्यापारे व्यापारयति च लोकान् स्वप्रकाशादिना–भयादस्याग्निस्तपति भयात्तपतिसूर्यः भयादिन्द्रश्च" इत्यादि श्रुत्यन्तरे प्रतिपादनात् । तथैवाहु भगवन्तः श्रीप्रस्थानत्रयानन्दभाष्यकारा जगद्गुरवः श्रीरामानन्दाचार्याः श्रीवैष्णवमताब्जभास्करे–

"विश्वं जातं यतोऽद्धा यदवितमखिलं लीयते यत्र चान्ते
सूर्यो यत्तेजसेन्दुः सकलमविरतं भासयत्येतदेषः ।
यद्भीत्या वाति वातोऽवनिरपि सुतलं याति नैवेश्वरोज्ञः
साक्षी कूटस्थ एको बहुशुभगुणवानव्ययो विश्वभर्त्ता"

इत्याद्यनेकरुपेण प्रदर्शितो यः परमपुरुष स एव तमात्मा नियामकः परश्चेति श्रुत्यर्थः ।] इत्यादिका अनेका श्रुतयः आदित्यादिजीवेभ्यः परमात्मनो भेदं प्रदर्शयन्ति । उद्धृतश्रुतिवचनैः सिद्धो

या आदित्य को नियंत्रित करता है । यह आत्मा सर्व शक्तिमान् सर्वज्ञ चिदचिद् जगत् प्रपंच का अभिन्न निमित्तोपादान कारण है । और परित्यक्त सकल कर्म जनित सांसारिक धर्म से रहित तथा अप्राकृतिक अनन्त कल्याण गुणों का पारावार–योगियों से ज्ञायमान सर्व वेदान्त वेद्यतथा ज्ञेय एवं विजिज्ञास्य भी है । एवं "जो चक्षु में रहता हुआ चक्षु से अन्तर है, जिसको चक्षु नहीं समझ सकती है, जिनका चक्षु शरीर है, और जो चक्षु को अपने नियंत्रण में रख रहा है" । तथा जो विज्ञात्मा के अन्दर में विद्यमान है । जो जीव से अन्तर है, जिसको जीवात्मा नहीं समझ सकता है, एवं जो जीवात्मा को नियंत्रित करता है ।" इत्यादिक बृहदारण्यकीय श्रुति तथा, "भयादग्निस्तपति भयात्तपतिसूर्यः" इत्यादि अन्य श्रुति से, "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति" इत्यादि स्मृति पुराणों से सिद्ध होता है कि परमात्मा जड़–चेतन समस्त पदार्थों से भिन्न होता है । तो एतादश श्रुत्यादि सिद्ध परमात्मा हीं आदित्य मण्डल में अवस्थित है । और तादश पर-

भवति यत् परमात्मा आदित्यादिभ्यो भिन्नः स एव सर्वेषामभ्यन्तरश्चेति ततश्च परमात्मनो भिन्नाञ्जड़चिदात्मकान् सर्वानेव पदार्थान् परमेश्वरस्य शरीरत्वेन नियाम्यत्वेन, शरीरित्वेन,तत्तज्जीवानामन्तरात्मत्वेन नियमनकर्तृत्वेन च व्यपदेशं कृत्वा जड़—चित्पदार्थयोर्नियामकतारूपेण परमात्मजीवात्मनोः परस्परं भेदमेव समुपस्थापयन्ति प्रकृत श्रुतिस्मृतयः। अस्मादेव कारणादादित्यादिजीवेभ्यः सर्वथा विलक्षणः सर्वेश्वरः परमात्मा यश्चादित्यादि मण्डलान्तः वर्तते स सर्वेभ्यो भिन्नः स एव चात्रोपास्यतया प्रतिपादितो ननु पुण्यप्रकर्षविशिष्टः कश्चिज्जीवोऽत्रोपास्यतया प्रतिपादितो भवति। यदपि पूर्वमुक्तं शरीरसम्बन्धादादित्यण्डलान्तर्गतो जीव एव परमात्मनः शरीराभावादिति तदपि न शोभनम्। कर्माधीन शरीराभावेपि स्वेच्छामात्रकल्पितशरीरसम्बन्धे बाधकाभावादित्यादिकं सर्वं यथा शास्त्रं विवेचयन्ति शास्त्रकुशला इति ॥२२॥

इति जगद्गुरु श्रीरामानन्दाचार्य—रामप्रपन्नाचार्य योगीन्द्र कृतस्य श्रीरघुवरीय वृत्तिविवरणस्य सप्तममन्तराधिकरणम् ॥७॥

मात्मा ही उपास्य है। नतु पूर्व भवीय विशिष्ट युक्त कोई जीव। न वा जीव इसमें उपास्य रूप से प्रतिपादित होता है। किन्तु परमात्मा ही उपास्य है। जो कि पूर्वपक्ष में कहा था कि यहाँ शरीर सम्बन्ध का कथन है। तो परमेश्वर का तो "अपाणिपादो जवनो गृहीता" "अशब्दमस्पर्शम रूपम्" इत्यादि श्रुति से शरीराभाव का प्रतिपादन किया है। अतः शरीरवान् कोई जीव ही है परमात्मा नहीं है। यह पूर्वपक्ष तो अविदित श्री मदानन्दभाष्याशय व्यक्ति को हीं शोभित होता है। क्योंकि सर्व शक्तिमान् सर्वशरीरक भगवान् श्रीराम में शरीर प्रतिषेधक श्रुतियों का अभिप्राय है कि कर्म संपादित शरीरवान् भगवान् नहीं हैं। किन्तु लोकोत्तर अप्राकृतिक स्वेच्छाधृत शरीर का निषेधक तो श्रुति नहीं है। अन्यथा, "सर्वकर्मा सर्वगन्धः" इत्याद्यनेक श्रुतियों का बाध हो जायगा। इस लिए प्रतिषेधक श्रुति

अथ आकाशाधिकरणम् ॥८॥

आकाशस्तल्लिङ्गात् ।१।१॥२३॥

छान्दोग्योपनिषदि–'अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुपद्यन्त आकाशं प्रत्यस्तं यन्ति" (छा० ।१।९॥१॥)इति श्रूयते । अत्र किमाकाशशब्देन भूताकाशस्य ग्रहणमुत परस्यैव ब्रह्मण इति संशयः । प्रसिद्धत्वाद् भूताकाशस्यैव ग्रहणमिति पूर्वपक्षः । अत्राभिधीयते प्रोदीरितश्रुतिवाक्य आकाशशब्देन

विवरणम्–इतः पूर्वस्मिन्ननन्तराधिकरणे परमात्मनोऽसाधारणगुणदर्शनात्त स्यैव विवक्षित गुणवत उपासनम् । न तु कथमप्यादित्यशरीराभिमानि तथा अन्य आचार्यों का भी अभिप्राय है कि प्राकृतिक शुभाशुभ कर्मजनित शरीर से रहित तथा तादृश शरोराभाव का ही प्रतिषेध है । एवं परमात्मा का शरीर है इस वस्तु का प्रतिपादन अन्य श्रुतियाँ भी करती हैं । अतः दिव्य देहवान् अनन्त कल्याण गुणाकर परमेश्वर हैं । भिन्न रूप में प्रतिपादित है । तादृश परमात्मा का ही इस प्रकरण में ग्रहण किया जाता है नतु जीव का ग्रहण ॥२२॥

सारबोधिनी– "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविसन्ति" इत्यादिक जो कारण वाक्य हैं । तादृश वाक्य घटक कारण वस्तु के प्रतिपादन करनेवाले शब्द समुदाय हैं उन सबका कारण में पर्यवसान होनेसे परम पुरुष वाचकता है । इस बात को स्पष्ट करने के लिए सूत्रोत्थान पूर्वक वृत्तिकार कहते हैं–छान्दोग्योपनिषदित्यादि" छान्दोग्योपनिषद में "अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते । आकाशे प्रत्यस्तं यान्त्याकाशोह्येभ्यो ज्यायानाकाशः परायणम्"[परिदृश्य स्थूल चराचर लक्षण. इन लोगों की गति, आधार अर्थात् कारण क्या है !ऐसे प्रश्न के उत्तर में कहा कि "यह

सर्वजगत्कारणस्य परमात्मन एव ग्रहणम् । सर्वभूतोत्पादकत्वं सर्वस्माज्ज्यायस्त्वं सर्वाश्रयत्वञ्चेत्यादिलिङ्गजातं परब्रह्मण्येव समन्वेति । 'एतस्मादात्मन आकाशः सम्भूतः' इत्यादि श्रुतिष्वाकाशस्योत्पत्तिरभिधीयते इति न तस्य सर्वभूतोत्पादकत्वमित्यत्राकाशः परमात्मा ॥२३॥

इति श्रीरघुवरीयवृत्तावाकाशाधिकरणम् ॥८॥

नो जीवात्मन उपासनमिति निरूपितम् । इदानीन्तु तस्यैवासाधारणधर्मदर्शनेन परमात्मन एवोपास्यत्वेन ग्रहणं न तु लोकप्रसिद्धभूताकाशस्याकाशपदेन ग्रहणमित्यस्मिन् प्रकरणे निरूप्यते । तत्र 'आकाश इति होवाच' इत्यत्र किं मुख्याकाशपदानुरोधेन "अस्य लोकस्य का गति" इति 'सर्वाणि ह वा इमानि भूतानि' इति च । 'जायानिति' च परायणम् एतानि सर्वाणि कथंचिद् व्याख्यायतामथवा एतेषां पदानामनुरोधेन आकाशशब्द एव गौणिवृत्त्या परमात्मनि व्याख्यायताम् । तत्र प्रथमत्वात् प्रधानत्वादाकाशपदमेव मुख्यम् । एतदनुरोधेन ज्यायस्त्व परायणत्वादिकानि व्याख्यायतामित्येव निश्चयः । 'अस्य लोकस्य का गति रिति प्रश्नस्योत्तरे 'आकाश इति होवाच' इत्याकाशस्य गतित्वेन प्रतिपाद्यतया प्राधान्यात् 'सर्वाणि हवा' इत्यादीनां सर्वेषां तद्विशेषणतया गौणत्वात् । बहुनामप्यप्रधानानां प्रधानानुरोधेनैव

आकाश सबका कारण हैं यह परिदृश्यमान सब भूत आकाश से समुत्पन्न होते हैं और प्रति सर्गकाल में आकाश में ही प्रलीयमान हो जाते हैं । आकाश इन भूतों से ज्यायान् बड़ा है । आकाश सबका आधार प्रतिष्ठा है ।"] अब यहाँ सन्देह होता है कि आकाश पद से भूताकाश का ग्रहण होता है, अथवा परमात्मा का ग्रहण किया जाय । क्यों यह सन्देह होगा ? तो संशय का प्रयोजक यह आकाश शब्द है भूताकाश तथा पर ब्रह्म इन दोनों में आकाश शब्द का प्रयोग होता है । भूताकाश में तो आकाश शब्द का प्रयोग लोक में अति प्रसिद्ध ही है और लोक में शास्त्र में तथा ब्रह्म में भी आकाश शब्द का प्रयोग

व्याख्यानं युक्तम् । किं च 'आकाश इति होवाच' इत्युत्तरप्रतिपादक वाक्ये प्रथमावगतमाकाशमनुपजातविरोधि ततश्च तदनन्तमागतं यत् तत्सर्वं गुणवृत्त्यागतमिति जघन्यतया उपसंजातविरोधि । अतोऽनुपसंजाताधीन आनुकूल्येनोपसंजातविरोधिनो व्यवस्थापनं कर्त्तव्यम् । न च कदाचित्चिदाकाशशब्दो गौणो वृत्त्यां परमात्मनि प्रयुक्त इति सर्वत्र तथैव प्रयोगः कर्त्तव्यः । नहि कदाचित्कारणवशाद् 'गङ्गायां घोषः' इत्यत्र गंगापदं तात्पर्यानुपपत्त्या तीरबोधकं भवतीति,गङ्गायां नौकेत्यत्रापि किं गङ्गापदं लाक्षणिकमेव भवतु । न च प्रकृते प्रथममपि आकाशपदं मुख्योऽनेकार्थत्वस्यान्याय्यत्वात् । गौणी वृत्त्यापि ब्रह्मणि प्रयोगस्योपपत्तेः । लोके चाकाशपदस्य रूढ़त्वदर्शनात । तत्पूर्वकत्वाच्च वैदिकार्थप्रतीतेस्तद्वैपरीत्यस्यानुपपत्तेरित्यादिकं सर्वमनसि निधायाह वृत्तिकारः 'आकाशस्तल्लिङ्गा' दिति सूत्रमुदाहर्तुं छान्दोग्योपनिषदि इत्यादि । अस्य लोकस्य का गति रित्याकाश इति होवाच सर्वाणि ह वा इमानि भूता

देखने में आता है । जैसे, "कोह्येवान्यात् कः प्राण्याद्यदेष आकाश आनन्द न स्यात्" [कोई भी अनन क्रिया तथा प्राणन क्रिया को नहीं कर सकता यदि आनन्दरूप यह आकाश अर्थात् परमात्मा नहीं होता] इत्यादि स्थल में आनन्द स्वरूप परमात्मा में भी आकाश शब्द से भूताकाश का ग्रहण किया जाय अथवा परमात्मा का ग्रहण किया जाय । इसमें पूर्वपक्ष होता है कि आकाश पद के भूताकाश में रूढि होने से प्रथमोपस्थित है । तथा इसी प्रकरण के वाक्य शेष में "आकाशाद्वायुः" इत्यादि में वाय्वादि क्रम से आकाश में कारणता का भी उल्लेख किया है और "आत्मन आकाशः संभूतः" यहाँ भी आत्मा शब्द का अर्थ है आकाश । क्योंकि सूक्ष्माकाश से भूताकाश उत्पन्न होता है । "एवं सदेव सोम्येदमग्रे" इत्यादि स्थल में भी सत्पदबोध्यता सूक्ष्माकाश को ही है । इसलिए प्रकृत में आकाश पद बोध्यता भूताकाश ही है अतः उसी का ग्रहण होता है । परमात्मा

ज्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यान्ति। आकाशो ह्येवेभ्यो ज्या
यानाकाशः परायणम्' अस्य परिदृश्यमानस्य चराचर लक्षणस्य लोकस्य
गतिः आधारभूतः कः? इति प्रश्ने उत्तरितम्। योयमाकाशः स एव सर्व
लोकानामाधारलक्षणः कुतः? यतः इमानि परिदृश्यमानानि सर्वाणि
पृथिव्यादिभूतानि आकाशादेव समुत्पद्यमानानि भवन्त्याकाशे एव स्थि-
तिकाले स्थितानि भवन्ति। पुनश्च प्रतिसर्गकाले आकाशे एव प्रलीनानि
भवन्ति। तथा अयमाकाश एभ्यः परिदृश्यमानपदार्थेभ्यो ज्यायान
तीव महान् परायणः सर्वेषामाश्रयश्च भवतीति सारार्थ एवं क्रमेण श्रुतिषु
श्रूयते। अत्र किमाकाश शब्देन भूताकाशस्य ग्रहणं भवति यद्वा सर्व
जगन्नियामकस्य परमात्मनः परमपुरुषस्य ग्रहणं भवति।
उभयबोधकलिङ्गस्य दर्शनात्। प्रसिद्धिर्भूताकाशग्रहणे लिङ्गम्
उपपत्तिस्तु परमात्मनो ग्रहणमित्युभयो लिंङ्गदर्शनाद् भवति संशय
इति। तत्र प्रकृते आकाश पदेन लोकप्रसिद्धभूताकाशस्यैव ग्रहणं
आकाशपदवाच्य नहीं है। यह हुआ पूर्वपक्ष। इस पूर्वपक्ष के उत्तर करने के लिए
वृत्तिकार कहते हैं "अत्राभिधीयते" इत्यादि। पूर्व कथित "अस्य लोकस्य
का गतिः" इस श्रुति वाक्य में आकाश शब्द से सम्पूर्ण स्थूल सूक्ष्म जड़ा-
जड़ साधारण जगत् का कारण जो परम पुरुष परमात्मा है उसका ही ग्रहण
होता है। क्योंकि ब्रह्म का बोधक जो अव्यभिचारी लिङ्ग है सर्वजगत्
कर्तृत्व सर्वापेक्षया ज्यायस्त्व परायणत्वादिक वह यहाँ उपलभ्यमान हैं। यह
जो सर्व जगत्कर्तृत्वादिक धर्म है सो ब्रह्म का अव्यभिचारी है। वह ब्रह्म
व्यतिरिक्त में अनुपपन्न है। इसलिए प्रकृत में आकाश पद का बोध्य ब्रह्म ही
हैं भूताकाश नहीं है। क्योंकि भूताकाशमें सर्वजगत्कर्तृत्व सर्वापेक्षया ज्यायस्त्व
तथा सर्वाधारता नहीं हैं। यद्यपि वायु प्रभृति को भूतों के प्रति कारणता तद
पेक्षया ज्यायस्त्व परायणत्व है, तथापि सर्वपदवाच्यान्तर्गत आकाश के प्रति-
जनकता आकाश का नहीं हैं। यदि कहें कि वाय्यादिकों का कारणत्व तथा
महाभूताकाश के प्रतिजनकता तो सूक्ष्माकाश को है, तब आकाशजनकत्व तो

कर्त्तव्यम् । यतो लोकप्रसिद्ध्या झटिति समुपस्थितो भवति तथा प्रधा नतया च । न तु परमात्मनो ग्रहणं यतः परमात्मनि गौणी वृत्त्या कुत्रचिद् वाकाशशब्दःप्रयुज्यमानो भवतीति स गौणः । मुख्यस्य गौणस्य वा ग्रहण मिति संशये मुख्यस्यैव ग्रहणं न्याय्यं न तु गौणस्य, कुत्रचित्कोपि शब्दो गौणोदृष्टः कारणबलात्प्रयुक्त इति तावता सर्वत्र तादृश शब्दस्य गौ णवृत्त्या ग्रहणं कर्त्तव्यमिति न नियमः । किं तात्पर्यानुपपत्या गङ्गाप्रवाहे घोषस्य सम्बन्धासंभवेन तीरे प्रयुज्यमानो गंगा शब्द 'गंगायां नौका' इत्यादि सर्वस्थलेषु गंगापदं लाक्षणिकमेवेति । तद्वत्प्रकृते परब्रह्मणि कारणबलात् प्रयुज्यमानो गौणीवृत्त्या. आकाश शब्द परब्रह्मण्येव प्रयुज्य मानः स्यादिति न । तस्मात् प्रकृते श्रूयमाण आकाश शब्दो रूढ्या भूताकाशस्यैव वाचको नतु परमेश्वरस्य वाचक इति पूर्वपक्षाशयः

तमिमं पूर्वपक्षाशयं दूषयितुकाम प्राह– "अत्राभिधीयते" इत्यादि । "अस्य लोकस्य का गति रीत्याकाश इति होवाच" होता है। यह भी कहना ठीक नहीं है। क्योंकि सूक्ष्माकाश भी तो भूताकाश हीं है। तो उसके प्रति उसकी जनकता नहीं होने से आकाश-पदवाच्यता भूताकाश को नहीं है। किन्तु प्रकृत में आकाश पदबोध्यता ब्रह्म को ही है। यद्यपि "सर्वाणि हि भूतानि आकाशादेव जायन्ते" यहाँ आकाश पद प्रथमोपस्थित तथा असंजात बिरोधी है। क्योंकि उस समय में इसका विरोधी कोई नहीं है। और ज्यायस्त्वादिक जो है वह द्विती-योपस्थितिक है संजात विरोधी हैं। अतः असंजात बिरोधी प्रथमोपस्थित भूताकाश से संजात विरोधी द्वितीयोपस्थित ज्यायस्त्वादिक धर्म श्रवण से विरोध होने के कारण ज्यायस्त्व धर्म को लक्षण करके आपेक्षिक ज्यायस्त्व अर्थ करने से भूताकाश में भी आपेक्षिक ज्यायस्त्व को लेकर भूताकाश का भी ग्रहण हो सकता है। तथापि अन्यथानुपपत्ति प्रमाण सहकृत संजात विरोधी के अपेक्षा से आकाशपद का ही परमात्म बोधकता है। यह कोई नियम नहीं है कि प्रथमोपस्थित असंजात विरोधी द्वितीयोपात्त संजात विरोधी

इति पूर्वकथितवाक्ये आकाशशब्देन स्थावरजंगमसाधारणसर्वजगदुत्पादकस्य सर्वज्ञसर्वशक्तिमद्‌ विशिष्टस्य परमपुरुषस्यैव ग्रहणं भवति । कुतः ? तस्य परमात्मनो बोधकानि लिङ्गानि ज्यायस्त्वपरायणत्वादिनि तानि सर्वाणि प्रकृते विद्यन्ते, अर्थात्सर्वभूतोत्पादकत्वं भूताकाशे न विद्यते । यद्यपि पवनादारभ्य औषधिपर्यन्तस्योत्पादकता विद्यमानापि सर्वभूतान्तर्गताकाशोत्पादकता आकाशे नास्ति । नहि स्वस्मादेवस्वस्योत्पत्तिर्जायमाना दृष्टान्यत्र ततश्चाकाशादिसहितसर्वभूतोत्पादकता सामञ्जस्येन परमात्मन्येवावकल्प्यते । एवं सर्वापेक्षया ज्यायस्त्वमप्याकाशे न भवति । तत्र यत् ज्यायस्त्वं तत्तु सापेक्षं पवनादि भूतान्तरेभ्यो निरंकुशं ज्यायस्त्वन्तु परमात्मनः सर्वशरीरत्वात् । सर्वपरायणत्वमर्थात् सर्वाश्रयत्वमपि भूताकाशे नास्ति । नहि भवति भूताकाशो भूताकाशाश्रयत्वं परमात्मा तु सर्वेषां स्थूलसूक्ष्मानामाश्रयोऽत एव सर्वस्य प्रतिष्ठा । ततश्चैतेषां सर्वकारणत्वसर्वज्यायस्त्वसर्वाश्रयत्वादिधर्माणां भूता-

का बाध करे, शुक्तिकामें जो 'इदं रजतम्' यह ज्ञान होता है वह प्रथम असंजात विरोधि है । परन्तु उत्तरकाल में आगत संजात विरोधि "नेदं रजतम्" इस बाधक ज्ञान से पूर्व का बाध हो जाता है उसी तरह प्रकृत में भी समझना चाहिए । इन विषयों को लक्ष्य में लेकर के वृत्तिकार कहते हैं "सर्वभूतोत्पादकत्वमित्यादि" "सर्वाणिहवा इमानि भूतान्याकाशादेव" इत्यादि श्रुति प्रतिपादित सर्व जगत्कारणत्व निरतिशयज्यायस्त्व सर्वाश्रयत्वादि रूप जो अव्यभिचारी परब्रह्म ज्ञापक लिङ्ग समुदाय है जो कि असंकुचित कारणता ज्यायस्त्व सर्वाश्रयत्व का बोधक है । सो तो यथावत् परब्रह्म में ही घटित होता है । भूताकाशादिक में नहीं । भूताकाशादिक में जो कारणता है वह तो संकुचित अर्थात् यत् किंचित् कार्य के प्रति ही कारणता है । नतु असंकुचित सर्व पदवाच्य कार्य मात्र के प्रति कारणता है । यदि यत् किंचित् कार्य के प्रति कारणता होने से भूताकाश का ग्रहण हो तब तो यतकिंचित् कार्य के प्रति कारणताशाली तो अनेकों पदार्थ हैं । तो उन सबका ग्रहण क्यों

काशेऽसंभवात् परस्मिन् पुरुषे चैतेषां संभवादात्मैवाकाशपदबोध्यो भवति नतु भूताकाशपदवाच्योऽपि भूताकाशो भूताकाश पदेन परिगृहीतो भवति। यदि कदाचित् त्वदीयानुरोधेनाकाशपदस्य भूताकाशपरत्वं स्वीकुर्वीत तदापि गतिर्नास्तीत्यत आह "तस्माद्वा एतस्मादात्मन" इत्यादि। तस्मात् सर्व जगत्कारणात्सर्वज्ञपरमेश्वरादाकाशः संभूतः संजातः, अनया श्रुत्या आकाशस्यापि समुत्पत्तिर्दर्शिता। तस्मात् स्वयं जायमानो भूताकाशः कथं सर्वभूतानां जनकः स्यात् सर्वशब्दवाच्याकाशस्याकाशजनकत्वासंभवात्। नहि घटो घटाज्जायते। न च 'परमात्मजातोप्याकाश आकाशेतरभूतानां समुत्पादक' इत्यर्थकरणे प्रोदीरित श्रुतेः सार्थक्यं स्यादेवेति वाच्यम्। सर्वपदस्य संकोचे प्रमाणाभावादिति। तस्मादाकाशादेव समुत्पद्यन्ते इति श्रुतावाकाशपदेनासंकुचितसर्वपदघटितभूतोत्पादकत्वं सर्वजगत्कारणस्य परमात्मन एव संभवति। नतु यत्किंञ्चिदुत्पादकस्य भूताकाशस्य ग्रहणमिति वृत्त्यक्षरार्थः। विस्तारार्थस्तु सूत्रस्य भाष्याद्याक-

नहीं किया जाय? एवम् "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" [सर्व शरीरक उस परमात्मा से आकाश उत्पन्न हुआ है।"] एतादृश अनेक श्रुतियों में आकाश की उत्पत्ति होती है ऐसा प्रतिपादन किया गया है। असंकुचितसर्वपदवाच्य कार्य के प्रति कारणता आकाश में सिद्ध नहीं होता है। अतः प्रकृत में आकाश पद ब्रह्म का ही बोधक है। जो कि परमानन्दमयस्वरूप है।

और भी देखिये "सदेव सोम्येदमग्रे" "बहुस्यां प्रजायेय" आत्मा वा इदमेक अग्र आसीत्" "स इमांल्लोकानसृजत" "तस्माद्वा एतस्मात्" इत्यादि अनेक श्रुतियों में अनन्त कल्याण गुण परमात्मा में ही सर्व जगत्कारणत्व सर्वाश्रयत्व का प्रतिपादन किया है। और "सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते" इस एक ही श्रुति में भूतोत्पादकत्व आकाश में बता-

॥अथ प्राणाधिकरणम्॥९॥

अत एव प्राणः।१।१।२४॥

उद्गीथविद्यायां 'प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता' इत्यारभ्य "कतमा सा देवतेति प्राण इति होवाच" [छा० १। ११।४।] इति श्रूयते। अत्र प्राणशब्देन किं भूतवायुरभिधीयते परमात्मावेतिसंशयः। भूतवायौ प्राणशब्दस्य प्रसिद्धत्वाद्वायुविकार एवेति पूर्वः पक्षः। सिद्धान्तस्तु पूर्वा-

---

रग्रन्थव्याख्यानादेव विशेष जिघृक्षुभिरवगन्तव्य इति संक्षेपः ॥२३॥

इति जगद्गुरु श्रीरामानन्दाचार्यरामप्रपन्नाचार्ययोगीन्द्रकृत

श्रीरघुवरीयवृत्तिविवरणस्याकाशाधिकरणम् ॥८॥

विवरणम्ः-पूर्वस्मिन्नाकाशाधिकरणे रूढ्या प्रथमोपस्थितोऽपि भूताकाशो नाकाशपदेन ग्राह्यः किन्तु सर्वभूतोत्पादकत्वसर्वभूताश्रयत्वादि परमात्मलिङ्गदर्शनेन परमाकाशस्य परमात्मन एव ग्रहणम्। परमेश्वरे एव सर्वभूतोत्पादकत्वादिधर्माणां संभवादिति कथितम्। यद्यपि "यो-

या गया है। अतः अनेक श्रुति से अनुमोदित परमात्मा में ही जगत्कारणत्व मानना उचित है। यही आनन्दभाष्यकार का मत है। ॥२३॥

इत्याकाशाधिकरणम् ॥८॥

सारबोधिनी-जिस प्रकार इससे अव्यवहित पूर्व आकाशाधिकरण में आकाश पद का प्रयोग भूताकाश में तथा परमात्मा में होता है, तो आकाश पद भूताकाश का वाचक है कि परमात्मा का वाचक है। ऐसा सन्देह होने से भूताकाश में प्रसिद्ध है आकाश पद इसलिए आकाश पद से भूताकाश का ही ग्रहण है। ऐसा पूर्वपक्ष करके सर्वाश्रयत्व सर्वजनकत्वादि परमेश्वर लिङ्ग दर्शन होने से आकाश पदबोध्य परमात्मा ही है भूताकाश नहीं है। ऐसा सिद्धान्त किया गया है। उसी तरह प्रकृत प्रकरण "प्रस्तोतर्या देवता" इस प्रकरण में भी प्राण पद से परमात्मा का ही ग्रहण होता है। किन्तु वायु

धिकरणोदितन्यायातिदेशेनात्र प्राणशब्देन परमात्मन एव ग्रहणम् । सर्वोत्पादकत्वसर्वाश्रयत्वादिलिङ्गानां न वायुविकारे क्वचिदपि सम्भवस्तस्मादत्र प्राणः परमात्मैव ॥२४॥

इति श्रीरघुवरीयवृत्तौप्राणाधिकरणम् ॥९॥

गाद्भूढेर्वलीयस्त्व''मिति प्रथमोपस्थितत्वाद्वायुप्रभृतिकभूताद्युत्पादकत्वेन भूताकाशस्यैव ग्रहणं न्याय्यम् । तथापि अव्यभिचरितान्यानुपपत्ति सहकृतलिङ्गस्यैव प्राधान्यमिति कृत्वा संजातविरोधिनोऽपि लिङ्गस्यैव प्राधान्यमित्यादि युक्त्या परमात्मन एवाकाशपदेन ग्रहणं कर्त्तव्यमिति सिद्धान्तितम् ।

इहापि प्राणपदेन सर्वजगत्कारणस्य परमात्मन एव ग्रहणं कर्त्तव्यं प्रसिद्धिमतिक्रम्येत्यादिकं विचारयिष्यतीति '''अतएव प्राणः'' इति सूत्रेतिप्रसङ्गमुत्थापयितुं प्रक्रमते ''उद्गीथविद्यायामित्यादि । छान्दोग्योद्गीथविद्याप्रकरणे ''स्तोतर्या देवताप्रस्तावमन्वायत्ता'' इत्यारभ्य ''कतमा सा देवतेति प्राणएवेति हो वाच सर्वाणि ह वा इमानि भूतानि'' [हे प्रस्तोतः या खलूपास्यदेवता प्रस्तावे समनुगता सा का देवता तस्याः

विकार रूप जो प्राण है उसका ग्रहण नहीं होता है, इत्यादि वस्तु का प्रतिपादन करने के लिए वृत्तिकार उपक्रम करते हैं । ''उद्गीथविद्या-या।'' मित्यादि । ''प्रस्तोतर्यादेवता प्रस्तावमन्वायत्ता'' हे प्रस्तोता जो यह प्रस्ताव में अनुगत है, इत्यादि उपक्रम करके वह देवता कौन है ? ऐसा उपस्ति ने कहा । तब उसके बाद कहा कि प्रस्ताव में आगत यह देवता प्राण है । क्योंकि प्राण से ये परिदृश्यमान सब भूत पदार्थ उत्पन्न होते हैं । और प्राण में ही ये सब स्वाप काल में विलियमान हो जाते हैं । इस प्रकार छान्दोग्य के उद्गीथ विद्या के प्रकरण में सुना जाता है । अब यहाँ सन्देह होता है कि प्राण से किसका ग्रहण किया जाय, वायु विकार प्राण का, अथवा परम

स्वरूपादिकं किमिति प्रश्नमुत्थाप्य. प्रस्तावे या देवता सा प्राणरूपैवेत्युक्तवान्। तत्रोपपत्तिरपि प्रदर्शिता यानीमानि भूतानि तानि प्राणादेव निर्गतानि भवन्ति प्रातः काले स्वावासस्थितनीड़ाद्वयांसीव। पुनः स्वापकाले तस्यामेव प्राणदेवतायां प्रविशन्ति। दिनात्यये वयांसीव स्वनीडे सा एषा देवता प्रस्तावे समनुगतेति। हे प्रस्तोतो यदि तादृश देवतायाः स्वरूपप्रकारभेदादिकमजानानाः स्तुतिं करिष्यति तदा ते शिरः कवन्धात्पतिष्यतीति चाक्रायण उषस्तिः प्रोवाचेति मंत्रार्थः।] अत्र संशयो भवति यदत्र प्राण पदेन वायुविकारस्य प्राणस्य ग्रहणं कर्त्तव्यमथवा सर्वं कारणस्य परमेश्वरस्य। उभयोर्ग्राहकहेतुसद्भावस्य दर्शनात्। वायु विकारात्मकप्राणग्रहणे हेतुर्लोकप्रसिद्धिशास्त्रप्रसिद्धिश्च। परब्रह्मण ग्रहणे "प्राणस्य प्राणम्" "प्राण बन्धनं हि सोम्य मनः" इत्यादि श्रुतिरित्युभयोः कारणदर्शनाद्भवति संशयः। "भूतवायौ प्राणशब्दस्य प्रसिद्ध-

पुरुष परमात्मा का? क्योंकि प्रसिद्धि से प्राणपद वायु विकार प्राण का बोधक है। तथा "प्राण बन्धनं सौम्य मनः "प्राणस्य प्राणम्" इत्यादि श्रुति से परमात्मा का भी प्राण शब्द से ग्रहण होते हुए देखा गया है। इसलिए सन्देह होता है कि प्राण शब्द से किसका ग्रहण किया जाय? इसमें पूर्व पक्ष होता है कि प्राण शब्द से वायु विकार को ही लिया जाय, क्योंकि लोक में प्रसिद्धि ऐसी ही है इसलिए प्रथमोपस्थित है, तथा प्राणपद को शक्ति वायुविकार प्राण में ही है। अतः प्राणपद से वायु विकार प्राणपद का ही ग्रहण है। यद्यपि प्राणपद प्रयोग परमात्मा में भी होता है। "प्राणस्य प्राणम्" इत्यादि प्रकरण में तथापि आत्मा में जो प्राणपद का प्रयोग है वह "गङ्गायां घोषः" के समान लाक्षणिक है। और लाक्षणिक प्रयोग वहाँ ही होता है जहाँ मुख्यार्थ का अन्वय बोध में कोई बाधक हो। जैसे "गङ्गायां नौका" इसमें पद लाक्षणिक नहीं है। क्योंकि

त्वाद्वायुविकार एवेति पूर्वपक्षः" इति वृत्तिः। सकल साधारणोपि लोकः प्राणपदेनवायुविकारात्मकं श्वासोच्छ्वासलक्षणमेव विजानाति यदा एवं लोके प्रसिद्धि स्तदा वेदेप्यवग्राह्यो "लोकावगतसामर्थ्यःशब्दो वेदेऽपि बोधकः" इति न्यायात्। नहि लोके घट पदेन घटो बोध्यते तदा वेदे घट पदेन पटो गृहीतो भवति, शाब्दबोधकता सामर्थ्यस्योभयत्रापि समानत्वादिति। ततश्च प्रसिद्धिबलात्प्राणस्य वायुविकारस्यैव प्रकरणेऽस्मिन् परिग्रहः कर्त्तव्य इति पूर्वपक्षाशयः। तदेवं संशयपूर्वपक्षयोरनन्तरं सिद्धान्तं प्रदर्शयितुं सूत्रमनुसरन्नाह "सिद्धान्तस्तु" इत्यादि। आकाशाधिकरणप्रतिपादितप्रकारेणात्रापि प्रकरणे प्राणपदेन परमात्मन एव ग्रहणं न्याय्यं न तु पूर्वोपस्थापितवायुविकारभूतस्य लोकप्रसिद्धस्येति सूत्राशयं

मुख्यार्थ बोध में बाधक नहीं है। इसलिए परमात्मा में जो प्राणपद का जब प्रयोग होगा तब लक्षणावृत्ति से ही। जब कि शक्ति से निर्वाह हो सकता है तब जघन्यलक्षणा वृत्तिका आश्रय युक्त नहीं है। अतः प्राणपद वायु विकार प्राण का ही बोधक है। यथा कथंचित् तोड़ मरोड़ करके लक्षणा से अथवा अन्य प्रकार से परमात्मा का ग्रहण करना ठीक नहीं है। यदि कहों कि वेदान्त तो परमात्मा का बोधक है, चेतन ब्रह्म के कारणता का प्रतिपादक है, यह प्राचीनों का प्रवाद विनष्ट हो जायगा ? तो यह कथन भी ठीक नहीं है। क्योंकि प्राचीन प्रवाद राजाज्ञा नहीं है। यदि युक्ति तर्क से पदार्थ की सिद्धि होती है तो प्राचीन का प्रवाद बाधक नहीं हो सकता है। ऐसा अन्यत्र भी कहा है—"नहि कस्यचिद्विपरीतलेखनं युक्तिबलाद्वस्तु सिद्धौ बाधकमिति" अतः सिद्ध होता है कि प्रकृतपदवाच्य वायुविकार प्राण ही है। किन्तु प्राणपद बोध्य परमात्मा नहीं है। सर्वज्ञ के परिग्रह में लक्षणादिक दोष है।

एतादृश पूर्व पक्ष का निराकरण करने के लिए सूत्रोपन्यासपूर्वक कहते हैं "सिद्धान्तस्तु" इत्यादि। "अत एव प्राणः" जिस तरह आकाश

मन्वानः। तथाहि अतएव आकाशाधिकरणीयाकाशवाक्यवत् प्राणवाक्येपि संकोचरहितसर्वभूतादिस्रष्टृत्व सर्वज्यायस्त्व सर्वाश्रयत्वादि विविधाव्यभिचारिब्रह्मलिङ्गानामत्रापि प्रकरणे दर्शनात्। नहि संकोचरहिता इमे स्रष्टृत्वादिकाः धर्माः परमात्मातिरिक्तं कुत्रचिदपि परिदृष्टा भवन्ति। ततश्चैतादृश धर्माणां परमात्मव्यतिरिक्ते समन्वयासंभवात्परमात्मनि च तत्समन्वयस्य संभवात्प्राणपदेन परमात्मैव गृहीतो भवति न तु वायुविकारात्मकप्राण इति। किंच "यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मनः स यदा प्रबुध्यते प्राणादेवाधिजायंते" ॥ [अयं करणकलेवरोपलक्षितस्तद्विशिष्टो वा पुरुषो यदा यस्मिन् स्वपिति। अर्थात् निवृत्तबाह्य आभ्यन्तर सकलकरणग्रामो भवति तदा तस्मिन् समये तस्य वागिन्द्रियमुपलक्षक-

वाक्य में सर्व स्रष्टृत्व सर्वज्यायस्त्व सर्वपरायणत्वादिक अव्यभिचरित परमात्मक हेतु के रहने से आकाशपदवाच्य परमात्मा को माना गया है। उसी तरह प्राणादि वाक्य में सर्वभूत संवेशन उद्गमनादि परमात्मबोधक सामग्री का रहने से प्राणपद का वाच्य परमात्मा ही है। क्योंकि आकाशादि सकल स्थूल सूक्ष्म चेतन अचेतन प्रपंच का उत्पादक तथा सर्वापेक्षयाज्यायान् सर्व का आश्रय परमात्मा ही हैं। यदि वायु विकार प्राण का ग्रहण करें वह तो उपपन्न नहीं हो सकता है। क्योंकि वायु सर्वोत्पादक नहीं है। सर्वभूत पद से आकाश वायु का भी ग्रहण होता है। तो वायु कदाचित् तेजः प्रभृतिक भूत उत्पादक है भी परन्तु स्वकारण आकाश का उत्पादक नहीं है। स्व स्व का कारण नहीं होता है आत्माश्रय दोष होने से, तथा कारण का कार्य जनक नहीं होता है, अव्यवहित पूर्व क्षण वृत्तित्व लक्षण कारणत्व का अभाव होने से कार्य कारण भाव की परिभाषा ही विलुप्त हो जायगी। प्राणपद से परमात्मा का ग्रहण करते हैं तब कोई भी

मेतत् सकल कर्मेन्द्रियस्य सकलकर्मेन्द्रियं प्राणं परमात्मानमप्येति परमात्मनि विलीयमानं भवति। एवमेतस्य चक्षुरिन्द्रियं प्राणमप्येति प्राणपदबोधितपरमात्मनि विलीनं भवति श्रोत्रेन्द्रियमपि तत्रैव परमात्मनि विलीयमानं भवति। भवन्ति च विलीयमानानि परमात्मनि सर्वाणि ज्ञान करणानि नैतदेव किन्तु ज्ञानेन्द्रियकर्मेन्द्रिययोः संचालकमुभय साधारणं जीवस्य सर्वार्थक्रियोपकारणमान्तरेन्द्रियं मनोऽपि प्राणपदवाच्ये परमात्मनि विलीनमिव भवति। पुनश्च निद्राजनककर्मण उपरमणानन्तरं जाग्रत्कर्मणः समुदये जागरितामवस्थामापद्यते तदा तस्मिन् काले सर्वाण्येव करणानि प्रसुप्तानि पुनः प्राणपद बोध्य परमात्मनः सकाशादाविर्भूतानि भवन्ति निशावसाने वयांसीवस्वनीड़ादित्युदाहृतश्रुतेरर्थः] इत्यादि श्रुतौ प्राणपदवाच्य परमात्मनि सर्वज्ञे सर्व जगत्कारणे एव भूतानां संवेशनोद्गम-

दोष नहीं होता है। इतना ही नहीं प्रत्युत श्रुति का सहकार भी मिलता है। "तस्माद्वा एतस्माद्वा" इत्यादि अनेक श्रुत्यन्तर में। तथा प्रकृत प्रकरणान्तर्गत श्रुति से सिद्ध होता है कि परमात्मा सर्व जगत् का उत्पत्ति स्थिति विनाश का कारण है। सब पदार्थ का आश्रय है। सबसे बृहत्परिमाणवाला है। इसलिए इतने श्रुति तथा युक्ति के अनुरोध से 'त्यजेदेकं कुलस्यार्थे" इस न्याय से एक लोक प्रसिद्धि का त्याग करना ही उचित है। ऐसा मान करके परम पुरुष परमात्मा का ही यहाँ प्राणशब्द से ग्रहण होता है नतु विकारात्मक प्राण का ग्रहण होता है। यही निष्कण्टक राज-मार्ग है। और भी देखिये, "यदा वै पुरुषः स्वपति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मनः" [जिस समय में यह पुरुष सो जाता है उस समय में वागादिक कर्मेन्द्रिय प्राणपदवाच्य परमात्मा में लीन हो जाते हैं। प्राण में श्रोत्र, चक्षु प्रलीयमान हो जाते है। और मन भी उस प्राणपद वाच्य परमात्मा में प्रलीयमान हो जाता है। और जब वह पुरुष निद्रा को छोड़

अथ ज्योतिरधिकरणम् ॥ १०॥

ज्योतिश्चरणाभिधानात् ।१।१।२५॥

छान्दोग्ये-"अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेषु' (छा० ३।१३।७।) इत्याम्नायते । अत्र किमादित्यादिरूपं किमपि ज्योतिरुच्यतेऽथवा तज्ज्योतिषोऽपि प्रकाशः परमात्मा? तत्र ज्योतिः शब्दस्यादित्यादिज्योतिष्येव प्रसिद्धत्वात्तदेवोच्यत इति पूर्वःपक्षः।

मनादिकानि प्रतिपादयन्ति । तस्मात् प्राणपदबोध्योऽस्मिन्प्रकरणे परमात्मैव नतु वायुविकाररूपः प्राणः प्रस्तावगतदेवतापदेन ग्राह्यः । यद्यपि प्राणपदेनात्र परमात्मनो ग्रहणे तस्य गौणीवृत्तिराश्रिता स्यात् । सा च न युक्ता. तथापि नहि सर्वत्र पदेन मुख्यार्थमेव विवक्षितं भवतीति नियमः, तथा सति शक्त्यप्रवृत्तिस्थले पदनैष्फल्यप्रसङ्गादतः शक्तिवत्लक्षणाया अपि पदवृत्तित्वेन स्वीकारात्प्रकृतप्रकरणे प्राणपद बोध्यः परमात्मैव न तु वायुविकारः प्राण इति संक्षेपः ॥२४॥

इति जगद्गुरुश्रीरामानन्दाचार्य-रामप्रपन्नाचार्ययोगीन्द्रकृतस्य श्रीरघुवरीयवृत्तिविवरणस्य प्राणाधिकरणम् ॥९॥

करके प्रबोधावस्था में आता है तब पुनः उसी प्राणपदवाच्य परमात्मा से चक्षुरादिकरण पुनः प्रादुर्भूत हो जाते हैं । जिस तरह प्रातःकालः में पक्षिगण आवास वृक्षस्थित स्वकीय स्वकीय निड़ [घोंसलों] से निकलते हैं] । इत्यादिक श्रुति से होता है कि परमात्मा स्वरूप प्राण में ही इन्द्रियों का संवेशन तथा उद्गमन का कथन किया गया है । परन्तु वायु विकार रूप प्राण से संवेशन अथवा उद्गमन नहीं कहा गया है । इससे सिद्ध होता है कि प्रकृत में प्राणपद से सकल जगत् का कारण सर्वज्ञ परमात्मा का ही ग्रहण होता है । किन्तु वायुविकार लक्षण प्राण का ग्रहण नहीं किया जाता है । अतः प्राणपदवाच्य परमात्मा श्रीसाकेताधिपति ही हैं । यह वृत्ति का पिण्डितार्थ हुआ ॥२४॥

इति प्राणाधिकरणम् ॥९॥

अत्राभिधीयते ज्योतिरत्रपरंब्रह्मैव। कुत इति चेत्। चरणाभिधानात्। एतद्वाक्यात्पूर्ववाक्यम् "एतावानस्य महिमा ततोज्यायांश्च पुरुषः। पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवीति" छा०।३।१२।६। इत्यादिरूपं वर्तते। तत्र कृत्स्नस्य जगत एकपादत्वमभिधाय नित्यविभूतिरूपस्य स्वधाम्नस्त्रिपात् पदेनाभिधानाद् ब्रह्मणस्सर्वभूतचरणत्वमभिहितम्। एवञ्च परमपुरुषो द्युसम्बन्धितयात्र प्रतिपाद्यत इति तस्यैव ज्योतिश्शब्दवाच्यत्वम् ॥२५॥

विवरणम्:- इतः पूर्वाधिकरणे परमपुरुषस्य ब्रह्मणो लिङ्गदर्शनाद् वायुविकारोपि प्राणशब्दः स्वकीयवायुविकारात्मकार्थात् प्रच्याव्य परमात्मरूपेऽर्थे विनियोजितः। इह प्रकरणे तु तादृश परमपुरुषस्यलिङ्गमस्ति न वेति संशयात् यदि ब्रह्मलिङ्गमत्रोपलभेत, तदा प्रकृतेऽपि ब्रह्मण एव ग्रहणं स्यात्। यदि ब्रह्मलिङ्गो न स्यात्तदातद् ग्रहणं नस्यादिति ब्रह्मविचारणार्थमेव ज्योतिश्चरणाभिधानादिति सूत्रमुपस्थापयित्वा विचारणां करिष्यतीति वृत्तिकारस्तादृशं संशयमुपस्थापयितुं प्रक्रमते 'छान्दोग्ये' इत्यादि। छान्दोग्यश्रुतावेवं श्रूयते यत् 'यदतः परोदिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेषु अनुत्तमेषूत्तमेषुलोकेषु' इत्यादि। (यदिदं

सारबोधिनी- इसके पूर्व प्राणाधिकरण में परमात्म बोधक लिङ्ग था। इसलिए प्रसिद्धि बल से प्राप्त भी वायु विकारात्मक प्राण का ग्रहण न करके परमात्मा ही प्राणपद वाच्य हैं ऐसा सिद्ध किया गया। परंतु प्रकृत प्रकरण में ब्रह्म का लिंग है अथवा नही है इस बात का निश्चय करने के लिए संदेह का उपस्थापन करने के लिए वृत्तिकार प्रक्रम करते हैं "छान्दोग्ये" इत्यादि। छान्दोग्योपनिषद में "अथ यदतः परो दिवोज्योतिर्दीप्यते" इसके आगे द्युलोक के ऊपर जो ज्योति प्रकाशित होता है। सबके ऊपर में, जो यह ज्योति सकल प्राणीवर्ग के ऊपर में तथा सर्व भूरादिलोकों के ऊपर सम्पूर्ण संसार मण्डल के ऊपर में प्रकाशित होता है वह ज्योति क्या है ? जो

विलक्षणं ज्योतिः प्रकाशः अन्तोदिवः, द्युलोकात्परमपिदोप्यते प्रकाशितं भवति । तद् विश्वतः पृष्ठेषु विश्वेषां सर्वेषामुपरिप्रकाशते । अत्र सर्वनामवाची विश्वशब्दः सन्देहरहितः सर्वमेवजगन्मण्डलं प्रकाश्यत्वेन कथयति । तदेवश्रुतिः स्वयमेवोपपादयति । "सर्वतः पृष्ठेषु सर्वेषां भास्यमानानामुपरितनदेशे भासते । उत्तमेषु उत्तममिदं ज्योतिः परिदृश्यमान सर्व ज्योतिषाऽपेक्षयाप्युत्तमम् । न केवलमुत्तममात्रमपितु सर्वोत्तमम्, अर्थात्प्रकृतज्योतिषोऽपेक्षयातिरिक्तोऽन्यः कोप्युत्तमो न भवतीति भावः । "इदं वाव तद्यदिदमस्मिन् पुरुषेऽन्तर्ज्योतिः" पूर्वोक्त विशेषण विशिष्टं तज्ज्योतिः त्वग्ग्राह्यशरीरसम्बन्धिरुष्मणा तथा श्रोत्रेन्द्रिय ग्राह्यपिहितकर्णपुटेन पुरुषेण घोषात्मकविलक्षणशब्देनानुमीयमानं भवति । तत्र शरीरस्योष्मणस्त्वगिन्द्रियेण दर्शनमेव दृष्टिः तथा घोषस्य च श्रवणमेव श्रुतिस्तयोश्च दृष्टश्रुतितादृशज्योतिष एव नान्यस्य । एतादृश हेतुना विलक्षणज्योतिषोऽनुमानादित्युदाहृत श्रुतेरर्थः ।) एतादृशश्रुतौ

इस पुरुष के अभ्यन्तर में विद्यमान है । यह उदाहृत श्रुति का अर्थ है । इस प्रकार से इस मंत्र में कहा गया हैं । तो इस कथन में क्या सूर्य चन्द्रमा के ज्योति का कथन है । अथवा आदित्यादि ज्योति का भी प्रकाशक जो परमात्मा है तादृश परमात्मा का ज्योति शब्द से कथन है । क्योंकि ज्योति शब्द प्रकाशक अर्थपरक है, तो आदित्यादिक प्रकाशक हैं । तथा परमात्मा भी सर्व जगत का अवभासक हैं । अतः उभय साधारण ज्योति शब्द का प्रयोग होने से यहाँ सन्देह होता हैं कि प्रकृत में किसका ज्योति शब्द से ग्रहण किया जाय ? तो यहाँ पूर्वपक्ष होता हैं कि ज्योति शब्द की प्रसिद्धि तो आदित्य प्रभृतिक प्रकाशक में ही है अतः लौकिक प्रसिद्धि होने से आदित्यादि ज्योति का ही ग्रहण होना चाहिए । और परमात्मा का उपस्थापक कोई कारण नहीं है इसलिए परमात्मा का ग्रहण नहीं किया जा सकता हैं । यह पूर्वपक्ष होता है ।

यत् ज्योतिः श्रूयते, तादृशं ज्योतिः भौतिकस्यादित्यादेः, किंवा "यस्य भासा सर्वमिदं विभातीत्यादि" श्रुतिबोधितपरमपुरुषस्य तज्ज्योतिरिरिति संशयः। यतो ज्योतिः शब्दस्योभयत्रापि प्रयोगदर्शनात्। आदित्यादिप्रकाशकपदार्थेष्वपि ज्योतिः प्रयोगो दृश्यते। सर्वभासकपरमपुरुषे ज्योतिःशब्दस्य प्रयोगो भवतीत्यत्र वक्तव्यमेव किम् "तमेवभान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाती" त्यादि श्रुतौ ज्योतिः शब्दाभिधेयत्वं परमपुरुषे समुपपन्नमेव तस्मात् छान्दोग्योदाहृतश्रुतिश्रवणे भवति संशयो यदिह ज्योति शब्देन कस्य ग्रहणं कर्त्तव्यमिति सन्देहस्वरूपं प्रदर्शितवान वृत्तिकारः "अत्रकिमादित्यादिरूपम्" इत्यादि। अत्र प्रकृत श्रुतौ–सूर्यादिपदार्थभासकस्य कस्यचित् सूर्यादिज्योत्तिषः प्रतिपादनं भवति अथवा सूर्यादि ज्योतिषापि परमपुरूषः कथितो भवति ज्योतिः पदेनोक्तो भवतीति संशयः। तत्र लोके ज्योतिः शब्दप्रयोगे परप्रकाशकवह्निसूर्यादि वस्तुन एव बोधदर्शनादादित्यादिरेव ज्योतिः पदेन गृहीतव्यः। भवति हि प्रयोगो यत् नैशंतम आदित्यज्योतिषैव विनाशितं स्यान्नान्येनोपायान्तरेणेति। ततश्च ज्योतिः पदेन प्रकृते सूर्यादिप्रकाशकस्यैव ग्रहणं न तु परमात्मनो यतो ब्रह्मणो बोधकलिङ्गस्याभावात्। आकाशादि प्रकरणे यथा

यहाँ ज्योति शब्द का प्रतिपाद्य परमात्मा ननीं हैं यह जो पूर्वपक्ष हैं उसका निराकरण करने के लिए वृत्तिकार कहते हैं– "अत्राभिधीयते" इत्यादि। अब यहाँ ज्योति पद का वाच्य क्या हैं? आदित्यादिक ज्योति अथवा परमात्मा, इसका समाधान यह है कि प्रकृत में ज्योति पद वाच्य परमात्मा हीं है। इसमें क्या कारण हैं? इस प्रश्न का समाधान वृत्तिकार सुत्र के अवयव से करते हैं। "चरणाभि [illegible]नात्" यहाँ इस मन्त्र से चरण पद का कथन है। अर्थात् इस वाक्यसे पूर्व का वाक्य है 'एतावानस्य महिमा ततो ज्यायाश्च पुरुषः। पादोस्य विश्वाभूतानि त्रिपादस्यामृतं दिवि" इत्यादि। [इस

सर्वजगदुत्पादकत्वसर्वपरायणत्वसर्वाश्रयत्वादिकलिङ्गमासीत् तद्वत् प्रकृते परमात्मन उपस्थापकचिह्नविशेषस्याभावादिति सूर्यादि ज्योतिष्येवादित्यादिज्योतिः शब्दस्य प्रसिद्धत्वादादित्यादिकमेवग्राह्यमिति पूर्वपक्षः।

यद्यपि प्रकृते मंत्रे परमात्मन उपस्थापकं लिङ्गं स्पष्टतया नोपलभ्यते तथापि इतः पूर्वमन्त्रादाकृष्य ब्रह्मलिङ्गमिहापि ज्योतिः शब्देन परमात्मैव परिगृहीतव्योनादित्यादि इति वक्तुं कथयति, "अत्राभि धीयते" इति। पूर्वपक्षस्य निरसनाय प्रयत्नं करोमीत्यर्थः छान्दोगीय "यदतः परो दिव" इत्यादि मंत्रेऽपि ज्योतिः पदेन परं ब्रह्मैवाभिधीयमानं भवति नतु तदन्यस्यात्राभिधानम्। परमात्मव्यतिरिक्तस्यादित्यादेरभिधानं कथं न भवति! नहि भवतो वाङ् मात्रेणैव कोपिविश्वस्तः स्यादिति हेतूपन्यासेन तं बोधयितु सूत्रस्थमेव हेतुं दर्शयति "चरणाभिधानादिति।पादकथनात्। एतस्माद्वाक्यात्पूर्ववाक्ये चतुष्पादब्रह्मणः कथनं कृतम्। तथाहि—एतावानस्य महिमा ततो ज्यायांश्चपुरुषः" अस्मिन् वाक्ये परब्रह्मणः पादचतुष्टयवत्वं प्रतिपादितं तत्रैक पादस्थानीयमिदं सर्वंभूर्लोकादिकथितम्। अवशिष्टपादत्रयस्यावस्थानन्तु विलक्षणं सर्वदोषरहितममृतत्वादिरूपेण प्रतिपादितं दिव्यसाकेतादिलोकं तदेवा-

परमात्मा का महत्व बहुत बड़ा है। जो इसका महत्व द्योतक है। उससे भी यह बहुत बड़ा है। यह जो परिदृश्यमान जगत् तथा जो भूरादि लोक हैं और जितने भूत हैं वे तो इस परम पुरुष का एक पैर के बराबर हैं। उस परमात्मा का जो तीन चरण है वह तो अमृतोपलक्षित द्युलोक में, अर्थात् अमृत लक्षणसाकेत है।] इस वाक्य में सम्पूर्ण जगत् परमात्मा का एक पाद स्थानापन्न है यह कह करके नित्य विभूति रूप स्वकीय स्थान को तीन पाद से कहकर परमात्मा को सर्वभूत चरणवाला कहा गया है। इसलिए परम पुरुष भगवान् ही द्युसम्बन्धितरूप से प्रतिपादित होते हैं। इस कारण से परमात्मा ही ज्योति शब्द के वाच्य हैं यह

त्रापि द्युसम्बन्धेन ज्ञापितं भवति। अर्थात् समस्तस्य चराचरात्मकस्यास्य जगत एकपादरूपत्वं प्रतिपाद्य नित्यविभूतिरूपस्य स्वकीयस्थानस्यावशिष्टपादत्रयेणकथनात् परमात्मनः सकलजगत्कारणस्य यानि सर्वाणि भूतानि तानि सर्वाण्येकपादस्थानीयमिति कथितम्। ततश्च सर्वकारणलक्षणः परमद्युसम्बन्धितोऽत्र प्रतिपादितो भवतीति स एव परमात्मा प्रकृते ज्योतिः शब्दस्य वाच्यो भवति। नतु जन्यस्य कस्यचिज्ज्योतिषोऽत्र ग्रहणम्। न केवलमस्मिन् ज्योतिप्रकरण एव परमात्मनो ग्रहणमपितु एतदन्यत्र शाण्डिल्यादि विद्यायामपि प्रकृतस्यैव परमात्मनोऽनुवर्तनं भविष्यति। तस्मादत्र ज्योतिः शब्देन परस्यैव ब्रह्मणो ग्रहणम्। न च "ज्योतिर्दीप्यते" एतत्पदस्यादित्यादि ज्योतिषि प्रसिद्धत्वात्तादृशकार्यज्योतिष एव ग्रहणमितिवाच्यम् प्रकरणात्परमात्मन उपादानसंभवे कार्यज्योतिष एव ग्रहणमित्याग्रहस्य निर्मूलत्वात्। तस्मात्प्रकृते परं ब्रह्मण एव ज्योतिः शब्देन प्रतिपादनं नतु यत् किंचिदवभासकस्यादित्यादे ज्योतिः शब्देन ग्रहणमिति ॥२५॥

सिद्ध होता है। नतु पराधीन स्वभाववाला आदित्यादिक अनित्य ज्योति स्वभाववस्तु ज्योति शब्द का वाच्य है। "तमेवभान्तमनुभाति सर्वम्" [यह सब सूर्यचन्द्रादिक परमात्मा के प्रकाशित होने से ही प्रकाशित होते हैं।] इत्यादि अनेक श्रुतियों से यह सिद्ध होता है कि अपराधीन प्रकाश स्वरूप परमात्मा है। और तदितर पदार्थ सूर्य चन्द्रादिक परमात्माप्रकाश के अधीन प्रकाशवाले हैं। अतः मुख्य प्रकाशात्मक जो परमात्मा उसी का ग्रहण ज्योति शब्द से है। अर्थात् स्वप्रकाश परमात्मा ही ज्योति शब्द का वाच्य है। नतु पराधीन प्रकाशवान् सूर्यादिक प्रकृत में ज्योति शब्द वाच्य है ॥२५॥

छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पण निगदात्तथाहि दर्शनम् ।१।१॥२६॥

ननु अग्रिमवाक्ये "गायत्री वा इदं सर्वम्" [छा. ३।१२।१।] इति गायत्रीरूपस्य च्छन्दसः प्रक्रान्तत्वात्तस्यैवात्र वाक्ये ज्योतिश्शब्देन ग्रहणमिति चेन्न तथा गायत्रीवाच्ये ब्रह्मणि चेतसोऽर्पणाया-

---

विवरणम्—इतः पूर्वसूत्रे "अथ यदतः परोदिवो ज्योतिर्दीप्यते" अत्र ज्योतिः पदमादित्यादिकार्यज्योतिः प्रतिपादयति अथवा परमात्मानं बोधयतीति संशये, आदित्यादिप्रकाशस्यैव नतु ब्रह्मणस्तद्बोधकपदाभावादिति पूर्वपक्षे ब्रह्मण एव ग्रहणं कुतः ? चरणाभिधानात् इत्यादि क्रमेण समाधानावसरे कथितम्. अत्र तु ब्रह्मबोधकं पदं न दृश्यते तथापि इतः पूर्ववाक्ये "एतावानस्य महिमा ततो

सारबोधिनी—"अथ यदतः परोदिवोज्योतिरित्यादि" ज्योति प्रतिपादक मन्त्र में कार्य ज्योति का कथन है अथवा परमात्मा का कथन है । इस संशय के निराकरण के अवसर में कहा है कि इसके पूर्व "एतावानस्य महिमाततो ज्यायान्" इसमें चरण का कथन है । इसलिए ज्योतिशब्दवाच्य परमात्मा है । परन्तु यह कथन तो तब बन सकता है यदि "एतावानस्य महिमा" इसमें ब्रह्म का प्रतिपादन हो, सो तो है नहीं । किन्तु उस मन्त्र में तो "गायत्री वा इदम् सर्वम्" इत्यादि से तो सिद्ध होता है कि यहाँ तो गायत्री छन्द का कथन है । परब्रह्म का कथन तो नहीं है । एतादृश शंका का निराकरण सूत्र द्वारा करने के लिए कहते हैं "ननु अग्रिम वाक्ये" इत्यादि अग्रिम वाक्य "गायत्री वा इदं सर्वम्" [यह जो कुछ वस्तु जात भूत भविष्यत् वर्तमान है वह सब गायत्री है ।] में तो गायत्री रूप छन्द का प्रतिपादन है परम पुरुष परब्रह्म का तो प्रतिपादन

भिधानात् । उपासनार्थं ब्रह्मणो गायत्रीसादृश्येनानुसन्धानार्थमित्याशयः । अन्यथा गायत्र्या वर्णविन्यासरूपायाः सर्वात्मकत्वानुपपत्तेः । एवं ह्युपासनं एतं ह्येव बह्वृचामहत्युक्थे मीमांसन्त एतमग्नावध्वर्यव एतं महाव्रते छन्दोगाः, [एते] इत्यादिषु दृश्यते ॥२६॥

ज्यायांश्च पुरुषः" इत्यादिपूर्वमंत्रे परमात्मनः पादाभिधानात्परमात्मन एव ग्रहणं नतु कार्यज्योतिष आदित्यादेर्ग्रहणम् । परन्तु एतत्सर्वंकदास्यात् ? यदि पूर्ववाक्यस्य ब्रह्मार्थत्वं सिद्धं स्यात्तदा, नतु पूर्ववाक्यं ब्रह्मार्थकमपितु गायत्र्या अवबोधकम् "गायत्री वा इदं सर्वम् यद्भूतं यदिदं किञ्च" इति गायत्री प्रकृत्येदं श्रूयते, "त्रिपादस्यामृतं दिवि" ततश्च कथमुच्यते परमात्मनः पूर्वमंत्रे प्रतिपादनमितीमां शङ्कां निवर्तयितुं सूत्रमुदाहर्तुमाह—"ननु अग्रिम वाक्ये" इति । एतस्मात्पूर्ववाक्ये "गायत्री वा इदं सर्वं यद्भूतं यदिदं किञ्च" [यदिदं परिदृश्मानं किमपि भूतादिकं तत्सर्वं गायत्री एवे-

नहीं है । तब पूर्व मन्त्र के बल से ज्योति वाक्य में परम पुरुष का ज्योति शब्द। से प्रतिपादन होता है यह किस प्रकार से कहा जाता है अपि तु ज्योति शब्द से आदित्यादिक जो ज्योति है उसी का प्रतिपादन होना श्रुति सिद्ध तथा युक्ति से भी होना उचित है। इस प्रकार से पूर्व पक्षी ने गायत्रो वाक्य का अन्यार्थपरतया व्याख्यान करके आपेक्ष किया । उस आपेक्ष का निराकरण करने के लिए सूत्रावयव द्वारा समाधान करते हैं "इति चेन्न" इत्यादि । अर्थात् यह पूर्वोक्त कथन ठीक नहीं है क्योंकि परम पुरुष शरीरी है और जो कुछ स्थावर जंगम पदार्थ है वह भगवान् का शरीर अर्थात् एक-देश है। तो गायत्रो रूप जो एकदेश तद्द्वारा गायत्री वाच्य परम ब्रह्म में चित्त का अर्पण अर्थात् मनके द्वारा उपासनापरक है। अर्थात् "उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना" इति श्रीरामतापनीय श्रुत्युक्तदिशा

त्यर्थः] अनेन प्रकारेण गायत्री लक्षणाया श्छन्दस एव प्रक्रान्तत्वं–कथन विद्यते नतु परमपुरुषस्य ततश्च "पादोस्य सर्वाभूतानि त्रिपादस्यामृतं दिवि' अत्रापि गायत्री छन्दसः एव ग्रहणं नतु परब्रह्मणः तत्कथमुच्यते ज्योतिः पदेन ब्रह्मणो ग्रहणं कार्यज्योतिषो नेति पूर्वपक्षः। उत्तरयति "चेतोर्पणनिगदा" दिति। अयमाशयः–तत्र गायत्री छन्दोद्वारेण तद्गते गायत्रीप्रतिपादिताक्षरसमुदात्मकगायत्रीवाच्ये परब्रह्मणि परमपुरुषे चेतसोऽन्तः·करणप्रवेशनस्य निगदात् प्रतिपादनात्, गायत्री द्वारा परब्रह्मण एवोपासनायाः कथनात् उपासना लक्षणं प्रयोजनमाश्रित्य गायत्रीछन्दसः सादृश्येन एवानुसन्धानस्य वक्तव्यत्वात् यद्यत्र परम पुरुषस्यैवोपासनामिति न स्वीक्रियेत स्तदाक्षरविन्यास स्वरूपगायत्री छन्दसः कथमिव सर्वात्मकत्वप्रतिपादनं घटेत ब्रह्मपरिग्रहे तु ब्रह्मणः सर्वशरीरत्वाद् गायत्रीशरीरत्वमपीति तद्रूपेण सर्वात्मत्व प्रतिपादनं घटते एव। अनेन प्रकारेणं अन्यस्थलेऽपि ब्रह्मण उपासनं

उपासना करने के लिए ब्रह्म को गायत्री के सादृश्य से कथन है, अनुसंधान उपासना के लिए है। जिस प्रकार से मन में आदित्य में ब्रह्म को प्रतीकोपासना होती है। उसी प्रकार से गायत्रीरूप एकदेश में ब्रह्म की उपासना के लिए ये सब प्रकार हैं। उपासना कहते हैं ब्रह्म में मनका अनुसंधान को, तो इस मन का अनुसन्धान तत्तदवयव द्वारा है। इसमें गायत्री छन्द रूप अवयव द्वारा उपासनापरक वाक्य है। क्योंकि यों तो गायत्री तो तत्सवितु इत्यादि वर्ण समुदायक विलक्षण आनुपूर्वी मात्र है, तो उसमें सर्वात्मत्व का कथन तो सर्वथा ही असंगत है। अतः गायत्री अनुगत ब्रह्म में सर्वात्मता का प्रतिपादन उपपन्न होता है। इसी तरह, "एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्ते" इत्यादि स्थल में भी देखा जाता है भगवान् सर्वरूप हैं इसलिए शालग्राम शिला की पूजा करके तदनुकूल फल को पूजा करने वाले

भूतादिपादव्यपदेशोपपत्तेश्चैवम् १।१।२७॥

एवं गायत्रीशब्देन ब्रह्मणोऽभिधाने सति भूतपृथिवीशरीरहृदय निर्देशानन्तरं" सैषा चतुष्पदा" इति भूतादीनेव पादान् व्यपदिशति एतस्य च ब्रह्मण्येवोपपत्तेः ॥२७॥

श्रूयमाणं-समञ्जसं भवति 'एतं ह्येवबह्वृचामहत्युक्थं मीमांसन्ते एतमाध्वर्यव एतं महाव्रतं छन्दोगाः" इत्यादि प्रकरणेऽपि समुपलभ्यते समुपासनं परमपुरुषस्येति। एवं च "गायत्री वा इदं सर्वम्" अनेन कथितस्य सर्वात्मकत्वस्याक्षरलक्षणायां गायत्र्यामनुपपत्तिरेव भवेत्। ब्रह्मणस्तु सर्वान्तर्गतस्य सर्वशरीरित्वेन सर्वात्मकत्वमुपपद्यत इति तस्यैव सर्वभूतपादस्य त्रिपादमृतत्वस्य च निष्पत्तिसंभवात् पूर्वसूत्र कथितज्योतिः शब्दवाच्यत्वं भवति नतु तदन्यस्य कस्यचिज्ज्यो-तिर्वाच्यत्वमिति सूत्रयक्षरार्थः ॥२६॥

विवणरम् अथात्र-प्रकृतप्रकरणे गायत्रीशब्देन वर्णविन्यासरूपाया गायत्र्या न ग्रहणमपितु गायत्रीशब्दवाच्यस्य परमपुरुषस्यैव अन्यथा भूतादिपदानां कथनं सङ्गतं न स्यात् इति बोधयितुमाह एवं गायत्रीशब्देनेत्यादि । अत्र गायत्रीशब्देन गायत्र्युपलक्षि व्यक्ति प्राप्त करते हैं। तो क्या वहाँ शालग्राम शिला फल को देती है? नहीं, किन्तु तदनुगत सर्वेश्वर श्रीसाकेतविहारी सब फल को देते हैं। इसलिए भगवान् श्रीकृष्ण कहते हैं, "यो यो यां यां तनुं भक्तः श्रद्ध-यार्चितुमिच्छति। तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्। स तया श्रद्धया युक्तस्तस्याराधनमीहते। लभते च ततः कामान् मयैव विहितान् हि तान्" "स यथा यथोपासते" इत्यादि स्थल में भगवान् फल देते हैं यह सिद्ध होता है। इसी प्रकार प्रकृत में भी समझना चाहिए ॥२६॥

सारबोधिनी-पूर्व वाक्य में ब्रह्म का ही ग्रहण है नतु अक्षर विन्यास रूप गायत्री का कथन है। क्योंकि भूत पृथिवी शरीरादि को पाद रूप से

तस्य परमपुरुषस्य कथनं क्रियेत. तदैव भूतपृथिवीशरीरादीनां निर्देशानन्तरम् कथितं यत् 'सा एषा चतुष्पदा गायत्री'' अत्र भूतादिका एव तस्याः पादस्थानीयाः । एतादृशकथनं कदा संगच्छेत. यदा गायत्र्युपलक्षितस्य परमपुरुषस्य ग्रहणं भवेत् । यदि कदाचित् छन्दोरूपाया गायत्र्याः कथनं भवेत् तदा अक्षरसंनिवेशमात्रलक्षणायाः तस्याः भूतपृथिव्यादिकाः कथमवयवाः स्युः ? तस्मात् गायत्रीपदेन न वर्णसमुदायरूपायास्तस्याग्रहणमपितु सर्वशरीरकस्य परमात्मनः एव ग्रहणम् । अत्रायमर्थः पूर्ववाक्ये प्रकृतं ब्रह्मैवेतिस्वीकर्त्तव्यम् यतो भूतपृथिवोशरीशादिकान् पादान् श्रुतिव्यपदिशतिः । भूत-पृथिवी शरीरहृदयानि परामृश्य श्रुतिप्रतिपादयति 'सा एषा चतुष्पदा षड्विधा गायत्री' इति । यदि प्रकृते छन्दो रूपाया गायत्र्या ग्रहणं क्रियते किन्तु तदुपलक्षितब्रह्मणो ग्रहणं न क्रियेत तदा केवल छन्दो रूपाया गायत्र्या इमे भूताः पादाः कथं भवेयुरयोग्यत्वात् । किंचात्र ब्रह्मणो ग्रहणं स्यात् तदा "एतावानस्यमहिमा पादस्य सर्वाभूतानि'' इत्यादि वाक्यानां सामञ्जस्यं न स्यात् ब्रह्मणो ग्रहणे एवैतानि वाक्यानि संगतानि भवन्ति । एभिर्वाक्यैर्ब्रह्मण एव सर्वात्मता प्रतिपादिता भवति । नत्वक्षरमात्ररूपाया गायत्र्याः एवम् ''विष्टभ्याहमिदं कृत्स्नमेकांशेन

कथन किया गया है । इस बात को कहने दृढ करने के लिए'' भूतादिपादव्यपदेशोपपत्तेश्चैवम्'' इस सूत्रका उत्थान करके कहते हैं। एवं गायत्रो शद्बेनेत्यादि'' एवं पूर्व कथित प्रकार से यदि गायत्री शद्व से गायत्रो शरीरक ब्रह्म का ग्रहण करते हैं तब ही भूत पृथिवो शरोर तथा हृदय का निर्देश करने के वाद वह, यह चारपैरवाली गायत्री है, इस प्रकार से इस श्रुति द्वारा भूत पृथिव्यादिक का पाद रूप से जो कथन किया गया है उसका सांमञ्जस्य होता है । अर्थात् चतुष्पाद का कथन तो ब्रह्म पक्ष में ही घट सकता है। क्योंकि ब्रह्म सर्व शरीरक हैं तो चार पादवत्व भी संभवित है । जिस

उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ।१।१।२८।

ननु "त्रिपादस्यामृतं दिवि" इत्याधारत्वेनोक्ता द्यौर्भूयोऽथ यदतः परो दिवः, इति पञ्चम्या ज्योतिषोऽवधित्वेनाप्यभिधीयत इत्युपदेशभेदान्नात्र ज्योतिःशब्दाभिधेयम्ब्रह्मेति चेन्न, उभयनिर्देशेनापि विरो-

---

स्थितो जगत्" "यद्वैतद्ब्रह्म' इत्यादि कथनमपि संगतं भवति । तदा हुराचार्या महामहोपाध्यायजगद्गुरुश्रीरघुवराचार्या गीतार्थचन्द्रिकायां 'इदंचिदचिदात्मकस्य जगदेकांशेन स्वमहिम्नोऽयुतायुतांशेन विष्टम्भनं कृत्वाहं स्थितोऽस्मि तथाचोक्तं पुराणरत्ने 'यस्या युतायुतांशेन विश्वशक्तिरियं स्थिता' तस्मात पूर्ववाक्येपि परमपुरुष एव प्रकृतं । नत्वक्षरविन्यासरूपया गायत्र्याः प्रकृतत्वमस्तीति संक्षेपः ॥२७॥

विवरणम्—अथ "त्रिपादस्यामृतं दिवि" इति वाक्ये दिव इति पदं सप्तमी विभक्ति सहकृतं सत् अधिकरणरूपमर्थंबोधयति । "यदतः परोदिवः" इत्यत्रतु पञ्चमी विभक्ति सहकृतं सत्तदेवदिव इति

तरह आकाशादि शरीरक ब्रह्म है उसी तरह गायत्री शरीरक भी है । अतः चतुष्पाद का कथन संगत होता है। और गायत्री का पादस्थानापन्न भूत—पृथिव्यादिक किस तरह से हो सकता है इसलिए पूर्व वाक्य में भी ब्रह्म का प्रतिपादन है गायत्री का प्रतिपादन नहीं ॥२७॥

सारबोधिनी—एक जगह सप्तमी विभक्ति का निर्देश है और अन्यत्र पञ्चमी विभक्ति का निर्देश भेद होने से ज्योतिः शब्दपदवाच्य ब्रह्म नहीं हो सकता है। इस शंका का समाधान करने के लिए वृत्तिकार प्रक्रम करते हैं कि "ननु त्रिपादस्यामृतमित्यादि" "त्रिपादस्यामृतं दिवि" इसवाक्य में दिव शब्द के आगे सप्तमी विभक्ति है। इससे दिवको अधिकरण रूप से कथन किया है। और "यदतः परोदिवः" इस वाक्य में दिव शब्द में पञ्चमी विभक्ति होने से ज्योति का अवधि रूप से दिव का कथन है तो इस प्रकार से सप्तमी—पञ्चमी रूप उपदेश भेद होने से यहाँ ज्योतिशब्द का वाच्य पर

धाभावात् । एकस्मिन्नपि 'वृक्षाग्रे श्येनः' 'वृक्षात्परतः श्येनः' इत्यादि लौकिक व्यवहारो यथोपपद्यते। तद्वदिहापि नकश्चिद्विरोधः ॥२८॥

इति श्रीरघुवरीयवृत्तौ ज्योतिरधिकरणम् ।९।

पदम् अपादान बोधकं भवति । नहि सप्तमीपंचम्योरेकार्थतायां कचिदपि प्रयोगो भवति। कुतः? विभिन्नार्थप्रतिपादकत्वात् । समानार्थकतायामेव विभक्ते विकल्पः। इहतु एकत्र तदेव 'दिवि' इत्यधिकरणमर्थं बोधयति. तदेवचान्यत्रापादनमर्थं बोधयतीति कथं परम ब्रह्मणः प्रत्यभिज्ञानं संभवेदिति शङ्कां समाधातु सूत्रमुत्थापयन् प्राह "ननु त्रिपादस्यामृतंदिवीत्यादि । त्रिपादस्यामृतंदिवीत्यादि वाक्ये दिविति पदमधिकरणार्थकम् । अथ पदतः परोदिव इति वाक्येदिव इति पदमपादानार्थकम् । यद्यपि दिव इति प्रकृत्योभयत्रापि श्रवणं तथापि विभक्तिभेदेनार्थभेदो भवति. इति विभक्तिभेदात्. ज्योतिः शब्दवाच्यता ब्रह्मणो न संभवति.इति चेत्सत्यम्. यद्यपि

ब्रह्म नहीं हो सकता हैं। यह पूर्व पक्ष हुआ । एतादृश पूर्वपक्ष के उत्तर में कहते हैं कि दोनों प्रकार के निर्देश होने पर भी कोई विरोध नहीं है ।

लौकिक प्रयोग में भी ऐसा देखने में आता है कि विभक्ति में भेद होने पर भी प्रयोग में कोई भी विरोध नहीं । जैसे "वृक्षाग्रे श्येनः वृक्षाग्रात्परतः श्येनः" वृक्ष के अग्र भाग में पक्षी है । और वृक्ष के अग्र भाग से पर में पक्षी है। यहाँ दोनों ही प्रयोग में पक्षी आधेय है । और वृक्ष में अधिकरणता की प्रतीति होती है यथा वा पर्वतो वह्निमान् और पर्वते वह्निः, यहाँ पर्वत वह्निवाला है और पर्वत में वह्नि है यहाँ प्रथम प्रयोग में संयोगसंबन्धावच्छिन्न वह्निनिष्ठ आधेयता निरूपित अधिकरणतावान् पर्वत है और द्वितीय प्रयोग में आधेयता सम्बन्ध से पर्वत प्रकार होता है । और वह्नि विशेष्य है । क्योंकि प्रथमान्तार्थ मुख्य विशेष्यक शाब्द बोध होता है यह नियम है ।इस लिए प्रथम प्रयोग में पर्वत विशेष्य है।

विभक्तेरर्थभेदो विद्यते तथापि प्रकृत्यस्तूभयत्र समाना एवेति प्रकृत्यर्थस्य समानतामादाय भवति ब्रह्मणः प्रत्यभिज्ञानम् । न च सप्तमीपञ्चमोविभक्त्यो विकल्पस्तु न कुत्रचिदपिदृष्ट इति विभक्ति भेदाद्ब्रह्मणः प्रत्यभिज्ञानं बाधितं स्यादेवेति वाच्यम् । प्रकृत्यर्थस्य सर्वत्र प्रधानत्वेन तदकूलतथैव विभक्ते विनियोगसंभवात् । न च सप्तमी स्थाने पञ्चम्याः प्रयोगस्तु न क्वचिद् दृष्टः । नहि भवति भूतले तिष्ठति. इतिस्थाने भूतलात्तिष्ठति इति वाच्यम्. लोकेऽपि तथा प्रयोगदर्शनात्, यथा वृक्षाधिकरणतारूपमर्थमादाय वृक्षे श्येनः, वृक्षात्मके ऽधिकरणे श्येनो वर्तते इत्यर्थः वृक्षाग्रात्परतः श्येनः, अत्र वृक्षस्याग्र भागे श्येनो विद्यते इत्यर्थः । उभयत्रापि वृक्षस्याधिकरणता प्रतीयते इत्येकस्मिन्नेवार्थे उभयथा विभक्त्यो निर्देशो भवत्येव । यद्यपि वृक्षे श्येन, इत्यत्र वृक्षदेशविशेषे अवच्छेदकत्वमाभाति वृक्षाग्रात्परत इत्यत्रतु परदेशस्यावच्छेदकत्वमिति भेदस्तथापि अधिकरणन्तूभयत्रापि वृक्षस्यैव भवतीति । एवं प्रकृते 'दिवि दिवः' इत्युपदेशभेदेऽपि नास्ति कश्चिद्विरोधो लौकिकप्रयोगे उपदेशभेदेऽपि प्रकृत्यर्थस्य समानत्वेन

और संयोग सम्बन्ध से वह्नि विधेयता रूप से भासित होता है । और द्वितीय प्रयोग में आधेयता सम्बन्ध से पर्वत प्रकार है । वह्नि विशेष्यता सम्बन्ध से भासित होता है फिर भी पर्वत में तो वह्निनिष्ठ आधेयता निरूपित अधिकरणता ही है । कभी भी वह्नि अधिकरण नहीं होती है किन्तु पर्वत सर्वदा अधिकरण ही कहलाता है । इसी प्रकार से " दिवि ज्योतिः दिवः परो वः ज्योतिः" यहाँ दो प्रकार के प्रयोग होने पर भी सप्तम्यन्त पंचम्यन्त में कोई विरोध नहीं हैं । क्योंकि आखिर में अधि-करणता रूप अर्थ का भान तो दोनों जगह में दिवरूप प्रातिपदिकार्थ में ही है । व्याकरण का नियम है कि प्रकृति प्रत्ययार्थ के बीच में प्रकृत्यर्थ की ही प्रधानता होती है । इसलिए दोनों सप्तम्यन्त पंचम्यन्त प्रयोग में

प्राणानुगमाधिकरणम्

प्राणस्तथानुगमात् ।१।१।२९।।

'स होवाच प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्व' इति कौषीतकिब्राह्मणे प्रतर्दनविद्यायां श्रूयते । अत्र प्राणशब्देन जीवः परमात्मा वा ग्राह्य इति संशयः । "प्राणोऽस्मि" इतीन्द्राभिधायिशब्द-

---

ज्योतिः शब्दवाच्यं परं ब्रह्म भवत्येव नतु परब्रह्मातिरिक्तस्य ग्रहण-मिति संक्षेपः ॥२८॥

इति जगद्गुरु श्रीरामानन्दाचार्य-रामप्रपन्नाचार्ययोगीन्द्रकृते
श्रीरघुवरीय वृत्तिविवरणे ज्योतिरधिकरणम् ॥९॥

विवरणम्-यद्यपि "आकाशस्तल्लिङ्गात्""अत एव प्राणाः" इत्यादि प्रकरणेषु बलवत् परमात्मन उपस्थापकलिङ्गदर्शनेन आकाशप्राणादि पदानां भूताकाशादिभ्यः प्रच्याव्य आकाशादिपदानां ब्रह्मपरत्वं व्यवस्थापितम्, परन्तु प्रतर्दनप्रकरणे बहुनि लिङ्गानि सन्ति. कानि-चित् मुख्यप्राणस्य कानिचित् देवतात्मकेन्द्रस्य कानिचिज्जीवस्य तथा केचिद् ब्रह्मण उपास्यतया बोधकानि । तत्र केन बलवता लिङ्गेन कस्य ग्रहणं कर्त्तव्यं केन लिङ्गेन कस्य निराकरणमिति सन्देहेऽ-

विरोध नहीं होने से ज्योति शब्द के वाच्य अर्थ पर ब्रह्म ही है । नतु कार्यरूप आदित्यादि ज्योति ॥२८ ॥

इति ज्योतिरधिकरणम् ॥९॥

सारबोधिनी- इसके पूर्व आकाशाधिकरण तथा ज्योतिरधिकरण में अव्यभिचरित ब्रह्म के लिङ्ग के विद्यमान होने के कारण से आकाश पद को भौतिकाकाश रूप स्वकीय अर्थ से तथा ज्योतिरादि शब्द को आदित्यादि रूप ज्योति पदवाच्य सूर्यादिसे व्यावृत करके परमात्मपरकत्व का निर्णय करके वेदान्त वाक्यों का ब्रह्म रूप अर्थ में तात्पर्य है इस प्रकार से निर्णय किया गया है । परन्तु प्रकृत प्रकरण में तो वायु, देवता, जीव

सामानाधिकरण्यदर्शनात्प्राणशब्देन प्रत्यगात्मैव ग्राह्य इति पूर्व पक्षः। अत्राभिधीयते- प्राणशब्देनात्र परमात्मैव ग्राह्यो नेन्द्राख्यो जीवविशेषः। इत्थमत्रनिश्चयः। प्रतर्दनेन मनुष्यस्य हिततमं यत्स्यात्तन्मे ब्रूहीति पृष्टम्। इन्द्रेण च "मामायुरमृतमित्युपास्व" इत्युत्तरितम्। एतत्प्रश्न-प्रतिवचनयोरनुसन्धानेन ब्रह्मैवात्र प्राणपदव्यपदिष्टम्भवति। न ह्यन्य-

---

वाधित रूपेण सर्ववेदान्तानां ब्रह्मण्येवतात्पर्यावधारणं कर्तुमशक्यप्रायमिव मन्यमानामाशङ्कां विनिवर्तयितुं सूत्रमुदाहर्तुं च प्रक्रमते "सहोवाचेत्यादि" कौषीतकीयब्राह्मणोपनिषदि प्रतर्दन विद्यायामित्थं श्रूयते प्रतर्दनो हि दिवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण च" इत आरभ्य "सहोवाच प्राणोऽस्मि प्रज्ञात्मा तं मामा-युरमृतमित्युपास्व" [दिवोदास नामकः कश्चिद्राजापूर्वकालेऽभूत् तस्या-पत्यंपुमान कश्चित् प्रतर्दननामको बभूव पौरुषबलादिसम्पन्नः, स प्रतर्दनः कदाचिदिन्द्रं जेतुं युद्धे बलादिसमन्वितो देवाधीशेन्द्र-सकाशं गतः। युद्धाय समागतं तं बलेन पराभवितुमशक्य इव मन्य-मानः साम्ना तेन सह वार्तालापं कुर्वन्. देवराजस्तं प्रतर्दनं प्रति

और ब्रह्म का प्रतिपादन करनेवाला अनेक लिङ्ग है। प्राणपद का वायु भी अर्थ है। प्राणपद का प्रकरण से इन्द्र देवता भी अर्थ होता है एवं प्राणो-पलक्षित जीव भी अर्थ होता है। एवं प्राणपद से परमात्मा का भी बोध होता है। तो अनेक का उपस्थापक अनेक लिङ्ग के दर्शन होने से ब्रह्म का ही ग्रहण किया जाय, ऐसा निर्णायक हेतु नहीं होने से ब्रह्म का ही ग्रहण होना चाहिए यह निश्चय कैसे कर सकते हैं। तब सकल वेदान्त वाक्य परमात्मा का ही बोधक है यह किस तरह से सिद्ध होता है? एतादृश शंका का निराकरण करने के लिए वृत्तिकार प्रक्रम करते हैं सूत्र को उपस्थित करते हुए-"सहोवाच प्राणोऽस्मी" त्यादि "प्रतर्दनोहि वै देवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन पौरूषेण च" इति प्रक्रम्य, "सहोवाच प्रणोऽस्मि प्रज्ञा-

त्किमपि मनुष्यस्य हिततममृते ब्रह्मणः । अमृतत्वमपि नेन्द्रादिजीवेषूपपद्यते । अमृतादिपदसामानाधिकरण्येनानुगमादत्र प्राणपदवाच्यः परमात्मैव ॥२९॥

प्रोवाच "हे प्रतर्दन! तुभ्यमहं वरं दास्यामि. अतस्तवाभिलषितं तन्मत्तः प्रार्थय. तदनन्तरमिन्द्रं स प्रत्युवाच त्वमेव मनुष्याय हिततममिव जानासीति तदेव वरमित्याद्युदाहृतश्रुतेरर्थः] अस्मिन् प्रकरणे समागतः प्राणशब्द इन्द्रात्मकजीवमुपस्थापयति. परमात्मानं वा कुतः ? उभयोरपि लिङ्गदर्शनात्, तत्रेन्द्रजीवलिङ्गन्त्वस्मत्पदम्, परमात्मलिङ्गं तु "अजरोऽमृतोऽभयममृतादि" पदम् । इत्येवं भवत्युभयोर्लिङ्गदर्शनात् संशयः । सति संशये जीव एवेन्द्रलक्षणः परिग्राह्यः 'अहं मामिति, प्राणोस्मीतिः इन्द्र पदसामानाधिकरण्यात् । यद्यपि निरंकुशममृतत्वादिकं परमात्मन्येव संभवतीति परमात्मलिङ्गमेवात्र व्यवस्थितमिति तदनुरोधेन परमात्मन एवात्र ग्रहणं युक्तम्, तथापि अमृतादिशब्दानां स्वर्गेपि प्रयोगदर्शनात् "यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतं च तत्सुखं स्वः पदास्पदम्" ।

त्मा तं मामायुरमृतमुपास्व" अथ "अथ खलु प्राण एव प्राज्ञात्मेदं शरीरं परिगृह्योत्थापयति" "स एषः प्राण एव प्रज्ञात्मानन्दोऽजरोमृतः" [दिवोदास का पुत्र प्रतर्दन अपने सामर्थ्य का प्रदर्शनपूर्वक देवराज इन्द्र के स्थान पर गया । उसको इन्द्र ने कहा, "मैं ही प्रज्ञात्मा प्राण हूँ, अमृत स्वरूप आनन्द अजर-अमर हूँ, तुम एतादृश मेरी उपासना करो मैं तुमको वर देता हूँ । तब प्रतर्दनने कहा कि, "मनुष्य के लिये जो पदार्थ हिततम हो, जो कि संसार बन्धन से विमुक्त करके परम पुरुष के स्थान दिव्यधाम साकेत को प्राप्त करावे" एतादृश वर को सोच करके आप मुझे वर दो । तब इन्द्र ने कहा— प्रज्ञात्मा अजर-अमरादि गुण विशिष्ट प्राण की उपासना तुम करो] इत्यादि कौषितकेयोपनिषत्के प्रतर्दन विद्या में सुना गया है । यहाँ

इत्यादिना स्वर्गसुखस्यापि निरतिशयत्व प्रतिपादनात् । तस्मात्प्राण-पदेन देवराजेन्द्रस्यैव ग्रहणमत्र भवति न तु परमात्मनो ग्रहणं तस्य प्रकृत पदबोध्यत्वाभावादिति । एतादृश शंकामपनेतुमाह "अत्रा-भिधीयते" पूर्वपक्षवादिनोपस्थापितप्रश्नस्योत्तरं करोमीत्यर्थः । इन्द्र प्रतर्दन प्रकरणे प्राणपदेन परमात्मन एव ग्रहणम् भवति. नतु जीव वि-शेषस्य देवराजेन्द्रस्य । कुतः तत्राह सूत्रे 'अनुगमात्' अर्थात् प्रकरणस्य पूर्वापरस्यालोचने कृते सति प्राणपदं परमात्मन एवोपस्थापकं भवति. न तु कस्यचिद्देवस्य तदन्यजीवस्य मुख्यप्राणस्य वा, यतोऽत्र मनुष्यस्य यत् हिततमं वस्तु तद्विषयक एव प्रार्थनम्. मनुष्यस्य कल्याणकरं वस्तु मोक्षः स च मोक्षः परमात्मन एव भवति "तमेव विदित्वाऽति-मृत्युमेति नान्यः पन्थाविद्यतेऽयनाये"त्यादि श्रुति-स्मृति-पुराणादिभिः परमात्मन उपासनादेव मोक्ष प्राप्तेः संभवादिति । एतत्सर्वमभिप्रेत्याह "प्राण शब्दे नात्रपरमात्मैवेत्यादि । अत्र प्रतर्दनप्रकरणे प्राण पदेन जीवस्य ग्रहणं न भवति. किन्तु परमात्मन एव ग्रहणं भवति । प्राण पदं स्वार्थात्प्रच्याव्य यत्तस्य परमात्मबोधकत्वं प्रतिपा-द्यते. तत्र किं भवत आज्ञा राजादेशो वा प्रमाणमिति शङ्कामपनेतुं

सन्देह होता है कि उपास्य रूप से श्रूयमाण जो प्राण है वह वायु विकार रूप प्राण है अथवा प्राणपद से इन्द्र का ग्रहण है, अथवा प्राणोपलक्षित जीव का ग्रहण है, अथवा प्राण शरीरक सकल जगत् निमित्तोपादनकारण पर-मात्मा का ग्रहण होता है, इन चारों का लिङ्ग है ? यह संशय का कारण है । पूर्वपक्ष होता है कि प्राणोपलक्षित इन्द्रादिक जीव ही है परमात्मा नहीं क्योंकि "मैं प्राण हूँ" एतादृश इन्द्र का वाचक शब्द का सामानाधिक-रण्य देखने में आता है । और आख्यायिका पर्यालोचन करने से स्वरसतः इन्द्रादिजीव ही उपास्य रूप से सिद्ध होता है परमात्मा नहीं । इस के उत्तर में -कहते हैं, "अत्राभिधीयते" इत्यादि । इस प्रकरण में

प्राह –“इत्थमत्रनिश्चयः” इत्यादि । अत्र प्रकृत विषये परमात्मन एव ग्रहणं नतु जीवस्येति विचारे वक्ष्यमाण क्रमेण विनिर्णयो भवतीत्यक्षरार्थः । “प्रतर्दनेन” इत्यादि । तथाहि प्रतर्दनस्योपरितुष्टो देवराजो मत्तोवरं याचयेति यदा कथितवान् तदनन्तरं स प्रतर्दनो मनुष्यस्य यद् हिततमं भवेत् तद्विचार्य तमेव वरं मह्यं देहीति प्रावोचत् ततो जीवभावस्यातिशयेन तदेव हितम्, यस्मिन् ज्ञाते सर्वस्यापि सांसारिकदुःखनिवृत्तिरूपपरमानन्दावाप्तिस्तादृशविलक्षणसुखप्राप्तिलक्षणो मोक्ष एव । तादृश मोक्षस्य कारणं परम पुरुषस्योपासनमेव तद्व्यतिरिक्तस्य मोक्षजनकत्वानुपपत्ते स्तदाहुरानन्दभाष्यकाराजगद्गुरवः श्रीरामानन्दाचार्याः–“मुक्तौहेतुस्तु भक्त्यपरपर्यायं तैलधारावदविच्छिन्नभगवत्स्मृतिसन्तानमेव । उक्तञ्च साधनदीपिकायामाचार्यवर्यैर्जगद्गुरुश्रीगङ्गाधराचार्यैः ‘रामस्य ब्रह्मणोऽनन्यभक्त्यैव मुक्तिराप्यते । भक्तिध्रुवास्मृति सा च विवेकादिकसप्तकात् ।इति। ऊचुश्च तथैव भगवन्तः श्रीदेवानन्दाचार्यचरणा अपि “त्वदीया स्मृतिस्तारिकामृत्युसिन्धोस्तथाविस्मृतिः पातिका तत्र चैव । परं योगिनां हार्दमालम्बनं त्वां श्रये राघवं सच्चिदानन्दरूपम्” ।।इति।।

प्राणशब्द से परमात्मा का ही ग्रहण होता है जीव का नहीं । इसमें कारण बतलाते हैं “इत्थमत्रनिश्चयः” । प्रतर्दन ने इन्द्र से पूछा की, मनुष्य अर्थात् जीवमात्र के लिए जो हिततम वस्तु है, उस वस्तु को आप कहो” ऐसा पूछा । तब इन्द्र ने कहा कि “मुझ को आयु या अमृत–अजर–अमर रूप से जानकर मेरी उपासना करो” ऐसा उत्तर दिया । अब इस प्रश्न तथा प्रतिवचन का जब अनुसन्धान=पूर्वापर का विचार किया जाता है तो यही सिद्ध होता है कि प्राणपद का वाच्य परमात्मा ही है जीव नहीं । क्योंकि मनुष्य के लिये परमात्मा को छोड़ करके और अन्य कोई भी पदार्थ हिततम नहीं है, किन्तु एक परमात्मा ही सबका अकारण मित्र है । उसी परमात्मा को

तत्रेन्द्रः प्रोक्तवान्. मामेवामृतस्वरूपं मत्वा मदीयोपासनं कुरु । एतादृश प्रश्नप्रतिवचनयोरभिप्रायस्यानुसन्धानाद् ज्ञायते यत् प्रकृते प्राणपदवाच्यः परमात्मैव नतु प्राणपदेन जीवस्य ग्रहणम् । यतः "तमेवविदित्वाऽति मृत्युमेति नान्यः पंथा विद्यतेऽयनाय" [तं सर्व संसारकारणं परमात्मानं ज्ञात्वा अर्थात्तस्य परमात्मनो निदिध्यासनेन सम्यग् विज्ञाय मुक्तो भवति तदतिरिक्तो हि मार्गो मोक्षप्राप्तये नास्तीत्यर्थः] इत्यादि श्रुत्या ज्ञायते यत् परमात्मनोऽवगतिरेव मोक्ष जनिका, एतादृशस्थितौ यदि परमात्मव्यतिरिक्तस्य कस्यचिदन्यस्योपदेशो भवेत्तदातज्ज्ञानेन कथमिव मोक्षो भवेदिति मोक्षप्राप्तेरन्यथानुपपत्या प्राणपदमस्मत् शब्दप्रतिपादितमपि परमात्मानमेव बोधयति नेन्द्रादिकं कमपि जीवं प्रतिपादयति । परमात्मनो या प्राप्तिस्तदतिरिक्तं यद्वस्तु जातं न तज्जीवस्य हिततमम्, किन्तु परमात्मैव सर्वस्य हिततमस्तत्कृपयैव लोकानां मोक्षादिसंभवात् । तथा "आनन्दोऽजरोऽमरः" इत्यादिना अमृतत्वादिका अर्थाः अपि श्रूयन्ते । नहि मुख्यममृतत्वं देवादीनामपितु परमात्मनः सर्वेश्वरस्य श्रीरामस्यैव तस्मात् प्राणपदवाच्यः परमात्मैव न तु जीवविशेषः प्राणपदग्राह्यः । यद्यपि स्वर्गादि सुखेस्वपि नित्यत्वममृतत्वं यत्र तत्र श्रुतमिव भवति, तथापि

प्राप्त करके जीव संसार बन्धन से विमुक्त हो साकेत प्राप्ति रूप मोक्ष को पाता है । तदितर सर्व पदार्थ विनश्वर तथा दुःखमय है, तो दुःखमय पदार्थ का ग्रहण दुःखात्मक संसार से वियुक्त करा सकता है ? इसलिए हिततमत्वेन उपदिश्यमान प्राण कैसे तरह जीव वाचक होगा, किन्तु परमात्मा का ही वाचक है । और इन्द्र ने उपास्य में अजरामरअमृत पदादि का प्रयोग किया है इससे भी सिद्ध होता है कि प्राणपद वाच्यता परमात्मा में ही है । क्योंकि परमात्मा से भिन्न सब पदार्थ विनश्वर है । कदाचित् परमेश्वर से इतर में जो अमृतत्व का प्रयोग है भी वह आपेक्षिक अमृतत्व का बोधक है । निरंकुश निरतिशय

न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमाह्यस्मिन् ।१।१।३०।।

वक्तुरिन्द्रस्य स्वोपास्यतयोपदेशान्नह्यत्र प्राणपदेन ब्रह्मणो ग्रहणमुपपद्यत इति चेन्न, अस्मिन् प्रतर्दनप्रकरणे "तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः"

"आभूत संप्लवं स्थानममृतत्वं हि भाष्यते" इत्यादिश्रवणाद्देवानामानन्दोपि आपेक्षिक एव न तु मुख्यो निरतिशयात्मकः। तस्मादमृतादिपदसामानाधिकरण्येन श्रूयमाणः प्राणशब्दः कथमिन्द्रादीनां बोधकः स्यादपितु योयं प्रकरणपठितः प्राणशब्दः स विनिवृत्तव्यापारान्तरः परमात्मानमेव बोधयति नतु जीवमिति संपिण्डितार्थो वृत्तिरिति संक्षेपः ॥२९॥

विवरणम्= इतः पूर्वसूत्रे प्राणस्य परमात्मपरत्वं व्याख्यातम्। अर्थात् "प्राणोस्मी" त्यादि वाक्यघटकं मत्प्राणपदम्, तेन परमात्मन एव ग्रहणं भवति नतु जीवविशेषस्येन्द्रादेर्ग्रहणमिति" व्यवस्थापितमिति तदयुक्तम्, यथोऽत्र 'प्राणोस्मो' तिवाक्ये वक्तुरिन्द्रस्योपदेशादिन्द्रस्यैव ग्रहणं न्याय्यं न तु परब्रह्मणः कथमपि ग्रहणमित्याशंकामपनेतुं सूत्रव्याख्यानमुखेनैवोत्थातुमाह-"वक्तुरिन्द्रस्य'इत्यादि। प्राणोस्मि प्रज्ञात्मा एतद्वाक्यघटक "अस्मि'इति क्रिया बोधक-

अमृतत्व परमात्मा में हो है। इसलिए सम्पूर्ण प्रकरण का विचार करने पर परमात्मा ही प्राणपद वाच्य है यह सिद्ध होता है, नतु जोवादिक प्राणपद वाच्य है। इसका विशेष विवरण अन्यत्र देखें ॥२९॥

सारबोधिनी—मृतप्राय चूहे को जिलाने के लिए गोमय [गाय का गोवर] सूँघा करके जिन्दा करने का जो प्रयास होता है, तादृश प्रयास करता हुआ पूर्वपक्षवादी प्रकृत में प्राणपद से परमात्मा का ग्रहण होता है परमात्म धर्म का सम्बन्ध की वहुलता होने से न तु जीवका ग्रहण है।

[कौ० ३।९] इत्यादिश्रुत्यभिहितस्य परमात्मसम्बन्धस्य बाहुल्यमुपलम्भात्सम्भवत्येव प्राणपदवाच्यत्वम्ब्रह्मणः ॥३०॥

पदं वक्तारमिन्द्रमेवोपस्थापयति. नतु तदतिरिक्तमन्यंकमप्युपस्थापयति ततश्च यो हि वक्ता देवराजस्तस्यैवोपास्यतया निर्देशात् कथमत्र प्राणपदेन तदतिरिक्तपरमेश्वरस्य ग्रहणं भवतीति । यत उपक्रमे उपास्यत्वेन्द्रो हि देवः श्रुतो निश्चितश्च तत उपसंहार ग्रंथस्यापि उपक्रमानुरोधेनैव नयनं युक्तम् । उपसंहारादुपक्रमस्य बलवत्वमिति नियमात् । उपक्रमे तु विग्रहवान् देवताविशेष एव स्वकीयमात्मानमुपस्थापितवान् पुरतः प्रतर्दनं प्रति "मामेव विजानीहि" "प्रज्ञात्मा अहं प्राणोस्मि' इत्यादि । तथाऽतिक्रूरवत्वमप्यात्मनः प्रख्यापयामास न चैते धर्माः सर्वधर्मविवर्जिते परमात्मनि संभवन्ति 'निष्कलं निष्क्रियं शान्तम्, न तु मां तानि कर्माणि निबध्नन्ति धनञ्जय इत्यादि श्रुति स्मृत्युक्तेः। ततश्च कथं परमात्मनोऽत्र प्राणपदेन ग्रहणमिति पूर्वपक्षे स्थिते । समाधातुमाह—इति चेन्न । यतोऽत्रप्रकृतप्रकरणे आत्म सम्बन्ध भूमा बाहुल्यं विद्यते इन्द्रादिदेवता परकाणि तु द्वित्राण्येव वाक्यानि सन्ति. परमात्मबोधकानि तु निखिलानि प्रकरणेऽस्मिन् विद्यमानानि दृश्यन्ते । अर्थादिदमोयोपक्रमोपसंहारयोरन्तराले परमात्म बोधक वाक्यानां बाहुल्येनोपलंभः उपक्रमे यत्त्वं मनुष्याय हिततमं

इस प्रकार से निराकृत भी पूर्वपक्ष को पुनरूज्जीवित करने की इच्छा से पूर्वपक्षी प्रश्न करता है । तादृश पूर्वपक्षका अनुवाद करने के लिए वृत्तिकार प्रक्रम करते हैं "वक्तुरिन्द्रस्य" इत्यादि । पूर्वसूत्र में कहा गया कि प्राण पदवाच्य परमात्मा ही है । जीव देवता विशेष इन्द्रादिक नहीं । एतादृश कथन ठीक नहीं है । क्योंकि प्रतर्दन के प्रतिवक्ता जो इन्द्रदेव है. वह अपने "प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्व" में प्रज्ञात्मा प्राण हूँ । एतादृश अमृत स्वरूप मुझको तुम उपासना करो । इस प्रकार से

मन्यसे' इति कथितम् । यद्यपि मनुष्यस्य हितं देवतादीनामुपासनमपि कथञ्चित्संभवति.तथापि हिततममतिशयेन हितं तु परमात्मन उपासनमेव । सर्वदेवाद्यपेक्षया परमात्मोपासनस्य परमपुरुषार्थ प्रयोजकत्वात्. तदितरोपासनस्य तु सातिशयफलजनकत्वेन तदपेक्षया हीनफलकत्वात्-त्वदीया स्मृतिस्तारिका मृत्युसिन्धो स्तथा विस्मृतिः पतिका तत्र चैव । परं योगिनां हार्दमालम्बनं त्वां श्रये राघवं सच्चिदानन्दरूपम् ॥ इत्याचार्योक्तेः । तस्माद्ब्रह्मबोधकाव्यभिचरितानेकलिङ्गानां प्रतर्दनप्रकरणे समुपलभ्यमानत्वात्. प्राणपदेनापाततः परिदृश्यमपि जीवलिङ्गं स्वार्थात् प्रच्याव्यानेकलिङ्गानुदर्शनेन तदनुगुण्येन प्राणपदस्य परमात्मपरत्वकल्पनमेवादुष्टं मोक्षफलकञ्चेति। एवं तद् यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एव मेवैता भूतमात्रा प्रज्ञामात्रा स्वर्पिताः' अस्मिन् मंत्रे तद् यथेति पदं दृष्टान्तप्रदर्शनाय यथा येन प्रकारेण रथस्य रथसंबन्धिचक्रस्य आरेषु तिर्यक् संलग्न काष्ठेषु नेमिश्च क्रमाद्यवस्थितसच्छिद्रगोलाकारकाष्ठस्यसंनिवेशः । एवं नेमिषुसच्छिद्रगोलाकारकाष्ठेषु अरातिर्यक् भूताः काष्ठश्रेणयो वर्तन्ते परस्परसम्बद्धा एवमेव. एतद्दृष्टान्तानुसारेणैव भूतमात्राः सर्वाणि भूतानि स्थूलसूक्ष्माणि जडाजडसर्वाण्येव पदार्थजातानि प्रज्ञामात्रासुपरमात्मनि समर्पितानि सन्ति इत्यर्थः' एवम् 'एष एव साधुकर्म

अपना स्वरूप को उपास्य रूप से कथन किया है। तो यह कथन प्राण पद से यदि परमात्मा का ग्रहण करें तब तो संगत नहीं होता है। अतः स्वकीय स्वरूप का प्रतिपादन तथा स्वस्वरूपका उपास्यत्व कहने से इन्द्र का ही ग्रहण होना चाहिए प्राणपद से परमात्मा का प्रतिपादन करना युक्त नहीं है। एतादृश पूर्वपक्ष का उत्तर कहते हुए कहते हैं "इति चेन्न" यह तुम्हारा कहना ठीक नहीं है। क्योंकि उपक्रान्त इस प्रतर्दनाधिकरण में "जिस रथ के आश

कारयति अयं लोकपालः सर्वकर्मा सर्वरसः [अथ परमेश्वरो स्वयोपरिक्रियां करोति. तद्द्वारा साधुकर्म कारयति. यं च जीवविशेषं साकेतुं नेतुमिच्छति. यं चाधोनेतुमिच्छति तद्द्वारा असाधु भगवद्भजनासेवनातिरिक्तं कर्म कारयति। स एव सत्य संकल्पः सर्वकर्मा च भवति नान्य एतादृशः इत्यर्थः, इत्यादि श्रुति प्रतिपादितस्यानेक प्रकारकपरमात्मधर्मसम्बन्धस्यात्र प्रकरणे समुपलभ्यमानत्वेन. प्रकृते परमात्मन एव प्राणपदेन ग्रहणमिति निश्चीयते। यद्यपि एकं पदद्वयं वा भूत्वा शोर्वा कथंचित् संकुचित वृत्त्या जीवस्य सङ्ग्राहकं भवतु नाम तथापि परः शतानि वाक्यान्यसंकुचितवृत्त्या परमात्मपरकाण्येवात्र प्रकरणे समुपलभ्यन्ते तानि च सर्वाण्यपि परमात्मन एव बोधकानि भवन्ति उपक्रमादिलिङ्गैः समर्थ्यमानानि। तस्मादुपक्रमे श्रुतोपेन्द्रो जीवोदूरत एव परित्याजितो भवति. समाद्रियते च परमात्मा मोक्षफलैः समुल्लसन्। अतोऽत्र प्राण पदेन परमात्मन एव ग्रहणं भवति, न तु देवस्य जीवस्य वायोर्वेति सूत्रार्थसंक्षेप ॥३०॥

में नेमिरथचक्र के अन्तर्गत स्थूल काठ विशेष समर्पित आधारित है। एवं रथ नाभि में आरा समर्पित आधारित है। इसी प्रकार प्रज्ञात्मा परमात्मा में सब पदार्थ समावेशित हैं" इस श्रुति में तथा अन्य श्रुतियों में जो सत्य कामत्व, सत्य संकल्पत्वादिक धर्म कहा गया है। उन सबका समन्वय तो स्वभावतः परमात्मा में ही हो सकता है नतु जीव में। तो तादृश धर्म सम्बन्धानुपपत्तिकी अन्यथानुपपत्ति के बल से सिद्ध होता है कि प्रतर्दन प्रकरण में प्राण पद वाच्य परमात्मा ही हो सकता है। जीव प्राणपद वाच्य नहीं है। अर्थात् यद्यपि कोई कोई विशेषण ऐसे हैं। जो जीव बोधक हैं, तथापि सत्यसंकल्पादिक ब्रह्म बोधक अनेक धर्म का दर्शन होता है तदन्यथानुपपत्ति से ब्रह्म का ही ग्रहण प्राण पद से किया जाता है, जीव का नहीं ॥ ३० ॥

शास्त्रदृष्टया तूपदेशो वामदेववत् ।१।१।३१।

अथैवं तर्हि 'मामुपास्व' इत्यादिनेन्द्रकृतस्वात्मोपासनोपदेशः कथं सङ्गच्छत इत्याह–शास्त्रेति । शास्त्र दृष्टिः शरीरात्मभावेन दर्शनम्–"य आत्मनि तिष्ठन्नात्मनोन्तरः [बृ० ५।७।१२।]इत्यादिशास्त्रेण-शरीरवाचकानांशब्दानां शरीरिणिपर्यवसानमिति निर्गलितव्युत्पत्त्या जीव

विवरणम्=इतः पूर्वसूत्रे कथितं यत् प्रतर्दनाधिकरणीयवाक्येषु परमात्मोपस्थापकानेकलिङ्गदर्शनेन जीवोपस्थापकलिङ्गस्य लघीयस्त्वात् "प्राणोस्मि प्रज्ञात्मानं मामायुरमृतमुपास्व" एतद्वाक्यघटकप्राणपदं परमपुरुषं परमात्मानमेवोपस्थापयति नतु सत्यपि जीव–परमात्मनो ज्ञानवत्त्वादिना समानत्वे तमुपस्थापयतीति । तत्रैवं वाच्यं. यत् परमात्मनो लिङ्गबाहुल्यदर्शनेन परमात्मोपस्थापकं प्राणपदं तदा "प्राणोस्मि मामुपास्व" इत्यादिश्रुतिवाक्यानां का गतिः ? न चानर्थक्यमेवैतेषां वचनानाम् एवं सति श्रुतीनामनपेक्ष–प्रामाण्यविलोप-प्रसङ्गात् "नहि तत्र वर्णेनाप्यनर्थकेन भवितव्यं किं पुनरियता पद प्रबन्धेने" ति महाभाष्योक्तेः । इमां शङ्कामपनेतुं सूत्रमुपस्थापयितु

सारबोधिनी=इसके पूर्वसूत्र "न वक्तुरात्मोपदेशात्" इसमें कहा गया है कि, "प्राणोस्मि "प्रज्ञात्मा" इत्यादि वाक्य घटक जो प्राण शब्द है उसका वाच्य परमात्मा है इन्द्र देवता नहीं । क्योंकि "अमृतम्, अजरोऽमरोऽभयम्" इत्यादि अनेक परमात्मा के उपस्थापक लिङ्ग हैं इस लिए सकल जगत् के निमित्त तथा उपादन कारण सर्वज्ञ सर्वशक्ति समन्वित विर्वशेषी भगवान् श्रीराम ही प्राणपद से वाच्य होते हैं। परन्तु ऐसा मानने पर "मामुपास्व" मामेव विजानीहि" इत्यादि वाक्यों की क्या गति होगी । एतादृश शंका का निराकरण करने के लिए वृत्तिकार प्रक्रम करते हैं "अथैवं तर्हि" इत्यादि । यदि प्रतर्दन प्रकरण में परमात्मा बोधक लिङ्ग के आधिक्य होने से प्राणपद

शरीरकपरमात्मानमवधार्य 'मामेव विजानीहि' 'मामुपास्व' इत्येवं रूप इन्द्रस्योपदेशोऽस्ति। यथा वामदेवः स्वात्मशरीरकं परमात्मानं पश्यन् तत्सामानाधिकरण्येन स्वस्य मनुसूर्य्यादि भवनमुपदिशति। 'अहं मनुरभवं सूर्यश्च' [बृ० ३।४।१०] एवमेवात्र इन्द्रोपदेशः ॥३१॥

आह "अथैवं तर्हि" "मामुपास्व" इत्यादि एवं तर्हि अर्थात् यदि परमात्मबोधकाव्यभिचरितानेकलिङ्गदर्शनेन प्राणपदेन परमात्मन एव ग्रहणं क्रियेत तदा वक्तुरिन्द्रस्योपस्थापकं "मामुपास्व, मामेव-जानीहि" अत्र. एवकारघटितेन्द्रबोधकास्मत् पदप्रयोगस्य का गतिः, अर्थात् देवराजो हि स्वात्मानमेवोपास्यतया प्रतिपादयती-त्येतादृशवचनस्य केन प्रकारेण संगतिः स्यात्, इत्याशङ्कायाम् "मामुपास्व" इत्यादि वचनानां सार्थक्यमुपपादयितुं सूत्र घटकप्रथमपदमेव प्रथममुदाहरति शास्त्रेति। तत्र शास्त्रदृष्टि रित्य स्य शरीरात्मभावेन दर्शनमित्यर्थः। तदेवोपपादयति श्रुतिमुखेन "य आत्मनीत्यादि" "य आत्मनि तिष्ठन्नात्मनोऽन्तरः" यः सर्वशरीरी परमात्मा श्रीरामो यस्य सर्वेऽपि पदार्थाः शरीरलक्षणाः स आत्मनि सर्व

द्वारा परमात्मा का ग्रहण किया जाय. तब तो, 'मामुपास्व" "मामेव विजानीहि" इत्यादि वाक्य जो इन्द्रदेव में उपास्यत्व का प्रतिपादन करता है एवं "मामेव" यहाँ जो एवकार घटित. अस्मत् पद है वह तो इतर व्यावृत्ति पूर्वक इन्द्र में विज्ञेयत्व का समर्थन करता है। इसकी क्या गति होगी ? अर्थात् इन्द्र का उपास्यत्व तथा विज्ञेयत्व का उपदेश किया गया है तादृश उपदेश किस प्रकार से संगत होगा ? इस प्रकार की जो शंका होती है उसको निरा-करण करने के लिए सूत्र घटक पद का कथन करते हुए कहते हैं "शास्त्रेति" अर्थात् "मामुपास्व" इत्याकारक जो उपदेश है वह शास्त्र दृष्टि को लेकर के वामदेव के उपदेश के समान है। शास्त्र

जीवात्मनि तिष्ठन्नन्तर्यामितया "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठती" ति स्मृतेः। आन्तरो जीवस्य आन्तरो जीव मध्ये व्यवस्थितो जीवं नियमयति एतादृशं सर्वनियन्तारं सर्वेश्वर श्रीरामं नावगच्छति जीवात्मा. "केनापि देवेन हृदिस्थितेन यथानियुक्तोस्मि तथाकरोमीत्युक्तः। इत्यादिश्रुतिस्मृत्यात्मकशास्त्रानुगुण्येन यानि शरीरवाचकानि पदानि सर्वाण्यपि शरीरिणी पर्यवसितानि भवन्ति" इति नियमात्। तदाहु र्भाष्यकाराः "ब्रह्मशब्दश्च महापुरुषादिपदवेदनीयनिरस्ताखिलदोषमनवधिकातिशयासंख्येयकल्याण-गुणगणं भगवन्तं श्रीराममेवाह। सामान्यवाचकानां पदानां विशेषार्थे पर्यवसानात्। तदाह वृत्तिकारः—विशेषार्थेन सामान्यार्थोऽवसीयत इति (बो०वृ०)" (आनन्दभाष्यम् १।१।१)।

शरीर—विशिष्ट-जीवात्मकशरीरवन्तं परमात्मानमिन्द्रो ज्ञात्वा उपदेशं करोति प्रतर्दनाय "मामेवविजानीहि, मामुपास्व" अर्थादहमस्मि तच्छरीरैकदेशभूतो यस्य सर्वशरीरिणः परमात्मनस्तादृशं मामीश्वरबुद्ध्या त्व-

दृष्टि शब्द का स्पष्टीकरण करने के लिए कहते हैं "शास्त्र दृष्टिः शरीरात्मभावेन दर्शनम्" इति [शरीरात्मभाव से दर्शन—स्वशेषशेषीभाव ज्ञान] इसका स्पष्ट रूप से प्रदर्शन के लिए श्रुतिका प्रदर्श करते हैं "य आत्मनितिष्ठन्नात्मनोऽन्तरः" जो आत्मा में रहता हुआ भी उससे भिन्न है जिसको यह जीवात्मा नहीं जानता है यह जीवात्मा जिसका शरीर है जो आत्मा में रहकर के जीव का नियमन करता है, वह तुम्हारा आत्मा सर्वान्तर्यामी अमृत स्वरूप है। इत्यादि शास्त्र से यह सिद्ध होता है कि शरीर का वाचक जो शब्द है उसका पर्यवसान शरीरी में होता है। अर्थात जीवात्मा है शरीर और भगवान् है सबके शरीरी तो जीव वाचक शब्द शरीरी भगवान् का उपस्थापक होता है, अवयव से अवयवी बोधित होता है। जैसे घट प्रत्यक्ष स्थल में घटावयव के अर्थात् घटैक देश के साथ

मुपासनं कुरु, अर्थादिन्द्रः स्वकीयमात्मानं सर्व-शरीरिणः परमात्मनोऽभिन्नं पश्यति जगद्व्यापारातिरिक्तकर्मसु तथैव परमात्मनश्च स्वशरीररूपप्रतर्दनस्याभेदः, इति तं कथयति-'अहं परमात्मनः शरीर-रूपोऽस्मि. इति परमात्माभिन्नत्वेनमदीयोपासनं त्वमपि कुरु इत्याशयेनेन्द्रस्योपदेशः प्रतर्दनं प्रति । एवञ्च मामिति पदस्यासामंजस्यं न भवतीति । एतस्मिन्नर्थे दृष्टान्तं दर्शयति "वामदेव वदिति, तद्धैतत्-पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्च" वामदेवोहि ऋषिरेतत्-पश्यन् अर्थात् स्वात्मशरीरकं सर्वशेषिणं परमात्मानं पश्यन् साक्षात्कुर्वन् स्वस्य वामदेवस्य मनुसूर्यादि भवनमनुवदतीति, अर्थात् वामदेवोहि स्वस्मात् स्वशरीरिणं परमात्मानं तथा परमात्मनः सर्वशरीरकस्य सूर्यादितोऽभेदं ज्ञात्वा "तदभिन्नाभिन्नस्य तदभिन्नत्व"मिति नियमः । अत्र प्रथम तत्पदेन वामदेवस्य ग्रहणं तेन वामदेवेन भिन्नः सर्वशरीरी परमात्मा. तेन परमात्मना अभिन्नः परजीवोऽपि. इति सूर्यादिदेवेन

चक्षु का संयोग होने पर घठात्मक अवयवो का बोध होता है अवयव से अवयवी बोधित होता है । क्योंकि घटादि प्रत्यक्ष स्थल में चक्षु का संयोग घटैक देश में ही रहता है, सम्पूर्ण घट के साथ—घट के मध्यावच्छेदेन तथा पृष्ठावच्छेदेन संयोग का प्रायः सर्वत्र बाध ही रहता है । अतएव वैनासिक बौद्धों का कथन है कि एकदेश से अवयवी अनुमेय है प्रत्यक्ष नहीं इसी प्रकार प्रकृत में जीवरूप एकदेश वाचक जो शब्द है वह सर्वशेषी परमात्मा में पर्यवसित होता है । अर्थात् शेष वाचक शब्द से सर्वशेषी का बोध होता है । एतादृश नियम के बल से जीवलक्षण शरीरवाला जो सर्वशेषी परमात्मा उसका शेष मुझको तुम जानो, तथा उसी रूप से मेरी उपासना करो । इस प्रकार से इन्द्र का उपदेश है । अर्थात् यहाँ इन्द्रोपास्यत्व नहीं है । किन्तु इन्द्र है शरीर जिसका एतादृश परमात्मा का—इन्द्रावच्छिन्न परमात्मा का उपदेश है । अवच्छेद-

सह स्वस्याभेदं ज्ञात्वा वामदेवः कथयति यदहं सूर्यौमनुश्च । एव मेवात्र प्रकृते इन्द्रः प्रकारत्वेन परमेश्वरैकदेश स्वं परमात्मनाऽभेदं पश्यति. परमात्मना च स्ववत् प्रतर्दनमपि परमात्मैकदेशभूतमभेदेन पश्यति । ततश्च स्वस्य विशेषणत्वेन परमात्मरूपतां ज्ञात्वा स्वात्मानमुपास्यत्वेन, ब्रवीत्यर्थात् सत्यपि भिन्नत्वे परमात्मनोऽभिन्नतारूपेण स्वात्मानमुपपादयन् प्रतिपादयति चोपास्यत्वेन स्वशरीरकं परमात्मानमिति तदाहु जगद्गुरवः–तदभिन्नाभिन्नस्य तदभिन्नत्वमितिन्यायेन मनुसूर्यादिसर्वजगदभिन्नं ब्रह्म तदभिन्नस्य स्वस्य मनुसूर्याद्यभिन्नत्वम्पश्यन् मनुसूर्यादिसर्वरूपो भूत्वाह वामदेवः "अहं मनुरभवं सूर्यश्च" एवञ्चतदात्मकत्वानुसन्धानेनैव "देवानां प्रत्यबुध्यत स एव तदभवत्" (बृ. १।४।१०) इत्यादयोऽपि प्रतीयत उपपद्यन्त" इत्यादिना (आनन्दभाष्यम् (१।१।३१)

सूत्रार्थस्त्वेवम्. यथा वामदेव सर्वशरीरकं परमात्मानं पश्यन्. अहमेव सूर्यौमनुश्चास्मि, इति ज्ञातवान् तद्वत्, इन्द्रोऽपि स्वात्मानं सर्वशरीरकपरमात्मभ्योऽभेदं जानन्. प्रतर्दनाय स्वस्योपास्यत्वमुदाजहारेति । भावार्थस्त्वेवं तथाहि नेन्द्रः स्वात्मानमुपास्यत्वेन कथितवान्

कता सम्बन्ध से इन्द्र उपासना का विषय है किन्तु मुख्य रूप से नहीं मुख्य रूप से उपासना का विषय तो सर्वशरीरी परमात्मा ही है। जिस तरह "आत्मनि सुखम्" यहां समवाय सम्बन्ध से सुखाधिकरणता आत्मा में प्रतीत होता है । सुखाद्यधिकरणतावच्छेदक शरीर में अवच्छेदकता सम्बन्ध से प्रतीत होता है । क्योंकि शरीरावच्छिन्न आत्मा में सुख है । सुख का अधिकरण शरीरावच्छिन्न आत्मा है । इसी प्रकार प्रकृत में वस्तुतः इन्द्र में उपास्यता नहीं है, उपास्यता तो परमात्मा में है, इन्द्र तो केवल अधिकरणता का अवच्छेदक है । इसलिए इन्द्र का उपदेश इस प्रकार से हुआ है । इस विषय में अनुरूप दृष्टान्त

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रीतत्वादिह तद्योगात् ।१।१।३२।

नतु नवाचं विजिज्ञासीत वक्तारं विद्यात्'' [कौ. ३।८] इति जीवलिङ्गात् 'प्राण एव प्रज्ञात्मा' [कौ. ३।१।] इति प्राणलिङ्गाच्च नेदं प्रकरणं ब्रह्मपरमिति चेन्न, एकस्यैव ब्रह्मणः स्वरूपेण चिच्छरीरकत्वेनाचिच्छरी-

---

प्रतर्दनाय किन्तु स्वशरीरकस्य परमात्मन एवोपासनमुवाच. ''एतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि'' ''य आत्मनि तिष्ठन्'' इत्याद्यनेकशास्त्रेण शुभाशुभकर्मफलभोक्तुर्जीवस्य परमात्मस्थितिप्रवृत्तिकत्वं तथा परमात्मनश्च जीवशरीरकत्वञ्च सम्यगवगम्य तथा परमात्माधीनस्वरूपस्थितिमत्वं तस्याभिन्नसत्ताकत्वं परमात्मना स्वस्याभिन्नत्वं चावगम्य जीववाचकाहंममादि पदानां परमात्मनि जीवशरीरिणि पर्यवसानं मत्वा, तथा परमात्मनोऽहं ममादिपदवाच्यत्वं च ज्ञात्वा ''मामेवोपास्व'' ''मामेव विजानीहि'' इत्यादिना स्वशरीरिणं परमात्मानमेवोपास्यत्वेनोपदिष्टवान् नतु स्वात्मानमुपदिदेशेतिसांप्रदायिकाः ॥३१॥

विवरणम्=ननु शास्त्रदृष्टिमाश्रित्य ''मामेवविजानीहि'' ''मामुपास्व'' इत्याद्युपदेशो ब्रह्मपरको नतु देवतादिजीवबोधको यतः प्रकरणेऽध्यात्म सम्बन्धस्य बाहुल्यदर्शनादित्यादिक्रमेणतद् ब्रह्मपरकत्वमेवेति व्यवस्था-बतलाते हैं ''यथावामदेव'' इत्यादि ''यथार्थं वामदेव ऋषि वामदेव शरीरकं परमात्मानं जानन् तदभिन्नत्वं स्वस्यानुसंधाय, अहमेव मनुरभवमहमेव सूर्योऽभवमित्मेवं रूपेणोपदिदेश'' अर्थात् जसे वामदेवनामक ऋषि स्वात्म-शरीरक सर्वेश्वर श्रीरामजी को देखकर अनुभव करते हुए भगवत्सामानाधिकरण्य से अपने मनुसूर्यादि होने का उपदेश करते हैं प्रकृत इन्द्र–प्रतर्दन प्रकरण में भी वैसा ही समझना चाहिये । अतः सम्पूर्ण प्रकृत प्रसंग शास्त्रानुकूल ही है प्रतिकूल नहीं ॥३१॥

रकत्वेन चेति त्रैविध्येनावस्थितस्यानुसन्धानमुपासनार्थम् । एवमनुसंहिते ह्युपासनाया अपि तत्तद्रूपेण त्रैविध्यं फलति । प्रज्ञामात्राः प्राणे अर्पिताः [कौ. ३।९।] इति श्रुतेरस्यैव परमात्मनः सर्वाधारत्वमितरेषां प्राणादीनामत्राश्रितत्वात् । अत एवेह प्रकरणे 'प्राण एव प्रज्ञात्मानन्दोऽजरोमृतः [कौ. ३।९] इत्यादिषु तस्य परमात्मनो येऽसाधारणधर्म्मा अमृतत्वादयस्तेषां योगा-

---

पितम्, परन्तु तन्न समीचीनम्. यतोनेदं ब्रह्मवाक्यं किन्तु प्रकृत प्रकरणे जीवबोधकं तथा मुख्यप्राणबोधक च वाक्यं भवति. जीवस्य बोधकं वाक्यमति स्पष्टरूपेणात्र समुपलभ्यते "न वाचं विजिज्ञासीत वक्तारं विद्यात्" अत्र वागादिकरणविशिष्टस्य शरीरेन्द्रियाध्यक्षस्य कर्तुजीवस्यैव विज्ञेयत्वं ज्ञायते । एवं मुख्यप्राणबोधकलिङ्गमपि स्पष्टरूपेण विद्यते अथ खलु प्राण एव प्राज्ञात्मेदं शरीरं परिगृह्योत्थापयति" अत्र वाक्ये शरीरधारणलक्षणं कार्यं मुख्यप्राणस्य धर्मो दृश्यते । ततश्च जीवलिङ्गदर्शनान्मुख्यप्राणलिङ्गदर्शनाच्च न पूर्ववाक्यं परमात्मबोधकमपितु वाक्यादिकरणाधिष्ठितस्य जीवस्य तथा मुख्यप्राणस्य लिङ्गमित्याशङ्कां निराकर्तुं पूर्वपक्षं प्रस्तौति "ननु 'नवाचं विजिज्ञासी-

सारबोधिनी– अध्यात्म सम्बन्ध की अधिकता होने के कारण प्रकृत प्रकरण में प्राणशब्द से परमात्मा का ही ग्रहण होता है मुख्य प्राण अथवा इन्द्रादि जीवों का ग्रहण नहीं होता है ऐसा पूर्व पूर्वतर सूत्रों में कहा गया है । परन्तु वह ठीक नहीं है । क्योंकि यहाँ तो जीव तथा मुख्य प्राण का ग्राहक वाक्य अनेक विद्यमान हैं इसलिए प्राण शब्द से जीव तथा मुख्य प्राण का ही ग्रहण होना चाहिए, परमात्मा का ग्रहण नहीं करना चाहिए । इस प्रकार का जो प्रश्न है उसका निराकरण करने के लिए वृत्तिकार उपक्रम करते हुए कहते हैं--ननु "न वाचं विजिज्ञासीत" इत्यादि । वाणी की जिज्ञासा मत करो किन्तु वाणी का प्रेरक जो जीवात्मा है उस जीव को जानने का प्रयास करो' इत्यादि जो वाक्य हैं वे जीव के लिङ्ग हैं ।

द्वाच्यत्वेन सम्बन्धात् परमात्मैवात्रप्राणशद्ववाच्य इति सिद्धः ॥३२॥

इति श्रीमद्भगवद्रामानन्दाचार्यान्वय प्रतिष्ठित श्रीमदनुभवानन्दाचा
र्यद्वारकेणजगद्गुरु श्रीरामानन्दाचार्योपाधिविभूषित ब्रह्म
विरस्वामि श्रीरघुवराचार्य वेदान्त केसरिणा
वरचितायां रघुवरोयवृत्तौ(ब्रह्मसूत्रीयवृत्तौ)
प्रथमाध्यायस्य प्रथमःपादः ।
श्रीमतेरामानन्दाचार्याय नमः ।

त" इत्यादि । वाचं वागिन्द्रियं न विजिज्ञासीत स्वभावतो जड़स्य वागिन्द्रियस्यात्र विज्ञेयत्वं विजिज्ञासितत्वं निषेधति. किन्तु वक्तारं वागिन्द्रियस्य कर्तारं प्रेरकं जीवमेव विजिज्ञासीत. अर्थात् वागिन्द्रिय प्रेरकस्य चेतनस्य सतो जोस्यैव विजिज्ञासा कर्त्तव्येत्यर्थ । इतीह लिङ्गं जीवस्यैव बोधकम् । एवमेव "प्राण एव प्रज्ञात्मा इदं शरीरं परिगृह्योत्थापयति" प्राण एव शरीरं परिगृह्योत्थापयतीति प्राणलिङ्ग मेवैतम्. शरीरोत्थानशरीरधारणादिकं सर्वं मुख्य प्राणस्यैव कार्यं भवति । इति शरीरधारणादिकार्यदर्शनेन मुख्यप्राणस्येदं लिङ्गं भवति तस्मात्

एवं "प्राण एव प्रज्ञात्मा" प्राण ही प्रज्ञात्मा—स्वरूप है । जो प्राण इस शरीर को पकड़ा है और इसको धारण किया है । इत्यादिक मुख्य प्राण का लिङ्ग है । इससे यह सिद्ध होता है कि इस प्रकरण में प्राणपदवाच्य जीव है, अथवा मुख्य प्राण है किन्तु परमात्मा नहीं है । यह हुआ पूर्व पक्ष । एतादृश पूर्व पक्ष के समाधान में कहते हैं 'एकस्यैव ब्रह्मणः" इत्यादि । एक ही जो ब्रह्म है वह सत्यज्ञानादि स्वरूप से चेतन शरीरकत्व रूप से तथा अचेतन जड़ वर्गादि शरीरकत्व रूप से विशिष्टतया सर्वत्रावस्थित है तो तादृश परमात्मा अनुसंधान तथा उपासना का प्रयोजक है । तादृश परमात्मा की उपासना भी तीन प्रकार की है यह अर्थतः फलित होता है । अर्थात् इस प्रकरण में परमेश्वर श्रीराम की उपासना कहीं तो सच्चिदानन्दादि स्वकीय रूप से, कहीं जीवशरीरकत्वरूप से, कहीं तो प्राणादि जड़ शरीरकत्व रूप से बतलाई